।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

पुनितप्रेरणा व आशीर्वाद

राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

श्री महावीर जैन आराधना केन्द्र

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

शहर शाखा

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ उव्वटभाष्यसँव्वलितोत्तरार्द्धमारब्भ्यते ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

(१) इमम्मे। इमम्मेनानुवाकेमैष्टिकंहौत्रम्। प्रथमेवारुण्यौ गायत्रौत्रिष्टुभौ वारुणस्यहविषो याज्यानुवाक्ये। हेवरुण त्वंमेमम इमंहवमाह्वानं शुधिशृणुच अपरम् अद्यमृडयसुखय

॥ श्रीगणेशायनमः ॥ ॐ भूर्भुवस्वः॒तत्स॑वितुर्व॑रेण्यꣳभर्गो॑देवस्य॑ धीमहि धियोयो॑नः॒प्रचो॑दया॑त् ॥ * इमम्मे॑व॒रुणश्शु॒धीह॑व॒मुद्या॑चं मृडय ॥ त्वाम॑व॒स्युरा॑च॒के ॥ १ ॥ तत्त्वा॑ ॥ यामि॒ब्रह्म॑ण॒स्पत॑ इ॒मा नु॒स्तदाशा॑स्ते॒यज॑मानो॒हवि॑र्भिः॒ ॥ अहे॑डमानोव॒रुणे॑हबो॒ध्युरु॑शꣳस॒ मा

कालविलम्बनंमाकृथाः यतः अहम् अवस्युः आत्मनोरक्षणंपालनमिच्छन् त्वाम् आचके। आचक-ष्टेतिकान्तिकर्मा। कामये ॥ १ ॥ तत्त्वायामि ॥ २ ॥ ब्रह्मणः। अग्निवारुण्यौत्रिष्टुभौ अग्नि-

(१) का० इमंमे तत्त्वेत्येककपालस्य। अवभृथेष्टौ वारुणस्यैककपाल पुरोडाशस्य ये पुरोऽनुवाक्यायाज्ये इत्यर्थः।

* इमम्मेसमिधो अग्निरेकादशक्रोढो वसंतेनऋतुनाषड् तायचत्समिधाग्निं द्वादशाश्विनौ क्रागस्यसप्तदेवंव र्हिश्चतुर्दशषडे-कषष्टिः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वरुणयोः स्विष्टकृतोर्याज्यानुवाक्ये । (१) हेअग्ने त्वंनोस्मान्प्रतिवरुणस्य देवस्यहेडःक्रोधम् अवया-
सिसीष्ठाः यसुउपत्तये । अस्यावपूर्वस्यण्यन्तस्य लिङिरूपम् अवगमय । यजिष्ठः यष्टृतमः ।
वन्हितमः वोढृतमोहविषाम् । शोशुचानः देदीप्यमानः । किञ्च अस्मत् अस्मत्तः विश्वावि-

मानऽआयुःप्रमोषीः ॥ २ ॥ त्वन्नः ॥ त्वन्नोऽअग्नेव्वरुणस्यविद्वान्देव
स्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोवह्नितमःशोशुचानोविश्वा
द्वेषांऽसिप्रमुमुग्ध्यस्मत् ॥ ३ ॥ सत्वम् ॥ सत्वन्नोऽअग्नेवमोभ
वोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ ॥ अवयक्ष्वनोव्वरुणꣳ रराणो
ष्वानिसर्वाणिद्वेषांसिदौर्भाग्यानिप्रमुमुग्धिमुञ्च ॥ ३ ॥ सत्वन्नः । हेअग्ने सत्त्वम् ऊतीऊत्या
अवनेन नः अस्माकम् अवमः अविष्टतमःपालयिष्टतमः भव । अस्याउषसः व्युष्टौ व्युष्टिका-
लेअस्मिन्नेवाहनीतिभावः । नेदिष्ठः अन्तिकतमश्चभव । रराणः रममाणः रादाने । हविर्ददत् ।

(१) का० अग्नोवरुणयोस्त्वं नः स त्वं न इति । अवभृथेष्टावेवाग्निवरुण्यागे पुरोऽनुवाक्यायाज्ये ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नोस्माकं वरुणम् अवयक्ष्वअवगत्ययज । अवपूर्वोयजतिर्नाशनार्थः इहतु धात्वन्तरयोगात्स्वार्थमेववक्ति । ततः सुमृडीकं सुखकरंहविः वीहिभक्षय । नः अस्माकं सुहवः स्वाह्वानः एधि ॥ ४ ॥ (१) महीमूषु । आदित्यचरोर्याज्यानुवाक्येचत्रिष्टुभौ महीम्महतीम् । ऊसूनिपातोपसर्गौ क्रन्दः परिपूर्तिफलौ । मातरंनिर्मात्रीं साधुव्रतानाम् । ऋतस्ययज्ञस्यपत्नीं जायांपालयित्रींवा । अवसे-

व्वीहिमृडीकꣳसुहवोनऽएधि ॥ ४ ॥ महीमूषु ॥ मातरꣳसुव्रतानाम्मृतस्यपत्नीमवसेहुवेम ॥ तुविक्षत्त्वामजरन्तीमुरूचीꣳसुशर्म्माणम्दितिꣳसुप्रणीतिम् ॥ ५ ॥ सुत्रामाणम्पृथिवीम् ॥ सुत्रामाणम्पृथिवी

अवनायतर्पणायवा हुवेमआह्वयाम । तुविक्षत्राम् । बहुक्षरणांवा बहुक्षतत्राणावा । अजरन्तींजरारहिताम् उरूचींबहुव्यञ्चनां सुशर्माणंकल्याणाश्रयां साधुसख्याम् अदितिमदीनाम् । सुप्रणीतिंसुप्रणेत्रीम् ॥ ५ ॥ सुत्रामाणम् । साधुपालयित्रीम् पृथिवीम् पृथिवीमिव लुप्तोपमान-

(१) का० आदित्यस्य सुत्रामाणम् महीमूषु मातरमिति । आदित्यं चरुं यक्ष्यमाणो निर्वपत्यादित्यमीजान इत्यादावन्ते चादितास्यश्चरुरुक्तस्तसुत्रामाणमिति पुरोऽनुवाक्या महीमू ष्विति याज्या ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मेतत्। द्यामनेहसम् द्यामिववाहयित्वीं जीवनहेतुभूताम् सुशर्माणंसाधुशरणां शोभनाश्रयांवा। अदितिमदीनाम्। सुप्रणीतिंसुप्रणेत्रीम। दैवींयज्ञमयांनावं। स्वरित्रांसाधुकेन्दुवालाम् अरित्र-शब्दः केन्दुवालवचनः। अनागसमनपराधाम् अस्रवन्तीम्अपूर्यमाणामुदकेन। अनवच्छिन्नसा-

न्द्यामनेहसꣳसुशर्म्माणमदितिꣳसुप्रणीतिम्॥ दैवीन्नावꣳ स्वरि त्वामनागसमस्रवन्तीमारुहेमास्वस्तये ॥ ६॥ सुनावमारुहेयम्॥ सुनावमारुहेयमस्रवन्तीमनागसम्॥ शतारित्वाꣳस्वस्तये ॥ ७॥ आनः॥ आनोमित्रावरुणाघृतैर्गव्यूतिमुक्षतम्॥ मध्वारजाꣳ

धुकर्मदायिनीमित्यर्थः। आरुहेम। स्वस्तयेअविनाशाय॥ ६। सुनावम्। गायत्री। तद्वैसर्वए-वयज्ञोनौः स्वर्ग्येतिश्रुतेरुपकल्पना। कल्याणींनावम् आरुहेयम् अस्रवन्तीम् अच्छिद्राम् निर्दोषा-मित्यर्थः अनागसमपापाम् अभीष्टितार्थसाधनतत्परामित्यर्थः। शतारित्रांबहुकेन्दुवालाम् ऋग्यजुः सामाभिप्रायम् स्वस्तयेअविनाशाय। संसारसागरोत्तरणायवा॥ ७॥ (१) आनः। मैत्रावरुण्याः

(१) का० आ नः प्र बाहवेति परस्यायाः। १८। ७। १६ अवभृथादुदेत्य मैत्रावरुण्या पयस्यया यजतीति या पयस्या तस्या आ नो मित्रावरुणेति पुरोऽनुवाक्या प्र बाहवेति याज्या। मित्रावरुणदेवतया गायत्री विश्वामित्रदृष्टा।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पयस्यायाज्यानुवाक्ये गायत्रीत्रिष्टुभौ। आउच्चतम् आसिञ्चतम् नः अस्माकम् हेमिचावरुणौ। घृतैः अच्चारोदकैः गव्यूतिम् गविपृथिव्यामवनहेतुभूतंक्षेत्रंगोप्रचारंवा। किञ्च मध्वारजांसि। मधुस्वादोदकेनरजांसि। लोकारजांस्युच्यन्ते। तान्आउच्चतम्। हेसुक्रतू। सुकर्माणौ ॥ ८ ॥ प्रवाहवा। प्रसिस्तम् अन्तर्भावितण्यर्थः। प्रसारयतम्। बाहवा बाहू। किमर्थमितिचेत्।

सिसुक्रतू ॥ ८ ॥ प्रबाहवा ॥ सिस्तञ्जीवसेनऽआनोगव्यूतिमुच्चत घृतेन ॥ आमाजनेष्श्रवयतंय्युवानाष्श्रुतम्मेमित्रावरुणाहवेमा ॥ ९ ॥ शन्नः ॥ शन्नोभवन्तुव्वाजिनोहवेषुदेवतांतामिताद्र्वःस्वर्काः ॥ जुम्भ

जीवसेनः। जीवनायास्माकम। बाहुप्रसारणंजीवनहेतुप्रतिपक्षनिराकरणायेत्यर्थः। ततआउच्चतम् आभिमुख्येनसिञ्चतम् नः अस्माकम् गव्यूतिम्। गविपृथिव्यामूतिमवनम् जीवनहेतुभूतानिक्षेत्राण्यत्राभिप्रेतानि। तदर्थंहि दृष्टिः प्रार्थ्यमाना दृष्टार्थाभवति। गोजातिविषयभूतांवा जतिम् अवनमार्गम् भक्षणमार्गा भिप्रायतो गोप्रचाटमितियावत्। घृतेनाच्चारोदकेन। आमाजने-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रवयतं युवाना। एवमचारोदकेन सिक्ताधान्यनिष्पत्तिहेतुना यज्ञंकुर्वाणम् मामाम् जनेजनपदे आश्रवयतं प्रकथयतम् इत्थमदादित्थमदाद्धीदिति। हेयुवानौउच्छिन्नजरसौ। श्रुतमश्रावृणुतं मम हेमिचावरुणौ। हवेमा हवान्आह्वानानिद्रमानि। श्रुत्वाचातिष्ठतमित्यभि-

युन्तोहिँव्वृकुरक्षांऽसिसनेम्म्युस्मद्युयवन्नमीवाः ॥१०॥ वाजेवाजे वत॥ वाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः॥ अस्यमद्ध्वंःपि बतमादयद्ध्वन्तृप्नाषांतपुथिभिर्द्देवयानैः॥ ११॥ समिद्धोऽअग्निः॥ समिधासुसंमिद्धोव्वरेण्यः॥ गायत्रीच्छन्दऽइन्द्रियन्त्रावृर्गौर्व्वयोद

प्रायः॥ ९॥ शन्नः॥ १०॥ वाजेवाजेवत॥ ११॥ वाजिनस्यायाज्यानुवाक्याव्याख्याते॥१०॥ ११॥ समिद्धोअग्निः। एकादशआप्रियः। अनराशंसा ऐन्द्रायावयोधसेनुष्टुभः। समिद्धः सन्दीप्तः

(१) का० वायोधस आप्रियः समिद्धो अग्निः समिधेति। १९। ७। १९ वायोधसे पशौ समिद्धो अग्निरित्याद्या एकादश ऋच आप्रियः प्रयाजानां याज्या इति सूत्रार्थः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अग्निः समिधाप्रयाजदेवतया। सुसमिद्धः प्रयाजघृतेन। वरेण्यः वरणीय. संभजनीयः। गायत्रीछन्दः त्र्यविश्चगौः वयः अवयः अनुचरत्वेनयस्य सतथोक्तः। इन्द्रियंवीर्यंच। वयः सत्त्वमन्नंवा आयुर्वाइन्द्रेदधुः निदध्युः॥ १२॥ तनूनपात्। तनूनामपान्नपान्नप्राअग्निः। गौर्वातनूः तस्या-नप्राघृतम्। शुचिव्रतः उज्वलकर्मा। तनूपाः सरस्वतीच। उष्णिहाविभक्तिव्यत्ययः उष्णिक्-

धुꣳ॥ १२॥ तनूनपाच्छुचिंव्रतꣳ॥ तनूनपाच्छुचिंव्रतस्तनूपाश्च सरंस्वती॥ उष्णिहाच्छन्दंऽइन्द्रियन्दित्यवाङ्गौर्व्वयोंदधुꣳ॥ १३॥ इडांभिरग्निꣳ॥ इडांभिरग्निरीड्यꣳसोमोंदेवोऽअमंर्त्त्यꣳ॥ अनु ष्टुप्छन्दंऽइन्द्रियम्पञ्चाविग्गौर्व्वयोंदधुꣳ॥ १४॥ सुबर्हिरग्निꣳ॥

छन्दः दित्यवाट् गौःएतेचत्वारः इन्द्रियंवयश्च इन्द्रेदधुः॥ १३॥ इडाभिरग्निः। इडाभिः प्रयाजदेवतया सहअग्निः ईड्यःस्तोतव्यः। सोमश्चदेवः अमर्त्यः अमरणधर्मा अनुष्टुप्छन्दः पञ्चाविश्च गौःइन्द्रियं वयश्चइन्द्रेदधुः॥ १४॥ सुबर्हिरग्निः। शोभनबर्हिः प्रयाजदेवतयाग्निः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूषण्वान्पूषणासंयुक्तः । स्तोर्णवर्हिस्तीर्णवर्हिर्यसासतथोक्तः । मर्त्यः अमरणधर्मा । बृहती-
च्छन्द ऋषभश्च गौःएतेइन्द्रियंवयश्चइन्द्रे दधुः ॥ १५ ॥ दुरोदेवीः । दुरः द्वारः प्रयाजदेवताः
छान्दसंसंप्रसारणम् । देवीः देव्यः दिशश्च । महीः महत्यः । ब्रह्माचदेवः बृहस्पतिश्च । पंक्ति-
श्छन्दः । इहेत्यभिनयनिर्देशः । इहयज्ञावयवे इहइन्द्रशरीरावयवे । तुर्यवाट्गौश्चइन्द्रियंवय-

पूषण्वान्त्स्तीर्णबर्हिरमर्त्यः॥बृहतीच्छन्दऽइन्द्रियन्त्रिवत्सोगौर्व्वयो
दधुः ॥१५॥ दुरोदेवीः ॥ दुरोदेवीर्हिशोमहीर्ब्रह्मादेवोबृहस्पतिः॥
पङ्क्तिश्छन्दऽइहेन्द्रियन्तुर्य्यवाङ्गौर्व्वयोदधुः ॥ १६ ॥ उषेयुच्ह्वीसुपेशं
सासाविश्वेदेवाऽअमर्त्याः ॥ त्रिष्टुप्छन्दऽइहेन्द्रियम्पष्ठवाङ्गौर्व्वयो

धदधुः ॥ १७ ॥ उषेयह्वी । उषेइति द्विवचनसामर्थ्यात्सह चरितत्वाच्च द्वितीयाराविर्गृह्यते ।
उषाश्चराविश्च । किंदृश्यौ यह्वीमहत्यौ । सुपेशसासाधुरूपे । विश्वेदेवाः अमर्त्याः अमरण-
धर्माणः । त्रिष्टुप्छन्दः । इहइन्द्रयज्ञयोः । पष्ठवाट्च गौःपष्ठंभारंवहतीतिपष्ठवाट् । इन्द्रि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यंवयश्चदधुः ॥ १७ ॥ दैव्याहोतारा अयंचाग्निः असौचमध्यमः । भिषजौ इन्द्रेणसयुजौसंयुक्तौ समानकार्यौ । युजापरस्परेणयुक्तौ । जगतीच्छन्दः अनड्वाश्वगौःएते इंद्रेइंद्रियंवयश्चदधुः ॥ १८ ॥ तिस्रइडा । तिस्रोदेव्यः इडासरस्वती । भारती । मरुतश्चविशः इंद्रसग्प्रजाः । विराट्छन्दः

दधुꣳ ॥ १७ ॥ दैव्याहोतारा ॥ भिषजेन्द्रेणसयुजायुजा ॥ जगंतीच्छन्दंऽइन्द्रियमनड्वान्गौर्व्वयोदधुꣳ ॥ १८ ॥ तिस्रऽइडा ॥ तिस्रऽइडासरंस्वतीभारंतीमरुतोव्विशꣳः ॥ व्विराट्च्छन्दंऽइन्द्रेन्द्रियन्धेनुर्गौर्न्नव्वयोदधुꣳ ॥ १९ ॥ त्वष्टातुरीपꣳः ॥ त्वष्टातुरीपोऽअद्भुतऽइन्द्राग्नीपुष्टिवर्द्धना ॥ द्विपंदाच्छन्दंऽइन्द्रियमुक्षागौर्न्नव्वयोदधुꣳ॥२०॥

धेनुर्दोग्ध्रीगौश्च । नकारश्चार्थे । एतेइंद्रियंवयश्चइंद्रे दधुः ॥ १९ ॥ त्वष्टातुरीपः तूर्णमापन्नः अद्भुतः अद्भुतइव महानित्यर्थः । इंद्राग्नीचपुष्टिवर्द्धनौ । द्विपदाचछन्दः । उक्षागौर्न्न । नकारश्चार्थे । उक्षासेक्ताचगौः । एतेइंद्रे इंद्रियंवयश्चदधुः ॥ २० ॥ शमितानः शमयिताऽतिप्राप्ते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शमितामन्वइतिच्छान्दसः प्रयोगः शमितानःअस्माकंवनस्पतिः सविताचप्रसुवन् भगंधनम् । ककुप्चछन्दः इहेत्यभिनयः इहइन्द्रे वशावन्ध्यागौः वेहच्चविहंतित्यजतिगर्भंयागौः सातथोक्ता । इन्द्रियंवयश्चदधुः ॥ २१ ॥ स्वाहायज्ञम् । स्वाहाकृतिभिः यज्ञंभेषजंकरत्करोतु । कःकरोतु ।

शमितानः ॥ शमितानोव्वनस्पतिःसविताप्रसुवन्भगम् ॥ ककुप्छन्दऽइहेन्द्रियंव्वशाव्वेहद्वयोदधुः ॥२१॥ स्वाहायज्ञम् ॥ व्वरुणः सुत्रत्रोभेषजङ्करत् ॥ अतिच्छन्दा ऽइन्द्रियम्बृहद्दषभोगौर्व्वयोदधुः ॥ २२ ॥ [११] व्वसुन्तेनऽऋतुना ॥ देवाव्वसव्वस्त्विहतास्तुताः ॥ रथन्तरेणतेजसाहविरिन्द्रेव्वयोदधुः ॥ २३ ॥ ग्रीष्मेणऽऋतुना ॥

वरुणः सुत्रत्रः । अतिच्छन्दाश्चच्छन्दः बृहद्दषभश्चगौः इन्द्रेइन्द्रियंवयश्चदधुः ॥ २२ ॥ वसन्तेनऋतुना । वपापुरोडाशपशूनां याज्यानुवाक्याअनुष्टुभः । वयोधससप्तपशोः । इन्द्रश्च-वयोधादेवता । वसन्तेनऋतुना सहायेनदेवाः वसवः त्रिहतास्तोमेनस्तुताः सन्तः रथन्तरेणच

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पृष्ठेनच सहायेनद्वन्देतेजसासह हविर्वपाखंर वयश्चदधुः । यद्दावसन्तेनऋतुनास्तुताः त्रिवृतास्तोमेनच स्तुताः रथन्तरेणच पृष्ठेनस्तुताः सन्तोवसवोदेवाः स्वकीयेन तेजसाइन्द्रे हविर्वयश्चदधुः । एवमुत्तरेष्वपियोज्यम् ॥ २३ ॥ ग्रीष्मेणऋतुना । सहदेवाः रुद्राः पञ्चदशे पञ्चदशेनेतिविभक्तिव्यत्ययः पञ्चदशेनस्तोमेनस्तुताः सन्तः बृहतापृष्ठेनचसह । यशसासहबलं हविः इन्द्रे व-

देवारुद्राऽपंञ्चदशेस्तुताऽ ॥ बृहतायशंसाबलंꣳहुविरिन्द्रेव्वयोंदधुः ॥ २४ ॥ व्वर्षाभिर्ऋतुनांदित्यास्तोमेंसप्तदशेस्तुताऽ ॥ व्वैरूपेणांव्विशौजंसाहुविरिन्द्रेव्वयोंदधुꣳ ॥२५॥ शारदेनंऽऋतुनां ॥ देवाऽएंकविꣳशऽऋभवंस्तुताऽ॥ व्वैराजेनंश्रियाश्रियंꣳहुविरिन्द्रेव्वयोंदधुꣳ ॥२६॥

यश्चदधुः ॥ २४ ॥ वर्षाभिर्ऋतुना । सहआदित्याः । स्तोमेसप्तदशेस्तोमेनसप्तदशेनेतिविभक्तिव्यत्ययो । स्तुताः सन्तः वैरूपेणपृष्ठेनसह विशाच । ओजसाच हविरिन्द्रे वयश्चदधुः ॥ २५ ॥ शारदेनऋतुना । सहऋभवोदेवाः एकविꣳशे । एकविंशेनेति विभक्तिव्यत्ययः । एकविंशेन-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सोमेनसुताः सन्तः विराजेनच पृष्ठेनसह श्रियाचश्रियंच हविरिन्द्रेवयश्चदधुः ॥ २६ ॥ हेमन्तेनऋतुना। सहदेवाः मरुतः त्रिणवे। त्रिणवेनेतिविभक्तिव्यत्ययः। त्रिणवेनसोमेनसुताः सन्तः। वलेनशक्करीः सह। शक्करीरितियोनिनिर्देशः शाक्करस्य। शाक्करेणेतिविभक्तिव्यत्ययः। शाक्करेणच पृष्ठेनसह। वलेनचसह। सहः हविः इन्द्रे वयश्चदधुः ॥ २७ ॥

हेमन्तेनऽऋतुना ॥ देवास्त्रिणवेमरुतस्सुताः ॥ वलेनशक्करीऽसहो हविरिन्द्रेव्वयोदधुः ॥२७॥ शैशिरेणऽऋतुना ॥ देवास्त्रयस्त्रिꣳशेमृतास्सुताः ॥ सत्येनरेवतीऽछचꣳहविरिन्द्रेव्वयोदधुः ॥ २८ ॥ [६]

होतायक्षत् ॥ होतायक्षत्समिधाग्निमिडस्पदे इक्षेनेन्द्रꣳसरस्व

शैशिरेणऋतुना। सहदेवाः अमृताः। त्रयस्त्रिꣳशे। त्रयस्त्रिंशेनेतिविभक्तिव्यत्ययः। त्रयस्त्रिंशेनसोमेनसुताः सन्तः। सत्येनरेवतीः रेवतीरितिरैवतस्ययोनिनिर्देशः। रैवतेनच पृष्ठेनसह सत्येनच। छत्रंहविश्च इन्द्रे वयश्चदधुः। २८॥ (१) होतायक्षत्। द्वादशाप्रियस्तनूनपात्राशंस-

(१) का० होता यक्षत्समिधाग्निमिति प्रयाजप्रैषास्त्रिपशौ होता यक्षत्समिधाग्निमिडस्पद इत्यादयो द्वादश काण्डकास्त्रिपशौः प्रयाजप्रैषाः स्युः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

युक्ताः । प्रैषिकमश्विसरस्वतीन्द्रदेवत्यम् । दैव्योहोतायक्षत्यजतु । समिधाप्रयाज देवतयाग्नि- मवस्थितम् । इडस्पदे । इडागौरुच्यते तस्याः पदमाहवनीयस्याप्यते तदभिप्रायमेतत् । गोः पदे । अवस्थितमाहवनीयमग्निम् । एताश्चदेवताविशेषाः यजतु । अश्विनौइन्द्रंसरस्वतीम् । अजोधूमोन नकारः समुच्चयार्थाः प्रायः । अजोधूमोमेषश्च । गोधूमैः कुवलैश्च सहितः-

तोमजोधूम्मोनगोधूमैःकुवलैर्भेषजम्मधुशष्पैर्न्नतेजऽइन्द्रियम्मयुः सोमःपरिस्रुतांघृतम्मधुव्यन्त्वाज्यस्यहोतुर्य्यज ॥२९॥ होतायक्षत्तनूनपात्सरंस्वतीम् ॥ होतायक्षत्तनूनपात्सरंस्वतीमविर्म्मेषोनभेषु

भेषजमत्रसंपद्यते । मधुशष्पैःन । मधुचसंपद्यतेसशष्पैरंकुरित व्रीहिभिः सहितः । तेजः इन्द्रि- यञ्चइन्द्रस्य यजमानस्यवासंपद्यते । अश्विसरस्वतीन्द्राश्चदैव्यैनहोत्रा इज्यमानाः सन्तः पयः सोमश्च सोममितिविभक्तिव्यत्ययः । परिस्रुतासहघृतंमधुच । व्यन्तुपिबन्तु । त्वमपिहेमनुष्य- होतः आजस्य यजआजंदेहि ॥ २९ ॥ होतायक्षत्तनूनपात्सरस्वतीम् । तनूनपातमितिविभ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

क्तिव्यत्ययः। सरस्वतीच। अश्विनेन्द्रायेत्युपरिष्टा द्व्यवहितंयत्पठ्यते तदिहकृतविभक्तिव्यत्ययं-योज्यतेर्थसबन्धात्। अश्विनौ इन्द्रश्च। अविर्मेषोनभेषजम्। नकारः समुच्चयार्थीयोभिन्नक्रमः अविश्चमेषश्चभेषजम् इन्द्रायेतियजमानायवाकरोति। पथामधुमताभरन्। पथायज्ञमार्गेण मधु-मतारसवता आत्मानम्भरन् हरन् हवींषिचदेवान्प्रति हव्यहोर्भश्छन्दसिहसेतिहकारस्यभकारः।

जम्पथामधुमताभरन्नश्विनेन्द्रायवीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तो वक्मभिःपयःसोमःपरिस्रुतांघृतम्मधुव्यन्त्वाज्यस्यहोतर्य्यज ॥३०॥ होतायक्षन्नराशꣳसन्न ॥ नग्नहुम्पतिꣳसुरयाभेषजम्मेषःसरस्वती

वीर्यंवदरैरुपवाकाभि भेषजन्तोक्मभिः। उपवाकाभिः इन्द्रयवैः तोक्मभिरंकुरियवैः। वीर्यम्भेष-जंकरोतिमेषएव। इन्द्रायेतियजमानायवा। अश्विसरस्वतीन्द्राश्च दैव्येनहोत्रा इज्यमानाः पयः प्रभृतीनिपिवन्तु। त्वमपिहेमनुष्यहोतः आज्यस्ययज ॥ ३० ॥ होतायक्षन्नराशꣳसन्न। दैव्योहो-तायजतु। नराशंसंननग्नहुम्पतिम्। व्यवहितपदकल्पना। नराशंसश्च। पतिमधिपतिंजगतः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यज्ञोहि नराशंसः सञ्जाहुतिपरिणामद्वारेण जगद्विभर्त्ति । नग्नहुम् सुरयासहितंनग्नहुं किलं च होतायजत्त्विन्यनुवर्तते । भेषजंमेषः । वपाइन्द्रसेत्यादिपरिष्टात्प्रैषस्यशूयते । सइहानुषज्यते । भेषजम्मेषः वृन्द्रस्यकरोत्वितिवाक्यशेषः । सरस्वतीभिषक् इन्द्रस्यभवतु । रथीनचन्द्र-श्विनोः । रथश्चभिषगिन्द्रस्यभवतु । कथं भूतोरथः । चन्द्री । चन्द्रमितिहिरण्यनाम । तद-

भिषग्ग्रथीनचन्द्र्यश्विनोर्व्वपा ऽइन्द्रस्यवीर्य्यं म्बदं रैरुपवाकाभिर्भेषजन्तोक्मभिऽपयु ऽसोमः परिस्रुतांघृतम्मधुव्यन्त्वाज्यस्यहोतर्य्यजं ॥ ३१ ॥ होतायक्षद्विडेडितऽ ॥ होतायक्षद्विडेडितऽआजुह्वा

स्रास्रीतिचन्द्री । सुवर्णखचितः । अश्विनोः सम्बन्धी । नन्वश्विनोः संबन्धिनोरथस्य कथमभिषिक्तम् शृणु । आयुधस्याहनस्यापि स्तुतौयसेहदृश्यते । तमेवतुस्तुतंविन्द्यात्तस्यात्मावहुधाहिसः । वपाइन्द्रस्य वीर्यंकुर्वन्त्वितिशेषः । वपाइतिबहुवचनोपदेशः । चिपशुविषयः । वदरैः उप-वाकाभिः तोक्मभिः भेषजमिन्दस्याभवत्वितिशेषः । अश्विसरस्वतीन्द्राश्च दैव्येनहोत्रेजयमानाः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पयः प्रभृतीनिपिवतु त्वमपि हेमनुष्य होतराजास्ययज ॥ ३१ ॥ होतायक्षदिडेडितः । होतायजतु । इडाप्रयाजदेवतया ईडितः स्तुतः सन् । किंकुर्वन् । आजुह्वानः सरस्वतीम् । सरस्वतीमाह्वयन् । अश्विनेन्द्रायेत्युपरिष्टा त्प्रैषस्यापठ्यते तदेतत्पदद्वयमिहकृत विभक्तिव्यत्ययं संबध्यते । उक्तञ्च । यस्ययेनार्थसंबन्धो दूरस्थस्यापितस्यात् । अर्थतोह्यसमानाना मानन्त-

नु ऽ सरंस्वतीमिन्द्रम्बलेनव्वृ र्ङ्यंन्नृषभेणगवेंन्द्रियमश्विनेन्द्रांयभेषु जंय्यवैं ÷ कुर्क्कन्धुंभिर्म्मधुंलाजैर्न्नमासंरम्पयुऽ सोमं÷परिस्रुतांघृतम्मधु व्व्यन्त्वाज्ज्यंस्यहोतुर्य्यजं ॥३२॥ होतांयक्षद्बर्हिरूर्णम्म्रदाऽ ॥ होतां

र्य्यकारणमिति (१) अश्विनौद्वन्द्रञ्च । किञ्च । इन्द्रम्बलेनवर्द्धयन् । ऋषभेण गवाच इन्द्रियंमिन्द्रसावर्द्धयन् । मधुमा सरंचउपादायेतिशेषः । यवैः कर्कन्धुभिर्लाजैश्चभेषजमिन्द्रसावर्द्धयन् । अश्विसरस्वतीन्द्राश्च दैव्येनहोत्रेजयमानाः पयः प्रभृतीनिवयन्तु त्वमपिहेमनुष्यहोतराजास्ययज ॥ ३२ ॥ होतायक्षद्बर्हिरूर्णम्म्रदाः होतायजतुप्रकृतादेवताः । बर्हिश्चप्रयाजदेवता ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऊर्णम्रदाः ऊर्णम्रदइतिप्राप्ते ऊर्णम्रदाइतिछान्दसोलिङ्गविपर्ययः। ऊर्णेवमृदुर्भिषग्भवतुइन्द्राय। भिषग्वैद्यउक्तः। नासत्याभिषजाश्विना। नासत्यानाशिका प्रभवावश्विनौ भिषजौभवतामिन्द्रस्य। अश्वावडवा शिशुमती धेनुश्च भिषगिन्द्रस्यभवतु। इत्थंभूताहि सादक्षिणापद्यते।

यच्चद्रुर्हिरुर्णम्म्रदाभिषङ्ङासंत्त्याभिषजाश्विनाप्रश्वाशिशुमतीभिषग्धेनुः सरस्वतीभिषग्दुहऽइन्द्रायभेषजम्पयः सोमः परिस्रुतांघृतम्मधुव्यन्त्वाज्यस्यहोतर्य्यज ॥ ३३ ॥ होतायच्चद्रुरोदिशः कवुष्यो नव्यचंस्वतीरप्रिश्वब्भ्यान्नदुरोदिश्रु ऽइन्द्रोनरोदंसीदुघंदुहेधेनुः सरं

कस्मात्पुनरेवमाशास्यत इत्यतआह। यतःसरस्वतीभिषक् स्वयमेवदुहे दोग्धिइन्द्रायमेषजम्। अतोयूयमपि भिषजौभवथेति। अश्विसरस्वतीन्द्राश्च दैवीनहोत्रे जग्रमानाः पयःप्रभृतीनिन्यन्तु त्वमपि हेमनुष्यहोतराजग्रसा यज ॥ ३३ ॥ होतायच्चद्रुरोदिशः। होतायजतु। दुरःद्वार इतिप्राप्ते छान्दसंसंप्रसारणम्। द्वाराणीति लिङ्गव्यत्ययेनपर्वायः। कथंभूता यज्ञगृहद्वारः। दिशः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कवष्योन व्यचस्वती: । लुप्तोपमानमेतत् । दिशद्वयाःकवष्यः समुषिराः । व्यचस्वती:व्यञ्च-
नवत्यः गमनवत्यश्चयाः । अश्विभ्यान्नदुरोदिशः । अश्विभ्याञ्च वाअधिष्ठिताः यज्ञगृहद्वारो-
दिश द्ववभूवुः । इंद्रोनरोदसीदुघे । इंद्रश्चयाअधिष्ठाय रोदसीद्यावापृथिव्यौदुहे । हकारसा-
घकारः । दुग्धवान् । याश्चाधिष्ठायदुहे धेनुर्भूत्वा सरस्वतीअश्विनौच । कस्मैदुहेकिञ्च दुह-

स्वक्त्युश्विश्वनेन्द्रायभेषुजꣳशुक्रन्नज्ज्योतिंरिन्द्रियम्पयꣳसोमः॑परिस्रु
तांघृतम्मधुव्यन्त्वाज्ज्यस्यहोतुर्य्यजं ॥३४॥ होतांयक्षत्सुपेश॑सोषेन
क्तन्दिवाश्विश्वनासम॑ज्ञातेसर॑स्वत्याक्त्विषिमिन्द्रेनभे॑षुजꣳश्येनोनर

त्यतआह । इंद्रायभेषजं शुक्रंशुक्रंज्योतिश्च इंद्रियञ्चदुहे । अश्विसरस्वतींद्राश्च पयःप्रभृती-
निव्यन्तु त्वमपि हेमनुष्य होतराजन्सत्ययज ॥ ३४ ॥ होतायक्षत्सुपेशसोषे । होतायजतु सुपे-
शसासुरूपे । उषेदूतिद्विवचनोपदेशा द्राविंश्च उषाश्चगृह्येते । नक्तन्दिवारात्रौच अहनिच ।
यौचाश्विनौ समञ्जातः संश्लेषयतः सरस्वत्यासहितौ । त्विषिन्दीप्तिम् इंद्रे । इंद्रभेषजञ्च

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

संश्लेषयतः तौचहोतायजतु । यश्चश्येनः रजसा । रजःशब्दोज्योतिर्वचनः । ज्योतिषा हृदा-हृदयेन । श्रियान नकाराःसर्वेसमुच्चयार्थीयाः । इहानुवाकेप्रायसः । श्रियाचसह मासरमुपादाय इंद्रेसमनक्ति । तञ्च होतायजतु ॥ अश्विसरस्वतींद्राञ्च दैव्येनहोत्रा ईजानाः पयःप्रभृ-तीनिय्यन्तु त्वमपि हैमनुष्यहोतराजन्नग्नयज ॥ ३५ ॥ होतायक्षद्दैव्याहोतारा । होतारौ

जंसाहृदाश्रिश्रियानमासंरम्मय्यः सोमंः परिस्रुतांघृतम्मधुव्व्यन्त्वाज्ज्यं स्यहोतुर्य्यजं ॥३५॥ होतायक्षद्दैव्याहोतारा॥ भिषजाश्विभ्वनेन्द्रुन्न जाग्रंविदिवानक्तन्नभेषुजैःशृषुठंसरंस्वतीभिषक्क्सीसेंनदुहऽइन्द्रि यम्मय्यं सोमंः परिस्रुतांघृतम्मधुव्व्यन्त्वाज्ज्यंस्यहोतुर्य्यजं ॥ ३६ ॥

अयञ्चाग्निरसौचमध्यमः । भिषजौअश्विनौ इंद्रन्न इंद्रञ्चहोतुयजतु । जाग्रविदिवानक्तम् नभे-षजैः शृषठंसरस्वती भिषक्सीसेनदुहइंद्रियम् । याचैषासरस्वती भिषक्जाग्रवि । स्वकार्य-सिद्धावप्रमत्ता जागरणशीलाविभक्तिलोपः । दिवानक्तञ्च भेषजैरौषधैः शृषम्बलम् सीसेनच

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दुहेदोग्धि । इंद्रियञ्चइंद्रार्थम् । ताञ्चदैव्याहोतायजतु । अश्विसरस्वतींद्राञ्च दैव्येनहोत्रेजग्मानाः पयःप्रभृतीनि व्यन्तु त्वमपि हेमनुष्य होतराजसत्र यज ॥ ३६ ॥ होतायक्षत्तिस्रोदेवीः । होतायजतु तिस्रोदेवीः वक्ष्यमाणः । नभेषजम् त्रयस्त्रिधातवोपसः । नकारस्यमुच्चयार्थीयोभिन्नक्रमः । भेषजञ्चयाइन्द्रेकुर्वन्तिताश्चहोतायजतु । त्रयः । पशवःत्रिधातवः । आश्विनोधूम्रः ।

होतायक्षत्तिस्रोदेवीः ॥ होतायक्षत्तिस्रोदेवीर्नभेषुजन्त्रयस्त्रिधातं वोपसोरूपमिन्द्रेहिरण्ययमश्विनेडानभारतीव्वाचासरस्वतीमहऽइन्द्रायदुहऽइन्द्रियम्पयुꣳसोमꣳपरिस्रुतांघृतम्मधुव्यन्त्वाज्यस्यहो

सारस्वतोमेषः ऐन्द्रऋषभः । इतित्रयः पशवः । प्रधानांगोपायज्ञित्रिधातुपशुः । अपसः अपस्विनइतिप्राप्ते छान्दसोमतुपलोपः । कर्मवन्तः । अग्नयोवात्रयस्त्रिधातवः । रूपमिन्द्रे हिरण्ययमश्विनेडानभारती । येच । इन्द्रेरूपंहिरण्मयं । कुर्वन्तिताश्च होतायजतु । केतेइत्यतआह । अश्विनोडाचभारतीच । वाचासरस्वतीमह इन्द्रायदुहइन्द्रियम् । याच वाचात्रयीलक्षणया

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सरस्वतीमह: महत्वम्यूजामिन्द्राय दुहेदोग्धि इन्द्रियञ्च । ताञ्चहोतायजतु । अश्विसरस्वती-न्द्राञ्च दैव्येनहोत्रेज्यमाना: पय:प्रभृतीनिव्यन्तु त्वमपि हैमनुष्य होतराज्यस्ययज ॥ ३७ ॥ होता-यत्तत्सुरेतसम् । होतायजतु । सुरेतसं शोभनंरेत: उदकलक्षणंयस्य शोभनंद्योतसारेत: यदुदकम् । यद्वा सुष्ठुरेतोयस्मात्तम् पुंसोरेत:कारणभूतम् । ऋषभम्वर्षितारम् । नर्यापसम् नरेभ्योहितन्नर्यम्

तुर्य्यजं ॥३७॥ होतांयत्तत्सुरेतंसमृषुभम् ॥ होतांयत्तत्सुरेतंसमृषु भन्नर्य्यांपसन्त्वष्टारमिन्द्रमश्विनांभिषजन्नसरंस्वतीमोजोनजूतिरिं न्द्रियँव्वृकोनरंभसोभिषग्ग्यशुꣳ सुरंयाभेषुज ꣳ श्रियानमासंरम्पयꣳ

तद्यसाऋप:कर्मसनर्यापस: तन्नर्यापसन्त्वष्टारम् दैव्योहोतायजतु । किञ्च । इन्द्रमश्विना भिष-जन्नसरस्वतीम् । इन्द्रम् अश्विनौभिषजञ्च सरस्वतीं दैव्योहोतायजतु । केनयजतु । ओजो-नजूतिरिन्द्रियंवृकोनरभसोभिषक् । नकार:समुच्चयार्थीय: । ओजश्चजूतिर्जव: इन्द्रियञ्च योवृक: सरभस.सोद्यमोदच्च: भिषक् तेनयजतु । सुरायांवृकलोमानि क्षिप्यन्ति इत्यतएवमुच्यते । यस:

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुरयाभेषजं श्रियानमासरम् । तथा मासरमुपादाय सुरयाचयजतु । यशोभेषजं श्रियासह इन्द्रेयजमानेवा । अश्विसरस्वतीन्द्राश्च दैव्येनहोत्रा ईज्यमानाः पयःप्रभृतीनि व्यन्तु त्वमपि हेमनुष्यहोतः आज्यस्ययज ॥ ३८ ॥ होतायच्चहनस्पतिम् । होतायजतु । वनस्पतिंशमितारं

सोमंःपरिस्रुतांघृतम्मधुव्व्यन्त्वाज्ज्यंस्युहोतुर्य्यजं ॥ ३८ ॥ होतांय च्चहनुस्प्पतिंꣳशमितारंम् ॥ होतांयच्चहनुस्प्पतिंꣳशमितारंꣳशतक्रꣳ तुम्भीमन्नमन्युꣳराजांनंव्व्याग्घन्नमंसाश्श्विनाभामुꣳसरंस्वतीभिष गिन्द्रांयदुहऽइन्द्रियम्पयुꣳसोमंःपरिस्रुतांघृतम्मधुव्व्यन्त्वाज्ज्यंस्युहो

शतक्रतुम् वहुकर्माणम् । भीमंनमन्युं राजानंव्याघ्रम् । भीमंभयानकम् मन्युंक्रोधात्मानम् । राजानमरण्यानाम पशूनांव्याघ्रञ्च होतायजतु । नमसाश्विना नमसाहविषा । अश्विनौचहो-तायजतु । भामंसरस्वतीभिषगिंद्रायदुहइंद्रियम् । याच भामंक्रोधम् । सरस्वतीभिषक् इंद्राय दुहेदोग्धि इंद्रियञ्चताञ्च दैव्योहोतायजतु । अश्विसरस्वतीन्द्राश्च दैव्येनहोत्रेज्यमानाः पयःप्रभृतीनि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वान्तु त्वमपि हेमनुयहोतराज्यस्यय ज ॥ ३९ ॥ होतायत्तदग्निंस्वाहा । दैवी होतायजतु । अग्निंप्रयाज देवतां वा आहवनीयम्वा । स्वाहाज्यस्यस्तोकानाम् सुष्ठुआह शोभनमाह यजमानः आजास्यस्तोकानाम् स्तोकाविप्रुषः । स्वाहामेदसाम्पृथक् । शोभनमाह यजमानः मेदसांव-

तुर्य्यज ॥ ३९ ॥ होतांयक्षद्ग्निꣳस्वाहा ॥ होतांयक्षद्ग्निꣳस्वा हाज्ज्यंस्यस्तोकानाꣳस्वाहामेदंसाम्म्पृथक्स्वाहाच्छागंमश्विभ्या ꣳ स्वाहामेषꣳसरंस्वत्यैस्वाहेंऽऋषभमिन्द्रांयसिꣳहायुसहंसऽइन्द्रियꣳ स्वाहाग्निन्नभेंषुजꣳस्वाहासोमंमिन्द्रियꣳस्वाहेन्द्रꣳसुत्तामाणꣳस

पासम्बज्ञानाम् पृथक्पृथक् । वपाःश्रप्यमाण आजेयनाभिघार्य्यन्तेतदभिप्रायमेतत् । स्वाहाच्छा-गमश्विभ्याम् । छागमेषर्षभशब्दाः पशुवचनाः । शोभनमाह यजमानः छागपशुमश्विभ्याम् । शोभनमाह मेषंसरस्वत्यैच । स्वाहाऋषभमिंद्राय । शोभनमाह यजमानः ऋषभम इंद्राय । कथंभूतायइंद्राय । सिंहायअभिभवित्रे । पुनःकथंभूताय । सहसेवलात्मकायच । किंभूतम्-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षभम् इन्द्रियम् इंद्रियात्मकमितिसामानाधिकरण्यात्सम्बन्धः । स्वाहाग्निन्नभेषजम् आजग्रभागौ सुआहयजमानः अग्निश्चभेषजम् । स्वाहासोममिंद्रियम । शोभनमाह यजमानः सोममिंद्रियात्मकम् । स्वाहेन्द्रंसुत्रामाणम् सवितारम्वरुणम् भिषजाम्पतिम् । पशुपुरोडाशदेवताः । सुआहयजमानः । इंद्रंसुत्रामाणम् सवितारञ्च । वरुणम्वैद्यानाम्पतिञ्च । स्वाहावनस्पतिम्

वितारंव्वरुणम्भिजाम्पतिꣳ स्वाहाव्वनस्पतिंम्प्रियम्पाथोनभेषजꣳ स्वाहादेवाऽआज्ज्यपाजुषाणोऽअग्निन्भेषजम्पयꣳसोमꣳपरिस्रुतांघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ४० ॥ [१२] होतायक्षद्विश्विनौ

प्रियम्पायोनभेषजम् । सुआह यजमानःवनस्पतिम् प्रियम्पाथश्चान्नम् भेषजञ्च । पशुदेवतानांवनस्पतिम् । स्वाहादेवाआजग्रपाः । प्रयाजानुयाजा वैदेवाआपाःशोभनमाह यजमानः देवाआजग्रपाः ईजानावैदेवा उत्तमेप्रयाजेस्मर्यन्त इत्यतोविभक्तिव्यत्ययेनकृतः । श्रुतिस्तु । देवा हवा अचुर्हन्तविजितमेवानुसर्वंयज्ञꣳ सꣳ स्थापयेत्युपक्रम्य तउत्तमे प्रयाजेस्वाहाकारेणैव

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सर्वंयज्ञठं०सठं०स्थापयन्नित्याह । अत.स्वाहाकारा: समाप्तिवचना: समाप्तिवचनत्वाच्च स्वाहाकाराणान्देवतापदस्य चतुर्थ्याभिवितव्यम् । स्वाहादेवेभ्य आज्यपेभ्यइत्ययमप्रकार: । जुषाणोअग्निर्भेषजम् । जुषाण:सेवमान: अग्नि:भेषजमोषधम् इंद्रस्ययजमानस्य वाकरोतु । अश्विसरस्वतींद्राय दैवेयनहोत्रेजायमाना: पय:प्रभृतीनि वान्तु त्वमपि हेमनुष्य होतराज्यस्ययज ॥४०॥

अ० २१

च्छागस्य॥ व्वपायामेदसोजुषेतांᳬहविर्होतुर्य्यजं॥ होतायच्चुत्सरस्वतीम्मेषस्यंव्वपायामेदसोजुषतांᳬहविर्होतुर्य्यजं ॥ होतायच्चुदिन्द्रंमृषभस्यंव्वपायामेदसोजुषतांᳬहविर्होतुर्य्यजं ॥ ४१ ॥ होतायच्चद्

(१) होतायच्चदश्विनौच्छागस्य त्रयोवपानां प्रैषायथालिङ्गम् । दैव्योहोतायजतु । अश्विनौच्छागस्य वपायामेदस: । स्नेहप्रकृतिर्मेद: । तौचेज्यमानौ जुषेतांहवि: त्वंच हेमनुष्य होतर्यज । होताय- शिवम्

(१) का० होता यच्चदश्विनाविति त्रयो वपानां प्रैषा यथालिङ्गम् । होता यच्चदश्विनौ छागस्य होता यच्चत्सरस्वतीम होता यच्चदिन्द्रमृषभमिति त्रयो वपात्रयस्य क्रमात् प्रैषा एककण्डिकायामिति सूत्रार्थ: ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चत्सरस्वतींमेषस्य । जुषतामित्येकवचनविशेषः । होतायच्चदिन्द्रमृषभस्य । सममन्यत् ॥ ४१ ॥
(१) होतायच्चदश्विनौ सरस्वतीम् । ग्रहाणांप्रेषः । दैव्योहोतायजतु अश्विनौचसरस्वतीञ्च इन्द्रञ्च-
सुत्रामाणम् एवं होतारमुक्त्वा अथेदानीमध्वर्यूनाह । हेअध्वर्यवः इमेसोमाः सुरामाणः सुर-

अश्विनौसरस्वतीमिन्द्रꣳ सुत्रामाणमिमेसोमाꣳसुरामाणꣳछागैर्न्नमेषै
र्ऋषभैꣳसुताꣳशष्पैर्न्नतोक्मभिर्ल्लाजैर्म्मꣳहस्वन्तोमदामासरेणपरिष्कृ
ताꣳशुक्राꣳ पयस्वन्तोमृताꣳ प्रस्थितावोमधुश्चुतस्तानुश्विनासर

मणीयाः सुरावन्तोवासुरामयावा । छागैर्नमेषैः ऋषभैः सुताः । नकाराः सर्वसमुच्चयार्थीयाः ।
छागैश्च मेषैश्च ऋषभैश्च सुताअभिषुताः समर्थीकृताः । शष्पैश्च तोक्मभिश्च लाजैश्च महस्वन्तः
महाभाग्ययुक्ताः महातर्पणीयाः । मासरेणपरिष्कृताः । संपर्युपेभ्यः करोतौभूषणेसुट् । मास-

(१) का० ग्रहाणां चतुर्थः । होता यच्चदश्विनौ सरस्वतीमिन्द्रमिति चतुर्थी ग्रहाणां प्रैषः । होता यच्चदश्विनौ सरस्वतीं सुष्ठु रक्षितारमिन्द्रञ्च यच्चत् यजतु । होतारमुक्त्वाध्वर्यूनाह हे अध्वर्यवः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रेणअलङ्कृताः। शुक्राः शोचिष्मन्तः पयस्वन्तः पयसासंयुक्ताः अमृताः अमृतकल्पाः प्रस्थिताः होमाभिमुखीभूताः वः युष्मत्संबन्धेन। इत्यध्वर्युविषयम्। मधुश्चुतः मधुस्रवाः मधुक्षरणाः तानेतान्सोमान् अश्विनौचसरस्वतीच इन्द्रश्चसुत्रामा। साधुत्राणः ब्रह्महाजुषताम् जुषित्वाच। सोम्यंसोममयम्मधु पिबन्तुच मदन्तुच व्यन्तुच। त्वमपि हेमनुष्यहोतर्यज ॥४२॥ (१) होतायक्षदश्वि-

स्वतीन्द्रः सुत्रामाव्वृत्रहाजुषन्ताᳬसोम्यम्मधुपिबन्तुमदन्तुव्यन्तु होतुर्य्यजं ॥ ४२ ॥ होतायक्षदश्विनौक्षागंस्य ॥ हविषऽआत्तांम द्यमंद्यतोमेदऽउद्भृतम्पुराद्वेषोभ्यऽपुरापौरुषेय्यागृमोघस्तांन्नूनङ्कासे

नौक्षागस्य। प्रैषः। होतायजतु। अश्विनौक्षागस्य क्षागाङ्गस्यतावश्विनौक्षागसम्बन्धिनः हविषः आत्ताम्। अदभक्षणे। अभक्षयताम् भक्षितवन्तौ। अद्यअस्मिन्द्यवि। मध्यतोमेदउद्भृतम उदरमध्यतोवपालक्षणम्मेदः उद्भृतम् हृग्रहोर्भः क्रन्दसिहसेप्रतिभकारः। पुराद्वेषोभ्यः पूर्वमसुररक्षोभ्यः

(१) का० हविषामत्तरे यथालिङ्गम् चतुर्था प्रैषादग्रे पठ्यमाना होता यक्षदश्वि नौ क्षागस्य हविष इत्याद्यास्त्रयो यथालिङ्गमाश्विनादिहवियागाना प्रैषा इत्यर्थः

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यज्ञद्वेष्टृभ्योवा। पुराचपौरुषेय्यागृभः पुरुषार्थम् गृह्णतेइति पौरुषेयीगृप् तस्याः पौरुषेय्यागृभः दृडायादृत्यर्थः। नहिवपायागे दृडाविद्यते। यावेवम् वपाहविष आत्तान्ताविदानीम् घस्ताम्भक्षय-ताम् अङ्गानांस्वमंशभूतमितिशेषः विशेषणैर्विशेष्यसम्बाधाहारः। नूनन्निश्चयेन। किम्भूतानामङ्गा-नाम् घासेग्रासे अक्षाणाम् अवदात्तानाम् घासेयैरजित्तं खेक्षयाघासेवायान्यजराणिस्युः। यवसप्र-

ऽअंज्ज्राणांप्यवंसप्प्रथमानाꣳ सुमत्क्षंराणाꣳ शतरुद्रियांणामग्निन ष्ष्वात्तान्नाम्पीवोंपवसनानाम्माꣳस्पर्वतꣳश्रोणितꣳ शिंतामुत ऽउंत्साद्

थमानां यवसानामन्नानां यानिप्रथमानिमन्त्रैः संस्कृतत्त्वात्। एतद्वैपरममन्नाद्यं यन्मांसमितिश्रुतिः। सुमत्क्षराणाम् सुमत्स्वयमित्यर्थः। स्वयमेवयानिक्षरन्तिअदितानि। शतरुद्रियाणाम् बहुस्तु-तीनाम् रुद्रइतिहि स्तोत्रनामसुपठितम् रुद्रसम्बन्धिनोरिमारुद्रियास्तुतयः। बहुश्रोवारुद्राणाम् अग्निष्वात्तानाम् अग्निनासाधुपाकार्थमासादितानाम् अग्निनामुक्तानामित्यर्थः। पीवोपवसना नाम् पीवशब्दः स्थूलवचनः। पीवभिः स्थूलैरुपोषितंयैरवदानैः स्थूलानामुपवसनम् समीप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्थितिर्येषामिति वा । किञ्च । पार्श्वतःश्रोणितः शितामतउत्सादतः । अङ्गादङ्गादवत्तानाम् पार्श्वतोवत्तानाम पार्श्वंपरशुमयमङ्गभवति । श्रोणितोवत्तानाम् शितामतोवत्तानाम् । शितामशब्देन यकृद्वाशिताम् । योनिर्वाशिताम् मेदोवाशिताम्इतिव्याख्याभेदाः । उत्सादनप्रदेशात् छेदनप्रदे-

तोङ्गांदङ्गादवं त्तानाङ्करंतऽएवाश्विनांजुषेतांꣳहुविर्होतुर्य्यज॥४३॥
होतांयक्षत्सरंस्वतीम्मेषस्यंहुविषऽआवंयदद्यमंङ्गुतोमेदऽउद्भृतम्पु
राद्विषोंभ्यःपुरापौरुंषेय्यागृभोघसंन्नूनङ्कासेऽअंज्ज्राणांस्यवंसप्रथमा
नाꣳसुमत्क्षंराणाꣳशतरुद्रियांणामग्निष्वात्तानाम्पीवोंपवसना

शात् । अवत्तानाम् । एवमङ्गादङ्गादवत्तानाम् । करतएवाश्विनौहविर्मितिशेषः । जुषेताञ्च पुनर्वचनमादरार्थम् त्वमपि हेमनुष्यहोतर्य्यज ॥ ४३ ॥ होतायक्षत्सरस्वतीम्मेषस्य । होतायजतु सरस्वतीम् । याद्दविषआवयत् । आङ्पूर्वस्यवनेः खादनार्थस्य लिटिभूतार्थाभिधायिन्येतद्रूपम् । घसत्लो-

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

डर्थेलेट्। जुषतामेकवचनम् अन्यदुक्तम् ॥ ४४ ॥ होतायच्चादन्द्रमृषभस्य। तुल्यव्याख्यानम् ॥ ४५ ॥

नाम्पाश्प्रर्वतःश्रोणितःश्मिंतामुत ऽउंत्सादुतोङ्गादङ्गादवत्तानाङ्करंट्टे वऽसरंस्वतीजुषतांꣳहुविर्होतुर्य्यजं ॥ ४४ ॥ होतायच्चदिन्द्रंमृषुभ स्यंहुविषऽआवंयट्टद्यमंङ्घातोमेट्ऽउदृभृतम्पुराद्वेषोंभ्यःपुरापौरुषेय्या गृभोघसंन्नुनङ्घासेऽअंञ्जाणांय्यवंसप्प्रथमाना ꣳ सुमत्त्वंराणाꣳशत रुद्रियांणामग्निष्ष्वात्तानाम्पीवोपवसनानाम्पाश्प्रर्वतःश्रोणितःश्मिं तामुतऽउंत्सादुतोङ्गादङ्गादवत्तानाङ्करंट्टेवमिन्द्रोजुषतां ꣳ हुविर्होतु र्य्यजं ॥ ४५ ॥ होतांयच्चहनस्प्पतिंमभि ॥ हिपिष्टतंमयारभिष्टया

होतायच्चहनस्पतिम्। (१) वनस्पतिप्रैषः। होतायजतु वनस्पतिंयूपम्। अभिहिपिष्टतमयारभिष्ट-

(१) का० उत्तमौ वनस्पतिस्विष्टकृतोः। अन्ते पठ्यमानौ होता यच्चहनस्पतिमभि होता यच्चदग्निं स्विष्टकृतमिति क्रमेण वनस्पतियागे स्विष्टकृद्यागे च प्रैषौ। १८। १६। २५।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यारशनयाधित । कस्माद्वनस्पतिम् यजतु । हिशब्दोयस्मात्अर्थेयस्मात्अभ्यधित स्याघोरित्चेतिद-
धातेर्लुङ्इतिअभिधारितवान् । केनाभिधारितवान् । पिष्टशब्दोरूपवाची । पिष्टतमया । रभि-
ष्टयाच । आलब्धतमया । अतिशयेननियमकारिण्या । रशनयाजालभूतया । प्रार्थयामि

रशनयाधित ॥ यत्राश्विनोश्छागस्यहविषःप्रियाधामानियत्रसरं
स्वत्यामिषस्यंहविषःप्रियाधामानियत्रेन्द्रस्यऽऋषभस्यंहविषःप्रि
याधामानियत्राग्नेः प्रियाधामामियत्रसोमस्यप्रियाधामानियत्रे
न्द्रस्यसुत्राम्णःप्रियाधामानियत्रसवितुः प्रियाधामानियत्र वरुण
स्यप्रियाधामानियत्र वनस्पतेःप्रियापाथा ँ सियत्रदेवानामा

वनस्पतिम् । यत्रदेशेअश्विनोश्छागस्यच हविषश्चप्रियाप्रियाणिधामानि स्थानानि । यत्रसरस्वत्याः
यत्रेन्द्रस्य । एताःपशुदेवताः । अथाज्यभागौ । यत्राग्नेः यत्रसोमस्य । अथपशुपुरोडाशदेवताः

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यत्रेन्द्रस्यसुत्रामणः यत्रसवितुः यत्रवरुणस्य यत्रवनस्पतेः। प्रियापाथांसि। पाथःशब्दोन्नवचनः। वनस्पतिःपशोरिवाङ्गम्। अथप्रयाजानुयाजः। यत्रदेवानामाज्यपानाम्। अथस्विष्टकृत्। यत्राग्नेर्होतुः प्रियाणिस्थानानि। तत्रतेषुस्थानेषु एतान्पशून्। प्रस्तुत्येवप्रस्तुत्यच उपस्तुत्येव। अतिशयार्थंपुनर्वचनम्। उपावस्रक्षत्उपावसृजतु। रभीयसइवकृत्वी रभराभस्ये रभसाश्वपशून्कृत्वा

ज्यपानांम्प्रियाधामांनियत्राग्नेर्होतुःप्प्रियाधामांनितत्रैतान्प्रस्तुत्त्येप्रस्तुत्त्येवोपावस्रक्षद्भीयस ऽइवकृत्वीकरंदेवन्देवोव्वनस्प्पतिंज्जुषतांꣳहविर्होतुर्य्यजं॥४६॥ होतायक्षदग्निꣳस्विष्टकृतम्॥ होतायक्षदग्निꣳस्विष्टकृतमयांड्ग्निरग्निश्वनोस्क्कागंस्यहविषंःप्प्रिया

करत्करोतु। एवंदेवोवनस्पतिर्जुषताम् हविःत्वमपि हेमनुष्यहोतर्यज॥ ४६॥ होतायक्षदग्निं स्विष्टकृतम्। स्विष्टकृत्प्रेषः। दैव्योहोतायजतु। अग्निंस्विष्टकृतम्। कस्माद्धेतोरित्यतआह। अयाट् अघासीत्इष्टवान्एवमग्रेपि। योग्निः अश्विनोःक्कागस्यच हविषश्च प्रियाणिधामानि।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अयाट्सरस्वत्याःअयाट् इन्द्रस्य । प्रधानदेवताः । अयाट्अग्नेः अयाट्सोमस्य । आज्यभागौ अयाट् इन्द्रस्यसुत्राम्णः अयाट् सवितुः अयाट्वरुणस्य । पशुपुरोडाशदेवताः । अयाट्वनस्पतेः प्रियाणिपाथांस्यन्नानि । वनस्पतिः प्रधानाङ्गदेवता । अयाट्देवानाम् आज्यपानाम्

धामान्ययाट्सरस्वत्यामेषस्यर्ष्टविषः प्रियाधामान्ययाडिन्द्रस्य ऽ ऋषभस्यर्ष्टविषः प्रियाधामान्ययाड्अग्नेः प्रियाधामान्ययाट्सोमस्य प्रियाधामान्ययाडिन्द्रस्यसुत्राम्णः प्रियाधामान्ययाट्सवितुः प्रियाधामान्ययाड्वरुणस्य प्रियाधामान्ययाड्वनस्पतेः प्रियापाथा ऽ स्ययाड्देवानामाज्यपानाम्प्रियाधामानियच्चदग्नेर्होतुः प्रियाधामानियच्चत्स्वम्महिमानमायजतामेज्या ऽइषः कृणोतुसो ऽ

प्रयाजानुयाजाआज्यपाः । यच्चदग्नेर्होतुः यच्चत्इष्टवान् अग्नेर्होतुःस्विष्टकृतः स्वयमेवप्रियाणिधामानि । यच्चत्अयाचीत् । स्वम्महिमानम स्वकीयांविभूतिम् । किञ्च । आयजतामेज्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इषः । यजतामितिवचनव्यत्ययः । आदृजग्रा अभियष्टव्यायागार्हा इषःप्रजाः । इषान्नेनतासांस्थि-त्ति रुत्पत्तिश्चेति इषःप्रजाउक्ताः यागशीलायागार्हाः प्रजाभवन्तीत्यर्थः । कृणोतुकरोतुसः अध्वराअध्वरान्यज्ञान् जातवेदाःजुषताञ्चहविः । हेमनुष्यहोतः त्वमपियज ॥ ४७ ॥ (१) देवम्बर्हिः । एकादशानुयाजप्रैषाः अश्विसरस्वतीन्द्रदेवत्याः व्यवहितपदप्रायाः यत् देवम्बर्हिः सुदेवम् शोभनादेवा

अंदृङ्राजातवेंदाजुषतांञ्हुविर्होतुर्यजं ॥ ४७ ॥ [७] देवम्बर्हिः सरंस्वतीसुदेवमिन्द्रेंऽअश्विनां ॥ तेजोनचक्षुंरुर्व्योर्बर्हिषांदधुरिन्द्रियँव्वंसुवनेंव्वसुधेयंस्यव्यन्तुयजं ॥ ४८ ॥ देवीर्द्वारंः ॥ देवीर्द्वारों

अस्येतिसुदेवम् । तेनवर्हिषासरस्वती अश्विनौचइन्द्रे । तेजोन नकारःसमुच्चये । तेजश्चचक्षुश्च इन्द्रियश्च अक्ष्योःअक्ष्णोःदधुः । वसुवननायधनलाभाय । वसुधेयस्य धननिधानायच । व्यन्तु पिबन्तु अश्विसरस्वतीन्द्राः त्वमपियज । अथसमस्तार्थः । यद्देवंवर्हिः सुदेवंतेनवर्हिषासरस्वती

(१) का० अनुयाजप्रैषा देवं बर्हिरिति याज्याश्च । देवं बर्हिः सरस्वतीत्याद्या एकादश कण्डिकास्विषशोरनुयाजानां प्रैषा याज्याश्च भवन्तीत्यर्थः । १६ । ७ । ६ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अश्विनोचतेजश्चचक्षुः इन्द्रियञ्चदधुः । एवमग्रेपि ॥ ४८ ॥ देवीर्द्वारः । यादेव्यःयज्ञगृह- द्वारः ताभिःअश्विनोभिषजोच । सरस्वतीच प्राणञ्चनसिनासिकायाम् वीर्यञ्चइन्द्रियञ्च । द्वारः द्वार्भिरितिविभक्तिव्यत्ययः । इन्द्रे दधुः । वसुवनेइतिव्याख्यातम् ॥ ४९ ॥ देवीउषासौ । नक्तो-

अ० २१

ऽअश्विनाभिषजेन्द्रेसरस्वती ॥ प्राणन्नवीर्य्यन्नसिद्वारोदधुरिन्द्रि यँव्वसुवनेव्वसुधेयस्यव्यन्तुयजं ॥ ४९ ॥ देवीऽउषासौ ॥ देवीऽउषा सावश्विनासुत्चामेन्द्रेसरस्वती ॥ बलन्नवाचमास्यऽउषाभ्यान्दधु रिन्द्रियँव्वसुवनेव्वसुधेयस्यव्यन्तुयजं ॥५०॥ देवीजोष्ट्री ॥ देवीजोष्ट्री

षासावितिप्राप्ते छान्दसः प्रातिपदिकलोपः । यौदेव्यौनक्तोषासौ ताभ्याम अश्विनौसुत्चामाशोभन- त्राणौ सरस्वतीच । बलञ्चवाचञ्च आस्येमुखे । इन्द्रियञ्चइन्द्रे । उषाभ्यांनक्तोषाभ्यान्दधुः व्याख्यातमन्यत् ॥ ५० ॥ देवीजोष्ट्री । येदेव्यौजोषयित्र्यौ द्यावापृथिव्यौइतिवा । अहोरात्रे-

शिवम्

४६०

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इतिवा। शसाञ्चसमाचेतिकात्थक्यः। ताभ्याञ्चोष्ट्रीभ्याम् सरस्वतीचाश्विनौच इन्द्रम्अवर्द्धयन्। कथमवर्द्धयन्। श्रोत्रञ्चकर्णयोः यशश्च इन्द्रियञ्च इन्द्रे दधुः। वसुवनइति समञ्चसम्॥ ५१॥ देवीऊर्जाहुती। जोष्ट्र्यास्तुल्यदेवताविकल्पः। येदेव्यौ ऊर्जाहुती रसवती आहुतिराह्वानम्। दुघे-

सरंस्वत्युश्विनेन्द्रंमर्द्धयन्॥ श्रोत्रंन्नकर्णंयोर्य्यशोजोष्ट्रीभ्यान्दधुरि न्द्रियँवंसुवनेंवसुधेयंस्यव्यन्तुयजं॥ ५१॥ देवी ऽ ऊर्ज्जाहुंती॥ देवीऽऊर्ज्जाहुंतीदघेंसुदघेन्द्रेसरंस्वत्युश्विनाभिषजांवतऽ॥ शुक्रंन्नज्योतिस्तनंयोराहुंतीधत्त ऽइन्द्रियँवंसुवनेंवसुधेयंस्यव्यन्तुय

दुग्धे सुदुघेसुदोहने। उपरितनेर्द्धर्चे आहुतीशब्दः श्रूयते सइहकृतविभक्तिव्यत्ययः समर्थीक्रियते। ताभ्यामाहुतीभ्याम् सरस्वतीच अश्विनौच भिषजौअवतःअवन्तीतिवचनव्यत्ययः। इन्द्रमितिशेषः। कथंकृत्वा। शुक्रञ्चज्योतिश्च पयोलक्षणम् स्तनयोःइन्द्रियञ्च इन्द्रे धत्तइतिविभक्तिव्यत्ययः दधुः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वसुवनेइति व्याख्यातम् ॥ ५२ ॥ देवादेवानाम्। योदेवौहोतारौ देवानाम्भिषजौ ताभ्यां-
होत्रभ्यांवषट्कारैश्च। अश्विनौचसरस्वतीच इंद्रमिंद्रेइतिविभक्तिव्यत्ययः। इंद्रियञ्च त्विषि-
न्दीप्तिञ्च हृदयेमतिञ्चदधुः। वसुवनेइति समञ्जसम् ॥ ५३ ॥ देवीस्तिस्रः। यादेव्य स्तिस्रः

जं॥ ५२॥ देवादेवानांम् ॥ देवादेवानांम्भिषजाहोतांराविन्द्रंमश्विव
नां ॥ व्वषुट्कारैःसरंस्वतीत्त्विषिन्नहृदंयेमतिंहोतृंभ्यान्दधुरिन्द्रि
यंव्वंसुवनेंव्वसुधेयंस्यव्व्यन्तुयजं ॥ ५३ ॥ देवीस्तिस्रः ॥ देवीस्ति
स्रस्तिस्रोदेवीरश्विनेडासरंस्वती ॥ शूषन्नमद्भ्योनाभ्यांमिन्द्रांयद
धुरिन्द्रियंव्वंसुवनेंव्वसुधेयंस्यव्व्यन्तुयजं ॥ ५४ ॥ देवऽइन्द्रः ॥ देव

सरस्वतीडाभारत्यः तिस्रोदेवीः अचविभक्तिव्यत्ययोध्याहारश्च वाक्यवशात्। तिसृभिर्देवीभिः-
सरस्वतीडाभारतीभिः। अश्विनौचइडाचसरस्वतीच। शूषंवलञ्च मध्येनाभ्याम् इन्द्रियञ्च। इन्द्रा-
यइन्द्रे इतिविभक्तिव्यत्ययः। दधुः। वसुवनेइति समानम् ॥ ५४ ॥ देवइन्द्रः। योदेवःइन्द्रः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इदिपरमैश्वर्ये। परमैश्वर्ययुक्तः। नराशंसः नराश्मिन्नासीनाःशंसन्तीतिनराशंसः त्विवरूथ.त्वि गृहः सदोहविर्द्धानाग्नीध्रेः। त्रिलोक्यावात्रिगृहः। यस्यच सरस्वत्याश्विभ्याञ्चईयतेउच्चतेनी-यतेरथः। सयज्ञः। रेत.न रेतश्चअमृतञ्चरूपञ्च जनित्रञ्जन्मच। इन्द्रायइन्द्रे इन्द्रस्यवेति-विभक्तिव्यत्ययः। कथंभूतोयज्ञः। त्वष्टात्वचतिः करोत्यर्थः। जगतःकर्ता। दधत्दधातु इन्द्रि-

ऽइन्द्रोनराग्रऽसंस्त्विवरूथ्ऽसरंस्वत्याश्विभ्व्यांमीयतेरथंः॥ रेतोनरू पमृतंञ्जुनित्वमिन्द्रांयुत्वष्टादधंदिन्द्रियाणिंव्वसुवनेंव्वसुधेयंस्यव्व्य न्तुयजं॥ ५५॥ देवोदेवैः॥ देवोदेवैर्व्वनस्पतिर्हिरंण्यपर्णोऽअ श्विभ्व्याऽसरंस्वत्यासुपिप्पुलऽइन्द्रांयपच्यतेमधुं॥ ओजोनजूति

याणिच। वसुवनइति व्याख्यातम् ॥ ५५॥ देवोदेवैः। योदेवोवनस्पतिर्यूपः। देवैर्हिरण्यपर्णः यस्यदेवाहिरण्मयानिपर्णानि। रूपकोत्रालङ्कारः। यश्च अश्विभ्यांसरस्वत्याच सुपिप्पलः। अश्वि-नौसरस्वतीच यस्यवनस्पतेः फलानीत्यर्थः। इन्द्रायइन्द्रार्थञ्च यः पच्यतेफलतिमधुमधुराणिफलानि। सवनस्पतिः ऋषभःऋषभशब्दः पूजावचनः। पूज्यः। जूतिः। जूतिर्जवतेः। वेगवान्। ओज-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्वभामञ्च भामशब्दःक्रोधवचनः इन्द्रियाणिच नःअस्माकम् अस्मदोद्वयोश्चेतिवहुवचनम् दधत्-दधातु। वसुवनेइतिव्याख्यातम् ॥ ५६ ॥ देवम्बर्हिः। यस्माद्देवम्बर्हिः वारितीनाम्उदकवती-नांवा वारिप्रभवानांवा वरतराणाम्वाओषधीनांसम्बन्धि। अध्वरेस्तीर्णम् अश्विभ्यामध्वर्युभ्याम् ऊर्णम्रदाः ऊर्णेवमृदु। सरस्वत्याच। स्तीर्णमित्यनुवर्तते। तस्मात् स्योनंसुखरूपम् हेइन्द्र

ऋ॒ष॒भोन॑भामु॒व॒नस्प॑तिन्नी॒दध॑दिन्द्रि॒याणि॑व॒सु॒वने॑व॒सु॒धेय॑स्यव्य॒न्तुय॑ज ॥ ५६ ॥ दे॒व॒म्ब॒र्हिः ॥ दे॒व॒म्ब॒र्हिर्वा॒रि॒तीना॑मद्ध्व॒रेस्ती॒र्णम॒श्वि॒भ्या॒मू॒र्णम्र॑दाऽसर॒स्व॒त्यास्यो॒न॒मि॑न्द्रते॒सद॑ः ॥ ई॒शा॒यै॒म॒न्यु॒ꣳरा॒जा॒न॒म्ब॒र्हि॒षा॒द॒धु॒रि॒न्द्रि॒य॒ꣳव॒सु॒वने॑व॒सु॒धेय॑स्यव्यन्तुयज ॥ ५७ ॥ दे॒वी

तवसदःस्थानम्। किञ्च तस्मिन्सदसि। ईशायैईशिताय रैश्वर्यायमन्युंक्रोधम् त्वंराजानम् इन्द्रियञ्च अश्विनौचसरस्वतीचवर्हिषादधुः। यद्वा ईशानायतवमन्युंराजानमिन्द्रियञ्च। अश्वि-नौसरस्वतीच हविषादधुः। वसुवन इति व्याख्यानम् ॥ ५७ ॥ देवोअग्निः। योदेवोअग्निः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्विष्टकृत् शोभनमिष्टंकर्तव्यमित्यय मधिकारोयस्य सतथोक्तः। देवान् यच्चत् इष्टवान्। यथा-यथम्। यथा स्वंयथायथम् योयथायष्टव्यः सतथेत्यर्थ.। एवंसामान्यत उक्त्वाअथेदानीं विशे-षतआह। होतारो अयज्वाग्निरसौच मध्यमोवायुः। होत्रमित्रावरुणौवा। इन्द्रश्च अश्विनौ च वाचकृत्वा वाचञ्चसरस्वतीञ्च अग्निञ्च सोमञ्च यच्चदितिसम्बन्धः। स्विष्टकृच्चस्विष्टः शोभनमिष्टः

ऽअग्निꣳस्विꣳष्टकृदिहवान्यंच्चद्यथायुथꣳहोतारविन्द्रमुश्विभवनांव्वाचा व्वाचꣳसरंस्वतीमुग्निꣳसोमंꣳस्विष्टकृत्स्विंष्टऽइन्द्रः सुत्रामांसविता व्वरुंणोभिषगिष्टोदेवोव्वनस्पतिꣳ स्विष्टादेवा ऽआज्यपाꣳस्विंष्टो ऽअग्निरुग्निनाहोताहोत्रेस्विंष्टकृद्यशोनधंदिन्द्रियमूर्ज्जमपंचिति

इन्द्रः सुत्रामाच इष्टःसविता इष्टःवरुणोभिषक् इष्टश्चदेवोवस्पतिः। स्विष्टादेवा आज्यपाः प्रया-जानुयाजाः इष्टश्चाग्निरग्निना। अथेदानीं होता स्वष्टकृत् होत्रेमानुषाय। यशोनदधत्। ददात्यर्थेदधातिः। ददातु। इन्द्रियञ्च ऊर्जञ्च अपचितिम्पूजाञ्च स्वधामन्नञ्च। वसुवनेइति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्याख्यातम् ॥ ५८ ॥ अग्निमद्य । सूक्तवाकप्रैषः । (१) अग्निम् अद्यअस्मिन्यवि होतारम् अवृणीत अवृतवानयं यजमानः । किंकुर्वन् पचन् पत्नीः पक्तव्यानि वसूनिइतिसामान्यवचनम् । अथविशेषः पचन् पुरोडाशान् पशुपुरोडाशान् । वध्नन् पशुंयूपेइतिशेषः । अश्वि-

ॐस्वधाँव्वंसुवनेंव्वसुधेयंस्यव्यन्तुयजं ॥ ५८ ॥ अग्निमुद्यहोतारमवृणीतायंय्यजमानꣳ पचन्पक्त्रीꣳपचंन्पुरोडाशान्न्बध्नन्नुश्विभ्याच्छागꣳ सरंस्वत्यैमेषमिन्द्रांयऽऋषभꣳ सुन्वन्नुश्विभ्याꣳसरंस्वत्याऽइन्द्रांयसुत्वाम्णेंसुरासोमान्त्संप्रस्थाऽअद्य ॥ ५९ ॥ सुप्रस्थाभ्यांछागम् अश्विनोरर्थेछागम् सरस्वत्यैमेषम् । इन्द्रायचऋषभम् । अन्यच्चसुन्वन् अश्विभ्यांसरस्वत्यैचइन्द्रायचसुत्वाम्णेसुरासोमान् । तानिचवसूनिक्रतीन्ययजमानः । अग्निहोतारमवृणीतेति-

(१) का० अग्निमद्येति सूक्तवाकप्रैषः । अग्निमद्य होतारमित्यादिः सूक्ता ब्रूहीत्यन्तः कण्डिकात्रयात्मकः सूक्तवाके प्रैषो भवति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सम्बन्धः ॥ ५९ ॥ सूपस्थाअद्य । साधुयज्ञमुपतिष्ठति इतिसूपस्थाः अद्यअस्मिन्यविदेवःवनस्पतिः अभवत् । अस्विभ्यां छागेन सरस्वत्यैचमेषेण इन्द्रायचऋषभेण । कथमेवमवगम्यत इत्यतआह । अत्तन्तान्भक्षितवन्तः अश्विप्रभृतयः तान्छागादीन् । कुतआरभ्येत्याह । मेदस्तः वपाया-

ऽअद्यदेवोव्वनस्पतिरभवद्भिश्विभ्याञ्छागेनसरस्वत्यैमेषेणेन्द्रायऽऋषभेणाचुँस्तान्मेदुस्त ऽप्रतिपचुताग्ंभीषुतावीवृधन्तपुरोडाशैरपुंर्भिश्विनासरस्वतीन्द्रं ÷ सुत्वामांसुरासोमाँस्त्वामद्य ॥ ६० ॥ त्वामद्य

* ऽऋंषऽआर्षेयऽऋषीणान्नपादवृणीतायंय्यजंमानोबृहुभ्युऽआसङ्गं

आरभ्य । प्रतिपचताग्ंभीषत । प्रत्यग्रभीषत प्रतिगृहीतवन्तः । पचतापक्वानि अग्निपक्वानि अवदानानि । अवीवृधन्तच पुरोडाशैः । किञ्च । अपुःपीतवन्तः अश्विनौचसरस्वतीच इन्द्र-श्चसुत्वामा । सुरासोमान् सुराचसोमाश्च । यद्वा सुरामयान्सोमान् ॥ ६० ॥ त्वामद्य । देव्यो-

* ऋषऽआर्षेयऋ षीणान्नपाद वृणीतेति समुदायस्यप्रचयन्तु अनेकमपीतिकात्यायनसूत्रेषभवति अस्यार्थः स्वरितादच

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

होताग्निरुच्यते। त्वाम् अद्य हेऋषे मन्त्राणांद्रष्टः हेआर्षेय यजमानआर्षेयैर्व्रियते इत्येवंसं-
वोध्यते। हेऋषीणामृत्त्विजान्नपात्पुत्र अवृणीतवृतवान् अयंयजमानः। वहुभ्योदेवेभ्यः आस-
ङ्गतेभ्यः त्वामेव अवृणीतेत्यभिप्रायः। किमर्थम् एषःमेमह्यम् देवेषुवसुधनम् वारिवरणीयम्

तेभ्य ऽएषमेदेवेषुवसुवार्य्यायच्यत ऽइतितायादेवादेवदानान्यदु
स्तान्यस्मा ऽआचु * शास्त्वाचगुरस्वेषितश्चहोतुरसिभद्रवाच्यायु

आयच्यतेआदास्यति अयन्दातुंसमर्थइति। एवञ्च। तायादेवदानान्यदुः। ता तानि। या यानि।
हेदेवयानि देवादानानि अदुःदत्तवन्तः। इमानि अस्मैयजमानाय दातव्यानीति। तानि-
अस्मैयजमानाय। आचशास्त्वाच गुरुत्व। आकारौभिन्नक्रमौ। आशास्त्वच इच्छा। आगुरुत्वच

रात्परत्वञ्चनत्यवहितंपदमनुदात्तमचरमेकमनेकंवातत्सर्वमुदात्तमयमवति उदात्तमयः प्रचयापरपर्यायः कुतः इयंशङ्कास्वरिता-
त्परमनुदात्तमुदात्तमयम् इत्यत्रस्वरिता दितिपञ्चम्यन्तस्यश्रवणात्।

* शास्त्वरास्त्वेत्यत्रैवहिसकारो भवतिनान्यत्रकुतः हिसकाठे०शास्त्वरास्त्वेति अस्यार्थः हीसकारो अस्मिन्पदद्वयइति
हिसकारम्पदद्वयम् इतिकात्यानेनोक्तत्वात् प्रा० अ० ४। सू० १८५।

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गुरीउद्यमने। उद्यच्छच। दानाय। प्रेषितश्चासि हेहोतः। भद्रवाच्याय। भन्दनीयवचनाय भद्रञ्चवचनम् त्वं ब्रूयाइति। अथेदानीं प्रेषितोमानुषो होतासूक्तवाकाय। कथंकृत्वासूक्ताब्रूहि। सूक्तानिसाधुवचनानि वदइति ॥ ६१ ॥ समाप्ता सोत्तामणी।

इति उव्वटकृतौ मन्त्रभाष्ये एकविंशतितमोध्यायः २१ ॥

प्रेषितोमानुषःसूक्तवाकायसूक्ताब्रूहि ॥ ६१ ॥ इतिवाजसनेय संहितायांएकविंशोऽध्यायः २१ ॥

* तेजोसिशुक्रममृतमायुष्पाऽआयुर्म्मेपाहि ॥ देवस्यत्त्वासवितुः

(१) अथाश्वमेधश्चतुर्भिरध्यायैः तंप्रजापतिरपश्यत्। तेजोसि। सौवर्णम् निष्कम् प्रतिमुञ्च

(१) सर्वकामस्य राज्ञोऽश्वमेधः तस्य फाल्गुनशुक्लाष्टम्यामारम्भः। का० निष्कं प्रतिमुञ्चन् वाचयति तेजोऽसीति। २०। १।९। चतुःसुवर्णनिर्मित आभरणविशेषो निष्कः तंयजमानकण्ठे प्रतिबध्नन्नध्वर्युस्तेजोऽसीति मन्त्रं पाहीत्यन्तं वाचयति च निष्कं प्रातर्होमान्ते पूर्णाहुतिं कृत्वाध्वर्यवेदद्यादिति सूत्रार्थः।

* तेजोसिपञ्चाग्नयएकाहिङ्कारायहेतत्सवितुर्हशविभूर्मात्रेकाकायहे आग्नह्न ँस्त्रयोदशशेषादेकैकोनविंठ०शतिश्चतुस्त्रिंठ०शत्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्वाचयति। यस्मात्तेजस्त्वमसि शुक्रञ्चाग्नेः। अग्निर्हवा अपोभिदध्याविद्युपक्रम्यतामुरेतःप्रासिञ्चत्तद्धिरण्यमभवदितिश्रुतिः। अमृतञ्च अग्निप्रभवत्वात्दानेनामृतत्व प्रदानाच्च। हिरण्यदा अमृतत्वं भजन्तेइतिश्रुतिः। आयुषश्चपातागोपायिता। अतः त्वां प्रार्थये। आयुः मेममपाहि। यज्ञसमाप्त्यर्थमायुः प्रार्थ्यते। रशनामादत्ते। (१) देवस्यत्वेतिव्याख्यातम् ॥ १ ॥ इमाम-

प्रसुवेऽश्विनोर्बाहुभ्यांम्पूष्णोहस्ताभ्यामादंदे ॥ १॥ इमामगृभ्णन् ॥ इमामगृभ्णन्रशनामृतस्यपूर्व्वऽआयुषिविदथेषुकव्या ॥ सा

गृभ्णन्। चिष्टुरशनादेवत्या। यामिमामग्रभ्णन् गृहीतवन्तःरशनान्दर्भमयीम्। ऋतस्य यज्ञस्य पूर्वेप्रथमे आयुषि यज्ञारम्भेइत्यर्थः। केरशनामगृह्णन्नित्यतआह। विदथेषुकव्या यज्ञेषुकवयः। विश्वस्रष्टारोवा आद्येसर्गेप्रजापति प्रभृतयः। एतेहिसृष्टियज्ञादसृजन्त। सारशनानःअस्माकम्

(१) का० देवस्य त्वेति रशनामादाय ब्रह्मन्नश्वं भनत्स्यामीतग्राह। २०। १। २७। देवस्यत्वेतगादि-सरमारपन्तीतान्तेन मन्त्रेण त्रयो दशरत्निदर्भमयीं द्विगुणामश्वबन्धनार्थां रशनां रज्जुमादाय ब्रह्मन्नश्वंभनत्स्यामीतगादि-तेन-राध्यासमितान्तं मन्त्रं ब्रह्माणंप्रतिग्राहेति सूत्रार्थः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अस्मिन्सुतेयज्ञे आबभूव अभूताउत्पन्ना । ऋतस्यसामन् । संमननेयज्ञप्रारम्भे । सरंयज्ञप्रसरम् आरपन्तीशब्दायमाना ॥२॥ (१) वध्नात्यश्वम् । अभिधासि । यस्त्वम् अभिधत्ताअसिअभिधातव्योसि । भुवनज्ञासि । भुवनमाश्रयः । यन्तानिमनकर्ताचासि । धर्ताधरयिताचासि । सत्वमेवं प्रभावःसन् ।

नोऽअस्मिन्त्सुतेऽआबभूवऽऋतस्यसामन्त्सरमारपन्ती ॥ २ ॥ अभिधाऽअसि ॥ अभिधाऽअसिभुवनमसियन्तासिधर्त्ता ॥ सत्त्वमग्निंवैश्वानरꣳसप्रथसङ्गच्छस्वाहाकृतꣳ ॥३॥ स्वगात्वा ॥ देवेभ्यःप्रजापतयेब्रह्मन्नश्वंभन्त्स्यामिदेवेभ्यःप्रजापतयेतेनराद्धासम् ॥ त

अग्निंवैश्वानरम् । कथंभूतम् सप्रथसम् सर्वतःपृथुम् । तिर्यगूर्द्ध्वमधश्चैवमहतैश्वर्येण पृथुम् । गच्छ । स्वाहाकृतः साधुहुतश्चसन् ॥ ३ ॥ स्वगात्वा । हेअश्वस्वगाकरोमित्वां देवेभ्यः प्रजापतयेच । स्वगाशब्दोडाजन्तः स्वयङ्गामिनमित्यर्थः । ब्रह्माणमामन्त्रयते । ब्रह्मन्नश्वम्भन्त्स्यामि । वध्नातेरे-

(१) का० तं बधानेनि ब्रह्मानुज्ञातोऽभिधा असीति बध्नात्यश्वम् । तं बधान देवेभ्यः प्रजापतये तेन राध्नुहीति मन्त्रेण ब्रह्मणानुज्ञातोऽध्वर्युरभिधा असीत्यादि-स्वगात्वा-देवेभ्यः-प्रजापतय इत्यन्तेन मन्त्रेण रशनयाश्वं बध्नाति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तद्रूपम्अश्वस्यवन्धनं करिष्यामि। देवेभ्यः प्रजापतयेच। तेनवद्धेनाहं राध्यासम्राधिंप्राप्नुयाम्। राधिःकर्मपरिसमाप्तिः। ब्रह्मात्रसौति। तम्बधान। यमिच्छसितमश्वम्बधान तस्यवन्धनङ्कुरु। किमर्थम् देवेभ्यः प्रजापतयेच। तेनवन्धेनराध्नुहि। यज्ञसमाप्तिंप्राप्नुहीत्यर्थः ॥ ४ ॥ (१) प्रोक्ष-

म्बंधानदेवेब्भ्यंःप्रजापंतयेतेनंराध्नुहि ॥४॥ प्रजापंतयेत्वा ॥ प्रजापं तयेत्वाजुष्टम्प्रोक्षांमीन्द्राग्निब्भ्यान्त्वाजुष्टम्प्रोक्षांमिब्रायवेंत्वाजुष्ट म्प्रोक्षांमिव्विश्वेंब्भ्यस्त्वादेवेब्भ्योजुष्टम्प्रोक्षांमिसर्व्वेंभ्यस्त्वादेवेभ्योजु ष्टम्प्रोक्षांमि ॥ योऽअर्व्वन्तञ्जिघांसंतितमुब्भ्यूमीतिव्वरुंणः ॥ प्र

त्यश्वम्। प्रजापतयेत्वा जुष्टम्प्रोक्षामीति। ऋत्विजःप्रोक्षणमन्त्राः। यजमानवाचयति। योअ-र्वन्तम्। गायत्री। अर्द्वेनाश्वस्तुतिः। यःपुरुषोर्वन्तम् अश्ववचनोर्वशब्दः। अश्वञ्जिघांसति हन्तु-

(१) का० स्थावरा अपो गत्वा प्रजापतये त्वेति प्रोक्षताश्वं प्रतिमन्त्रम्। ततोऽध्वर्युः स्थावरास्तडागादिस्था अपो गत्वा ताभिरद्भिः पञ्चमन्त्रैः प्रतिमन्त्रमश्वं प्रोक्षति।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिच्छति । तम्अभ्यमीति । मीहिंसायाम् हिनस्तिवरुणः । श्वानञ्चतुरक्षम् हत्वाऽधस्पदमश्वस्यो पन्नाबर्यति । "यस्यशुनश्चचुषोःसमीपे पुरुडेलःसचतुरक्ष उच्यते" परोमर्तः । परःपराभूतः अध-

रोमर्त्तःपुरुष्टश्वा ॥ ५ ॥ [५] अग्नयेस्वाहा ॥ अग्नयेस्वाहासोमायु स्वाहापाम्मोदायुस्वाहासवित्रेस्वाहाव्यायवेस्वाहाविष्णवेस्वाहेन्द्रा युस्वाहाबृहस्पतयेस्वाहामित्रायुस्वाहाव्वरुणायुस्वाहा ॥ ६ ॥ [१] हिङ्कारायुस्वाहा ॥ हिङ्कारायुस्वाहाहिङ्कृतायुस्वाहाक्रन्दतेस्वाहाव क्रुन्दायुस्वाहाप्प्रोथतेस्वाहाप्प्रप्प्रोथायुस्वाहागुन्धायुस्वाहाग्घ्राताय

स्पदब्रीतः मर्तोमनुष्यः योऽर्वन्तञ्जिघांसतीति । परःपराभूतश्चश्वा ॥ ५ ॥ दशाश्वस्तोमीयानि-जुहोति । अग्नयेस्वाहेति ऋजवोमन्त्राः ॥ ६ ॥ अश्वस्यरूपाणि जुहोति । (१) हिङ्कारायस्वाहेति ।

(१) हिङ्करणं हिङ्कारस्तस्मै । हिङ्कृताय कृतंयद्धिङ्कृतं तस्मै । क्रन्दतीति क्रन्दन् । अव नीचैः क्रन्दतीत्यवक्रन्दः । प्रोथतीति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एकोनपञ्चाशत् । अश्वस्यचेष्टितानि क्रियाश्चाचाभिधीयन्ते ॥ ७ ॥ यतेस्वाहा एतीतियन् तस्मै

स्वाहानिविष्टायुस्वाहोपविष्टायुस्वाहासन्दितायुस्वाहाव्रल्गंतेस्वा
हासीनायुस्वाहाशयानायुस्वाहास्वपंतेस्वाहाजाग्रंतेस्वाहाकूजंते
स्वाहाप्रबुद्धायुस्वाहाव्विजृम्भमाणायुस्वाहाव्विचृत्तायुस्वाहासꣳहा
नायुस्वाहोपस्थितायुस्वाहायंनायुस्वाहाप्प्रायंणायुस्वाहा॥७॥ युते
स्वाहा॥ * युतेस्वाहाधावंतेस्वाहोद्द्रावायुस्वाहोद्द्रुतायुस्वाहाशूकु

प्रोथन् प्रोथृ पर्यापणे । प्रक्रष्टः प्रोथो घोणायस्य घोणा तु प्रोथमस्त्रियाम् । गन्धोऽस्यास्ति गन्धः । घ्रातमाघ्राणमस्यास्ति घ्रातः । निविशते निविष्टः । उपविशतीत्युपविष्टः । सम्यक् दितं लूनं खण्डनं यस्य स संदितः । वल्गतीति वल्गन् । आस्तेऽसावासीनः । शेतेऽसौ शयानः । स्वपिति स्वपन् । जाग्रतीति जाग्रत् । कूजतीति कूजन् । प्रकर्षेण बुध्यते प्रबुद्धः । विजृम्भते विजृम्भमाणः । चृतीदोसौ विशेषेण चर्त्तति विचृतः । संहानाय सङ्गतशरीराय । उपतिष्ठते उपस्थितः । अयतेऽयनः । प्रक्रष्टमयते प्रायणः तस्मै स्वाहा ।

* धावतीति धावन् । उत् अधिको द्रावो गतिर्यस्य स उद्द्रावः । उत् अधिकं द्रुतं यस्य स उद्द्रुतः । शूद्रति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यते स्पष्टमन्यत् ॥ ८ ॥ अथ सावित्रीणामिष्टीनाम् । तत्सवितुरित्यादिकाः षट्याज्यानुवाक्याः रायुस्वाहाशूक्रंतायुस्वाहानिषद्यायुस्वाहोत्थितायुस्वाहाजुवायुस्वाहाबलायुस्वाहाविवर्तमानायुस्वाहाविवृत्तायुस्वाहाविधून्वानायुस्वाहाविधूतायुस्वाहाशुश्रूषमाणायुस्वाहाशृण्वतेस्वाहेक्षमाणायुस्वाहेक्षितायुस्वाहाऽवीक्षितायुस्वाहानिमेषायुस्वाहायदत्तितस्मैस्वाहायत्पिबंतितस्मैस्वाहायन्मूत्रंङ्करोतितस्मैस्वाहाकुर्वतेस्वाहाकृतायुस्वाहा ॥ ८ ॥ [२] तत्सवितुः ॥ तत्सवितुर्व्वरेण्यम्भ

करोतीति शूकारः । शूक्रतमस्यास्ति शूक्रतः । निषीदति निषीदन् । उत्तिष्ठते उत्थितः । जवते जवो वेगवान् । बलमस्यास्ति वलः । विवर्तते स विवर्तमानः । विवर्ततेस्मविवृत्तः । विधूनुते कम्पते स विधून्वानः । विधूयतेऽसौ विधूतः । श्रोतुमिच्छति शुश्रूषमाणः शुश्रुस्मृदृशां सन इति शानन् । शृणोति शृण्वन् ईक्षते स इक्षमाणः । इक्षते स्मेति ईक्षितः । विशेषेणेक्षितो वीक्षितः । निमिषति निमेषः । यत् किञ्चित् अत्ति तस्मै । यत् जलादिकं पिबति तस्मैपानकर्त्रे । यन्मूत्रं करोति तस्मै मूत्रयते । करोति कुर्वन् । कृतमस्यास्ति कृतः । तस्मै स्वाहेति सर्वत्र ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सावित्र्योगायत्र्यः । आद्याव्याख्याता ॥ ९ ॥ हिरण्यपाणिमूतये हिरण्मयौपाणीयस्य सहिरण्यपाणिःतम् ऊतये अवनायसवितारम् उपह्वयेआह्वायामि । किमिति । यतः सः सविता चेत्तासर्वार्थदृक् । महतीचदेवता पदंचस्थानं च ज्ञानकर्मसमुच्चयकारिणाम् ॥ १० ॥ देवस्यचेतनः । देव-

र्गोंदेवस्यधीमहि ॥ धियोयोनःप्रचोदयात् ॥ ९ ॥ हिरंण्यपाणि मूतयें ॥ सवितारमुपह्वये ॥ सचेत्तांदेवतांपदम् ॥ १० ॥ देवस्यचेतं तः ॥ देवस्यचेतंतोमहोम्प्रसंवितुर्हवामहे ॥ सुमतिꣳसत्यराधसम् ॥ ११ ॥ सुष्टुतिꣳसुमतीवृधः ॥ सुष्टुतिꣳसुमतीवृधोरातिꣳसंवितुरीं

स्यदानादिगुणयुक्तस्य च ततः विराजमानस्य महीम्महतीम् प्रहवामहे आह्वयामि सवितुः संबन्धिनीं सुमतिङ्कल्याणींमतिम् । किंभूतांमतिम् सत्यराधसम् अनश्वरधनाम् सत्यसाधयित्रींवा ॥ ११ ॥ सुष्टुतिर्ठ० सुमतीवृधः । सुष्टुतिंशोभनांस्तुतिम् सुमतीवृधः शोभनांमतिंवर्द्धयतीति सुमतीवृत्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्यसुमतौयज्ञधः सम्बन्धिनीरातिंदानंच सवितुः ईमहेयाचेम। प्रदेवायमतीविदे देवस्यमतीविद॰ इत्युभयोः पदयोः विभक्तिव्यत्ययः ॥ १२ ॥ रातिंसत्पतिम्। रादाने। रातिनिमित्तत्वाद्रातिशब्देन सवितैवोक्तः। रातिदानरूपम् यद्वाराति ददातीतिरातिम्। सत्पतिं सतांपालयितारम् महे-पूजयामि। सवितारम् उपह्वये। आह्वयामि च। आसवम्। आभिमुख्येप्रसौति कर्माणीत्यासवः

मह्हे ॥ प्रदेवायंमतीविदे ॥१२॥ रातिꣳसत्त्पंतिम् ॥ रातिꣳसत्त्पंतिम्मु हेसंवितारमुपंह्वये ॥ आसुवन्देववीतये ॥ १३ ॥ देवस्य॑सवितुर्म्मति मांसुवंव्विश्वदेंव्यम् ॥ धियाभगंम्मनामहे ॥ १४ ॥ अग्निꣳस्तोमें

तमासवंसवितारम्। किमर्थं पूजयाम्याह्वयामिच। देववीतये देवतर्पणाय ॥ १३ ॥ देवस्यसवितुः। मतिम् आसवम् प्रसवरूपाम्। विश्वदेव्यं सर्वेभ्योदेवेभ्योहितम्। धियास्वकीयया प्रज्ञया भगंभजनीयं धनम् मनामहे याचामि। द्विकर्माचायंधातुः तेनमतिशब्दे भगशब्देचद्वितीया ॥ १४ ॥ अग्निंस्तोमेन। तिस्रआग्नेय्योगारत्र्यः। हेअध्वर्यो अग्निंस्तोमेन स्तुतिभिः बोधय अवगतार्थङ्कुरु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

किंकुर्वन् समिधानः संदीपयन्। कथंभूतमग्निम् अमर्त्यम् अमरणधर्माणम् किमर्थंपुरस्कृत्येति-चेत्। हव्याहवींषिदेवेषु नः अस्मत्संबन्धीनि दधत् दधातु। सहस्याधिकारइति ॥ १५ ॥ सह-व्यवाट्। यदोताध्याहारः तच्छब्दश्रवणात्। यः हव्यवाट् हविषोवोढा अमर्त्यः अमरण-धर्मा उशिक् मेधावी। दूतः देवानाम्। चनोहितः। चनइत्यन्ननाम। हविर्भूतस्यान्नस्य-

न ॥ बोधयसमिधानोऽअमर्त्यम् ॥ हुव्यादेवेषुनोदधत् ॥ १५ ॥ स हव्यवाट्॥ सहव्यवाडमर्त्यऽउशिग्दूतश्चनोहितः ॥ अग्निर्द्विया समृणवति ॥१६॥ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे ॥ देवाँ२ ॥ ऽआसादयादिह ॥ १७ ॥ अजीजनोहिपवमानमूर्यँविधारेशवसंनुा

भक्षणार्थं निहितः। सः अग्निः धियाप्रज्ञया समृणवति संगच्छते देवैःसह हविषः तर्पणाय ॥ १६ ॥ अग्निन्दूतम्। यम्अग्निमदूतं देवानांदूतम् अहंपुरोदधे अग्रतः स्थापयामि हव्य-वाहम् हविषोवोढारम् तम् उपगम्यब्रुवेब्रवीमि। किंब्रवीमितदाह। देवानासादयादिह। हेअग्नेदेवान् आसादत् आसादय इह अस्मिन्यज्ञे गृहेयागाय ॥ १७ ॥ अजीजनोहि।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पावमानीसौमीविकृतिः अनुष्टुप् । यस्मात् अजीजनः जनितवानसि जनयसिवा हेपवमान सोमसूर्यम् । यस्माच्च शक्मनाचर्मणा पयः अपः विधारे उपरिष्टात्विधारयसि । केनहेतुना गोजीरया जीवेरेतद्रूपम् गोजीविकयाहेतुभूतया । कथंनुनामगावोजीवेयुरिति । गोभिर्हि-यज्ञस्तायते प्राणिनश्चजीवन्तीति ॥ किंकुर्वन् । रंहमाणः पुरंध्या ॥ रंहमाणः गच्छन्

पर्यः ॥ गोजीरयारꣳहमाणꣳपुरंध्या ॥ १८ ॥ [९] विभूर्म्मात्वा ॥ प्रभूꣳपित्वाश्वोसि हयोस्यत्योसि मयोस्यर्वासि सप्तिरसि वाज्यसि

दशापवित्रा द्रोणकलशं प्रतिपुरन्ध्यावहुधारयित्राधारयातस्माच्चांस्तुमद्गतिशेषः ॥ १८ ॥

(१) अध्वर्युर्यजमानोदक्षिणेश्रवकर्णेजपतः । विभूर्मात्रा । अश्वउच्यते । यस्त्वंविभूरसिविभवसि मात्राप्रभवसिचपित्रा । इयंवैमातासौतेपितेतिश्रुतिः । अथाश्वंनामक्रियाभिस्तौति । अश्वो-मद्गाशनस्त्वमसि । हयोसि हिगतौअस्यहयः । अत्योसि अतसातत्यगमने । मयोसिमय-

(१) का० अध्वर्युर्यजमानो दक्षिणेऽश्वकर्णे जपतो विभूर्मात्रेति । तृतीयायां सावित्र्यामिष्टो समाप्तायामध्वर्युर्यजमानो दक्षिणेऽश्वकर्णे जपतो विभूर्मात्रेति सूत्रार्थः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति सुखनाम। सुखरूपोसि अर्वासि। ऋगतावस्यार्वा। सप्तिरसिसरणोसि। वाज्यसिवेजनवा नसि। वृषासेक्ताऽसि। नृमणाऽसि। नृणांमनुष्याणां यत्रमनः सन्नमणाः। ययुर्नामासि ययुः एवंनामात्वमसि। ययुर्यानशीलः। शिशुर्नामासि शिशुः एवं नामात्वमसि। शंशनीयोभवसि। अपारमार्थिकोवानामशब्दः। यस्त्वमेवं प्रभावः तन्त्वांब्रवीमि। आदित्यानांपत्वा-

वृषासिनृमणाऽअसि॥ ययुर्नामासिशिशुर्नामास्यादित्यानाम्पत्त्वा न्निंवहिदेवाऽआशापालाऽएतन्देवेभ्योश्वम्मेधायप्रोक्षितꣳरक्षतेह रन्तिंरिहरंमतामिहधृतिंरिहस्वधृतिꣳस्वाहा॥ १९॥ [२] काय

न्विहि। पत्वापतनमार्गेण। येनयथा आदित्यापतन्तिगच्छन्ति तमनुगच्छेत्यर्थः। रक्षिणोस्यादिशति। देवाआशापालाः। एतन्देवेभ्यः प्रोक्षितम् अश्वम् मेधाययज्ञायरक्षत। चतस्रोधृतीर्जुहोति। अश्वउच्यते दृहरन्तिः रमणम् दृहरमताम् दृहधृतिः दृहस्वधृतिः साधुधृतिः। दृहयज्ञे हेअश्वतवक्रीडादयइत्यर्थः॥ १९॥ औदुम्बराणिजुहोति।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

(१) कायस्वाहा । कस्मैस्वाहा । कतमस्मैस्वाहा । स्वाहाधिमाधीताय । पूर्वंस्वाहाकारान्तास्ति-स्रआहुतयः प्राजापत्याः । आधिमाध्यानम् चतुर्थीचात्रकर्तव्या । आधयेस्वाहेति । आधीता-यस्वाहा । मनः मनसेईतिविभक्तिव्यत्ययः । प्राजापत्यायस्वाहा । चित्तंविज्ञाताय । चित्ता-

स्वाहा ॥ कायस्वाहाकस्मैस्वाहाकतमस्मैस्वाहास्वाहाधिमाधीता
युस्वाहामनः प्रजापतयेस्वाहाचित्तंविज्ञातायादित्यैस्वाहादित्यै
मह्यैस्वाहादित्यैसुमृडीकायैस्वाहासरस्वत्यैस्वाहासरस्वत्यैपावका
यैस्वाहासरस्वत्यैबृहत्यैस्वाहापूष्णेस्वाहापूष्णेप्रपथ्यायस्वाहापू

येतिविभक्तिव्यत्ययः । अदित्यैमह्यै । महपूजायाम् । पूजितायै । अदित्यैसुमृडीकायै मृड-सुखने । सुखयित्र्यै ॥ सरस्वत्यैस्वाहा । सरस्वत्यैपावकायैपावयित्र्यै । सरस्वत्यैबृ-हत्यैमहत्यै । पूष्णेस्वाहा । पूष्णेप्रपथ्याय । प्रगतः पन्थाः प्रपथः तत्रभवः प्रपथ्यः ।

(१) का० काय स्वाहेति चाश्वमेधिकानि त्रीणि कृष्णाजिनदीक्षातोऽध्वरदीक्षणीयायाश्चत्वारि त्रीणि त्रीणि चाश्वमेधिकानि ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पूष्णेनरन्धिषाय । नरान्दधाति धारयतीतिनरन्धिषः त्वष्ट्रेस्वाहा । त्वष्ट्रेतुरीपाय । तूर्णं-पातिरक्षतीतितुरीपः । त्वष्ट्रे पुरुरूपायबहुरूपाय । विष्णवेस्वाहा । विष्णवेनिभूयपाय ।

पूष्णेनरन्धिषायस्वाहात्वष्ट्रेस्वाहात्वष्ट्रेतुरीपायस्वाहात्वष्ट्रेपुरुरूपायस्वाहाविष्णवेस्वाहाविष्णवेनिभूयपायस्वाहाविष्णवेशिपिविष्टायस्वाहा ॥२०॥ विश्वोदेवस्य ॥ नेतुर्मर्तोऽवुरीतसक्षाम् ॥ विश्वोरायऽइषुध्यतिद्युम्नँवृणीतपुष्यसेस्वाहा ॥ २१ ॥ [१] आब्रह्मन्

नीचैर्भूत्वायः पातिसनिभूयपः । विष्णवेशिविष्टाय । शिपिंपशुंयज्ञस्य वेष्टयतिसाधुंकरोतीति शिपिविष्टः ॥ २० ॥ (१) विश्वोदेवस्येति व्याख्यातम् । २१ ॥ (२) जयति । आब्रह्मन् ।

(१) का० षडाग्निकानि चतुःस्थाने दशमं विश्वो देवसेति । सप्तम्यां दोक्षणीयायामयं विशेषः प्रतायानि चत्वार्यौदग्रभणान्याध्वरिकाणि ह्रयन्ते तेषां चतुर्णां स्थाने षडाग्निकानि आकूतिं प्रयुजमग्गिꣳ स्वाहेति हुत्वाश्वमेधिकानि च त्रीणि विष्णवे स्वाहेत्यादीनि हुत्वा विश्वो देवस्येति दशममौदग्रभणं जुहोतीति सूत्रार्थः ।

(२) का० कृष्णाजिनाद्या समिदाधानात् कृत्वा ब्रह्मन्निति जपत्यु त्सर्गकाल एके । कृष्णाजिनदीक्षात आरभ्योखायां चयो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आजायतां हेब्रह्मन् ब्राह्मणः ब्रह्मवर्चसी । यज्ञाध्ययनशीलो ब्राह्मणआजायतामित्यर्थः । राष्ट्रे । आजायताञ्च राष्ट्रेराजन्यः शूरः इषव्यः इषुभिः विधार्तिइषव्यः इषुषुवासाधुः इषव्यः । अतिव्याधीमहारथः । अतिविध्यतिद्विषन्तमित्यतिव्याधी । महारथश्चदोग्ध्री-

न् ॥ आब्ब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यःशूर इषव्योतिव्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्व्वोढानड्वानाशुः स प्तिःपुरन्धिर्य्योषाजिष्णूरथेष्ठाःसभेयोयुवास्ययजमानस्यव्वीरोजाय

धेनुः । राष्ट्रेआजायतामितिसर्वत्रसम्बन्धः । वोढाअनड्वान् आशुः शीघ्रः सप्तिरश्वः । पुरन्धिर्योषा । पुरंशरीरंरूपादिगुणसमन्वितं धारयतीति पुरन्धिः ॥ जिष्णूरथेष्ठाः । जयनशीलः रथेतिष्ठतीतिरथेष्ठाययुत्सुः । सभेयोयुवा । सभामर्हतिविद्यागुणचरित्रैः सभेयः युवा

दशसमिदाधानान्तं कृत्वाध्वर्युरेवा ब्रह्मन्निति जपति उत्सर्गैरुपतिष्ठत इत्युत्सर्गोपस्थानकाले एके आब्रह्मन्निति जपमिच्छन्ति यद्वाश्वस्योत्सर्गकाले विभूर्मात्वेति जपानन्तरमित्यर्थः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आत्मन्यजमानस्य आजायतात्रास्य यजमानस्य वीरः पुत्रः । किंच निकामेनिकामेनः पर्जन्योवर्षतु । प्रार्थनायामवश्यम्भवतीति निकामः अभ्यासोवीप्सार्थः । अस्माकं राष्ट्रइत्यर्थः । फलवत्यः अतिशयेनफलयुक्ताः नोस्माकंराष्ट्रे ओषधयः पच्यन्ताम् । योगक्षेमोनः कल्पताम् ।

तान्निकामेनिकामेनऽ पुर्ज्जन्योवर्षतुफलवत्योनऽओषधयऽपच्यन्ताँ ट्योगक्षेमोनः कल्पताम् ॥ २२ ॥ [१] प्राणायस्वाहा ॥ प्रानायुस्वा हाव्यानायुस्वाहाचक्षुषेस्वाहाश्रोत्रायुस्वाहावाचेस्वाहामनसेस्वा हा ॥२३॥ [१] प्राच्यैदिशे ॥ स्वाहोर्व्वाच्यैदिशेस्वाहादक्षिणायैदिशे

योगोद्रव्यादीनांसंयोगः क्षेमस्तेषामेवपरिपालनम् । योगश्चक्षेमश्चास्माकं क्लृप्तोभवतु । योगश्च-क्षेमश्चेतिद्वन्द्वः तत्रनपुंसकलिङ्गतावास्यात् द्विर्वचनम्वाइति । तत्रच्छान्दसोविसर्जनीयोद्रष्टव्यः ॥२२॥

(१) आज्यसक्तु धानालाजानामेकैकं जुहोति प्राणायस्वाहेति प्रति मन्त्रसर्वरात्रमावर्तम् । २३ ॥

(१) अज्यसक्तु धानालाजानामेकैकं जुहोति प्राणाय स्वाहेति प्रतिमन्त्रंठ० सर्वरात्रमावर्तम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वाहार्व्वाच्यैदिग्भ्यस्वाहाप्रतीच्यैदिग्भ्यस्वाहार्व्वाच्यैदिग्भ्यस्वाहोदीच्यै
दिग्भ्यस्वाहार्व्वाच्यैदिग्भ्यस्वाहोदूर्ध्वायैदिग्भ्यस्वाहार्व्वाच्यैदिग्भ्यस्वाहा
वांच्यैदिग्भ्यस्वाहार्व्वाच्यैदिग्भ्यस्वाहा ॥ २४ ॥ [१] अद्भ्यःस्वाहाब्भ्यः
ब्भ्यःस्वाहोदकायस्वाहातिष्ठन्तीभ्यस्वाहास्रवन्तीभ्यस्वाहास्यन्दमानाभ्यस्वाहा
कूप्याभ्यस्वाहासूद्याभ्यस्वाहाधार्य्याभ्यस्वाहार्णवायस्वाहासमुद्रायस्वाहासरि
रायस्वाहा ॥ २५ ॥ [१] वाताय स्वाहा ॥ धूमायस्वाहाभ्रायस्वाहामेघायस्वाहाविद्योतमा
नायस्वाहास्तनयंतुस्वाहावुस्फूर्जंतुस्वाहाववर्षंतुस्वाहावुवर्षंतुस्वा

प्राच्यै । दिग्देवताः ॥ २४ ॥ अद्भ्यः । जलदेवताः ॥ २५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हो॒ग्रंव्वर्षं॑तुस्वाहांशी॒घ्रंव्वर्षं॑तुस्वाहोद्गृ॒ह्णु॒तेस्वाहोद्गृ॑ह्णा॒तायुस्वा
हांप्रुष्णु॒तेस्वाहांशी॒कायु॒तेस्वाहाप्रुष्वा॑भ्यु॒स्वाहांक्रा॒दुनी॑भ्यु॒स्वा
हांनीहा॒रायुस्वाहा॑ ॥ २६ ॥ [१] अ॒ग्नयेस्वाहा॑ ॥ अ॒ग्नयेस्वाहा
सो॒मायुस्वाहेन्द्रा॑यु॒स्वाहांपृथि॒व्यैस्वाहा॒न्तरि॑क्षायुस्वाहांदि॒वेस्वाहा॑
दि॒ग्भ्य ऽ स्वाहाशा॑भ्यु॒ ऽ स्वाहो॒र्व्यै॑ दि॒शेस्वाहा॒र्वाच्यै॑दि॒शेस्वा
हा॑ ॥ २७ ॥ [१] नक्ष॑त्रे॒भ्यु॒स्वाहा॑ ॥ नक्तु॑चिये॒भ्यु॒स्वाहांहोरा॒त्रे
भ्यु॒स्वाहा॒र्द्धमा॑से॒भ्यु॒स्वाहामा॑से॒भ्यु॒ स्वाहाऽऋ॒तु॒भ्यु॒स्वाहा॑र्त्त॑
वे॒भ्यु॒ ऽ स्वाहांसंव्व॑त्स॒रायुस्वाहाद्यावा॑पृथि॒वीभ्या॒ ऽ स्वाहांचन्द्रायु

वाताय । मेघोपयोगिदेवताः ॥ २६ ॥ अग्नये । अग्न्यादयः प्रसिद्धाः ॥ २७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वाहासूर्य्यायस्वाहारश्मिभ्यः स्वाहावसुभ्यः स्वाहारुद्रेभ्यः
स्वाहादित्येभ्यःस्वाहामरुद्भ्यः स्वाहाविश्वेभ्योदेवेभ्यः स्वाहामू
लेभ्यः स्वाहाशाखाभ्यः स्वाहावनस्पतिभ्यः स्वाहापुष्पेभ्यः
स्वाहाफलेभ्यःस्वाहौषधीभ्यःस्वाहा ॥ २८ ॥ [१] शतम् १३००
पृथिव्यैस्वाहा ॥ पृथिव्यैस्वाहान्तरिक्षायस्वाहादिवेस्वाहासूर्य्याय
स्वाहाचन्द्रायस्वाहानक्षत्रेभ्यःस्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा
वनस्पतिभ्यः स्वाहापरिप्लवेभ्यः स्वाहाचराचरेभ्यः स्वाहासरी
सृपेभ्यः स्वाहा ॥ २९ ॥ [१] असंवेस्वाहा ॥ असंवेस्वाहाव्वसंवे

नक्षत्रेभ्यः । नक्षत्रादयः कालाधिष्ठात्र्यः ॥ २८ ॥ पृथिव्यै । पृथिव्यादयो लोकाधिष्ठात्र्यः ॥ २९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वाहाव्विभुवेसूवाहाव्विवंसूतेसूवाहांगणश्रिंश्रयेसूवाहांगुणपंतयेसूवाहांभि
भुवेसूवाहाधिंपतयेसूवाहांशुषायुसूवाहांस ६ सुर्म्पायुसूवाहांचुन्द्रायुसूवाहा
ज्ज्योतिंषेसूवाहांमलिम्मलुचायुस्वाहादिवांपुतयंतेसूवाहां ॥ ३० ॥ [१]
मधंवेसूवाहां ॥ मधवेसूवाहामाधंवायुसूवाहांशुक्रायुसूवाहाशुचंयेसूवाहान
भंसेस्वाहांनभस्यायुस्वाहेषाय स्वाहोर्ज्जाय स्वाहासहंसेस्वाहांस
हस्यायुस्वाहातपंसेस्वाहांतपस्यायुस्वाहां ꣳ हसस्पुतयेस्वाहां ॥३१॥
[१] व्वाजायुस्वाहां ॥ प्रसुवायुस्वाहांपिजायुस्वाहाक्रंतवेस्वाहास्वः
स्वाहांमूर्ध्नेस्वाहांव्यश्नुविनेस्वाहान्त्यायुस्वाहान्त्यायभौवनायुस्वा

अ २२

शिवम् ५०४

असवे । अस्वादयश्च ॥ ३० ॥ मधवे । मध्वादयो मासाधिष्ठातारः ॥ ३१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हाभुवनसुपतयेस्वाहाधिपतयेस्वाहा ॥ ३२ ॥ [१] आयुर्य्यज्ञेन ॥
कल्पतांꣳस्वाहाप्राणोयुज्ञेनकल्पतांꣳस्वाहापानोयुज्ञेनकल्प
तांꣳस्वाहाव्यानोयुज्ञेनकल्पतांꣳ स्वाहोदानोयुज्ञेनकल्पतांꣳ
स्वाहासमानोयुज्ञेनकल्पतांꣳस्वाहाचक्षुर्य्युज्ञे नकल्पतांꣳ स्वा
हाश्रोत्रंय्युज्ञे नकल्पतांꣳस्वाहाव्वाग्य्युज्ञे नकल्पतांꣳ स्वा
हामनोयुज्ञे नकल्पतांꣳस्वाहात्मायुज्ञे नकल्पतांꣳस्वाहाब्रह्म
हमायुज्ञे नकल्पतांꣳ स्वाहाज्योतिर्य्युज्ञे नकल्पतांꣳस्वाहा
स्वर्य्युज्ञे नकल्पतांꣳस्वाहापृष्ठंय्युज्ञे नकल्पतांꣳस्वाहायुज्ञो

वाजाय । वाजादयोऽन्नाधीशाः ॥ ३२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आयुः । यज्ञेनाज्ञमेधेनायुः कल्पताम् । एवमग्रेऽपि प्रार्थनामन्त्राः ॥ ३३ ॥ व्युष्टाद्वतिव्युष्टम् स्वर्गायेत्युदिति । प्राणायस्वाहेत्यारभ्य द्वादशभिः कण्डिकासंमितै रनुवाकै र्देवताउक्ताः आज्यादिहविर्भिः । एतेसर्वेएवयागाः महतोयज्ञस्यलोककालाग्न्यादिवपुषो वयविनोवयवभूताः । यथा

युज्ञे नंकल्पताꣳस्वाहा ॥ ३३ ॥ एकस्मैस्वाहाद्वाभ्याꣳस्वाहा शुतायुस्वाहैकंशतायुस्वाहाव्युष्टैस्वाहास्वुर्ग्गायुस्वाहा ॥३४॥ [१]

इतिश्रीवाजसनेयसंहितायांदीर्घपाठेद्वाविंशोऽध्यायः २२ ॥

देवदत्तस्यावयविनो वयवभूताः । शिरः पाण्यादयः । सोयमश्वमेधः प्रजापतेरवयविनोवयवभूतः प्रजापतेश्चात्मनः । सोयमात्मा । शाखाप्रशाखागतः स्तूयतेहूयतेच ज्ञानकर्मसमुच्चयकारिभिर्यजमानैः । एकस्मैस्वाहा द्वाभ्याꣳ स्वाहेति प्रकारदर्शनम त्रिभ्यः स्वाहा चतुर्भ्यः स्वाहेति एकशतात् । ३४ ॥

इति उव्वटकृतौ मन्त्रभाष्ये द्वाविंशोध्यायः ॥ २२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

(१) हिरण्यगर्भः सम्। महिम्नः (२) पुरीरुक्। व्याख्यातम्॥ १॥ उपयामगृहीतोसि। प्रजा-

* हिरण्यगर्भः समवर्त्तताग्रेभूतस्य जातः पतिरेकऽआसीत्॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम॥ १॥ उपया मगृहीतोसि॥ प्रजापतयेत्वाजुष्टङ्गृह्णाम्येषतेयोनिःसूर्य्यस्तेमहि

पतयेत्वा जुष्टमभिरुचितं गृह्णामि। सादयति। (३) एषतेतव योनिः स्थानं सूर्यस्तवमहिमा

(१) द्वाविंशे होममन्त्वास्त्रयोविंशेध्याये शिष्टं कर्मोच्यते।

(२) का० प्रातरुक्थ्यो महिमानौ गृह्णाति सौवर्णेन पूर्वठ० हिरण्यगर्भ इति। प्रातर्हितोयेऽहनि उक्थ्यसंस्थमहर्भवति तत्र महिमसंज्ञौ द्वौ ग्रहौ गृह्णाति आगन्तुत्वादाग्रयणोक्थ्ययोर्मध्ये तौ गृह्णाति अन्तराग्रयणोक्थ्यावागन्तुस्थानं ग्रहाणामिति वचनात् द्वयोर्मध्ये पूर्वं महिमानं सौवर्णेनोलूखलेन गृह्णाति।

(३) का० एष ते योनिरिति ग्रहसादनम्। एष ते योनिः स्थानं ते तव महिमा शक्तिः सूर्य्यः दीपस्येव प्रभा।

---

* हिरण्यगर्भो यःप्राणतोदिको युञ्जन्यष्टौ वायुष्टा पञ्च प्राणाय तिस्र उक्थ्या द्वादशगायत्रीकस्त्वाषट्कौ कः स्विदष्टौ कास्विद्दश सुभूः स्वयम्भूस्तिस्र एकादश पञ्चषष्टिः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

महाभाग्यंशक्तिः दीपस्येवप्रभा । जुहोति । यस्तेहन् । यस्तव अहनिसंवत्सरेच महिमासंबभूव संभूतउत्पन्नः । अहनिनिमित्तभूते सर्वाण्येव भूतानिसम्प्रयन्ते । निमितसप्तम्यश्चैताः । चर्मणिद्वीपिनंहन्ति दन्तयोर्हन्तिकुञ्जरमिति यथा । यः तेवायौ अन्तरिक्षेच महिमासंबभूव । यस्तेदिवि चसूर्ये महिमा संबभूव । तस्मैतेतव महिम्नेप्रजापतयेच स्वाहादेवेभ्यश्च ॥ २ ॥

मा ॥ यस्तेहंन्त्संव्वन्त्सरेमंहिमासंम्बभूवयस्तेंव्वायावन्तरिंक्षेमहिमा संम्बभूवयस्तेंदिविसूर्य्येमंहिमासंम्बभूवतस्म्मैंतेमंहिम्नेप्प्रजापंतये स्वाहांदिवेंभ्यः ॥ २ ॥ [२] यꣳप्प्राणतोनिंमिषतोमंहित्त्वैकु ऽ इद्द्राजाजगंतोबभूवं ॥ यऽईशेंऽअस्यद्विपदश्चतुंष्पदः कस्म्मैंदेवायंहु

द्वितीयंगृह्णाति तस्यपुरोरुक्यः प्राणतः कायीप्राजापत्याय: कः प्रजापतिः प्राणतः प्राणनं कुर्वतः भूतग्रामस्यनिमिषतः निमेषणं कुर्वतः क्रियावतइत्यर्थान्तरम् महित्वास्वकीयेन महाभाग्येन । एकइत् । इच्छब्दएवार्थे । एकएव समस्तस्यजगतो राज.वभूवसंवृतः । यश्च

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ईशेईष्टे अस्यद्विपदः प्राणिजातस्य यश्चतुष्पदः ईष्टेप्राणिजातस्य । तस्मैकस्मै देवायप्रजापतये हविषाविधेम । विदधातिर्दानकर्मा हविरितिविभक्तिव्यत्ययोद्वितीयान्तः । हविर्दद्मः ॥ ३ ॥ उपयामगृहीतोसि प्रजापतयेत्वां जुष्टंगृह्णामि । सादयति । एषते योनिः चन्द्रमास्ते महि-

विषाᳬविधेम ॥ ३ ॥ उपयामगृᳬहीतोसि ॥ प्रजापतयेत्वाजुष्टᳬगृह्णाम्येषतेयोनिश्चन्द्रमास्तेमहिमा ॥ यस्तेरात्रौसम्वत्सरेमहिमास म्बभूवयस्ते पृथिव्यामग्नौमहिमासम्बभूवयस्तेनक्षत्रेषुचन्द्रमसिम हिमासम्बभूवतस्मैतेमहिम्नेप्रजापतयेदेवेभ्यःस्वाहा ॥ ४ ॥ [२] युञ्जन्तिब्रध्नमरुषञ्चरन्तम्परितस्थुषः ॥ रोचन्तेरोचनादिवि ॥ ५ ॥

मा । जुहोति यस्तेरात्रौसंवत्सरेपृथिव्यामग्नौचनक्षत्रेषुचन्द्रमसिच महिमासंबभूवतस्मैतेमहि-म्नेप्रजापतयेदेवेभ्यः स्वाहा ॥ ४ ॥ (१) अश्वंयुनक्ति । युञ्जन्तिब्रध्नम् । अश्वो वादित्यरश्मयते

(१) का० युनक्त्येनं युञ्जन्ति ब्रध्नमिति अश्वं रथे युनक्ति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उत्तरोर्द्धः प्रथमं व्याख्यायते । यस्यभासा । रोचन्तेदेदीप्यन्तेरोचनाः रोचनानिदीप्तानिचन्द्रग्रहतारकादीनि । दिविद्युलोके । तंयुञ्जन्तिरथेवधन्ति । कथंभूतम् ब्रध्नम् परिवृढम् आदित्यम् अरुषमरोषणम् । चरन्तं गच्छन्तं वैदिककर्मसिध्यर्थम् । केयुञ्जन्ति परितस्थुषः सर्वतस्थिता ऋग्यजमानाः ॥ ५ ॥ (१) इतराश्वं युनक्ति । युञ्जन्त्यस्य । गायत्री । युञ्ज-

युञ्जन्त्यस्य ॥ युञ्जन्त्यस्यकाम्याहरीविपक्षसारथे ॥ शोणाधृष्णूनु

न्तिरथे अस्याश्वमेधि कस्याश्वस्य काम्याकाम्यौ कामसंपादिनौ नद्योरथं वोढुंशक्तः । हरीहरितवर्णावश्वौ हरिणौवावेगवन्तौ । विपक्षसा । विविधाः पक्षसः पक्षाः ययोस्तौविपक्षसौ । विविध पक्षावस्थितौ । यद्वाविरितिशकुनिनाम । वेतेर्गति कर्मणः । वेः शकुनेरिवपक्षौययोस्तौ शोणा । शोणौशोणशब्दोवर्ण वचनः । रक्तोवर्णोधूम्र भासः शोणइत्युच्यते । धृष्णुप्रसहनो

(१) का० इतरांश्च युञ्जन्त्यस्येति । इतरान् त्रीनश्वान्रथे युनक्ति ।

(२) का० अपो याह्यवगाढेषु व चयति यद्वात इति । चतुर्भिरश्वैर्युक्तं रथमध्वर्युयजमानावारुह्य तडागादिजलं गत्वा जलं प्रविष्टेष्वश्वेषु जयमानं वाचयति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नृवाहसा । नृणान्मनुष्याणां वोढारौ । ६ ।। (२) अपोयात्वावगाढेषुवाचयति । यद्वातः । वृहती अश्वदेवत्या । यत् यस्मात् वातः वातः वेगोश्वः अपः प्रति अगनीगन् अत्यर्थंगतः । प्रियाञ्च इन्द्रस्य तन्वं शरीरम् अगनीगन् अतो ब्रवीमि । एतम् अश्वम् हेस्तोतः अध्वर्यो । अनेनपथा येनगतः । पुनः अश्वम् आवर्तयासि आवर्तय आनय नोस्माकम् ॥ ७ ॥ (१) आगतमश्वम्महि-

वाहंसा ॥ ६ ॥ यद्वातः ॥ यद्वातोंअपोऽअगंनीगन्प्रियामिन्द्रंस्यतु न्वम् ॥ एतंस्तोतरनेनंपथापुनरश्वमावर्त्तयासिनः ॥ ७ ॥ वसं वस्वा ॥ अन्तुगायुत्वेणुक्छन्दंसारुह्यास्वांअन्तुत्वैष्टुभेनुक्छन्दंसाद्रि

षीवावातापरिवृक्ता आज्येनाभ्यञ्जयन्ति वसवस्त्वेतिप्रतिमन्त्रम् । वसवस्त्वाञ्जन्तु । निगद-व्याख्यातम् । सौवर्णा न्मणीनेक शतमश्व केसरपुच्छेषुप्रवयन्तिपत्न्यः । भूर्भुवः स्वः । व्याख्या-तम् । अश्वायरात्रिहुतशेषं प्रयच्छति । लाजीन् शाचीन् । योयंलाजानां समूहोलाजीनित्युक्तः

(१) का० आयाय विमुक्तमश्वं महिषो वावाता परिवृक्ताज्येनाभ्यञ्जन्ति पूर्वकायमध्यापरकायान्यथादेशं वसवस्त्वेति प्रतिम-न्त्रम् । आयाय जलप्रदेशाद्वयजनमागत्यरथाद्विमुक्तमश्वं महिष्याद्यास्तिस्रः पत्नी यथाक्रममश्वस्यपूर्वादिकानभ्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

योयं सक्तूनां समूहः शाचीनित्युक्तः । सक्तवोहि अतितरां शच्याकर्मणा निस्यदन्तइति शाची- नित्युक्ताः । यश्चायं यज्ञेयवमयः समूहउक्तोधानाः यश्चायंगोर्विकारसमूह उक्तोगव्यइति । एतदन्नम् अत्तभक्षयतहेदेवाः । एतदन्नमद्भिभक्षय हेप्रजापते । येभ्योश्वः । प्रोक्षितः तद्देव-

त्यास्वाञ्जन्तुजागंतेनुच्छन्दंसा ॥ भूर्भुवःस्वर्द्यौरीऽँक्षाचीऽँन्य व्येगव्यंऽएतदन्नंमत्तदेवाऽएतदन्नंमद्भिप्रजापते ॥८॥ कःस्विंत् ॥ कःस्विंदेकाकीचंरतिकऽउंस्विज्जायतेपुनंः ॥ किंऽस्विंद्धिमस्यंभेषज

तत्वादेतद्देवत्योश्वइति ॥ ८ ॥ ब्रह्मापृच्छति होतारं यूयमभितः । कःस्वित् । चतस्रोनुष्टुभः प्रश्नप्रतिप्रश्नरूपाः । कः पुनरेकाकी असहायः चरतिगच्छति । कउ स्वित् । कोनुविनष्टः

ञ्जन्ति घृतेन महिषो पूर्वकाय वसव इति वावाता देहमध्यं रुद्रा इनि परिहक्ता पश्चाद्गागमादित्या इति मन्त्रे- णेति सूत्रार्थः ।

(१) का० ब्रह्मा पृच्छति होतारं यूपमभितः कः स्विदेकाकीति । यूपस्य दक्षिणत उदङ्मुखो ब्रह्मा यूपोत्तरयो दक्षिणामुखं होतारं पृच्छति ।

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सन्जायते पुनः उकारः पादपूरणः । किम्पुनः हिमस्यशीतस्यभेषजम् । किञ्च आवपनं महत् उप्यते निक्षिप्यते स्मिन्नित्यावपनम् । ९ ॥ होताप्रत्याह । (१) सूर्य एकाकीचरति चन्द्रमाजायते-पुनः । अग्निश्चहिमस्यशीतस्य भेषजम् भूमिः अयंलोकः आवपनम्महत् ॥ १० ॥ (२) होताब्रह्माणं

ङ्किम्म्मावपनम्महत् ॥९॥ सूर्य्यऽएकाकी ॥ चरतिचन्द्रमाजायतेपुनः÷॥ अग्निर्हिमस्यभेषजम्भूमिरावपनम्महत् ॥१०॥ कास्वित् ॥ कास्विदा सीत्पूर्व्वचित्तिःकिꣳस्विदासीद्बृहद्वयः÷ ॥ कास्विदासीत्पिलिप्पिला कास्विदासीत्पिशङ्गिला ॥११॥ द्यौरासीत् ॥ द्यौरासीत्पूर्व्वचित्तिरश्वं

पृच्छति । कास्वित् । कापुनः आसीत् पूर्वचित्तिः । किम्पुनरासीत् बृहत् महत् वयः पक्षी । कापुनरासीत् पिलिप्पिलाकापुनरासीत् पिशङ्गिला ॥ ११ ॥ ब्रह्माप्रश्नान्व्याकरोति ।

(१) का० सूर्यइत्याचष्टे । होता ब्रह्माणं प्रतिवक्ति ।

(२) का० होता ब्रह्माणं का स्विदासीदिति । होता ब्रह्माणं पृच्छति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

(१) द्यौरासीत्। दुग्रहणेनाचक्षुष्टेर्लक्ष्यते। साहिपूर्वंसर्वै : प्राणिभिश्चित्यते। अश्व आसीदृहद्वयः। अश्वशब्देनाश्वमेधो लक्ष्यते। वयसाद्वच्चनेनाश्वमेधेनस्वर्गंलोक मारोहन्तिअविरासीत् अविः पृथिव्यभिधीयते साआसीत् पिलप्पिला दृष्ट्याहिक्लिद्यमाना पृथिवीपिलिप्पिलाभवति।

ऽआसीदृहद्वयंः ॥ अविंरासीत्पिलिप्पिलारात्रिंरासीत्पिशङ्गिला ॥ १२॥[८] व्वायुष्टां॥पचतैरंवृत्त्वसिंतग्रीवश्छागैर्न्यग्रोधंश्चमसःशं

श्रीरितिश्रुत्यापृथिव्युक्ताच। रात्रिरासीत्पिशंगिला। पिशमितिरूपनाम रात्रिर्हिसर्वाणिरूपाणिगिलतिअदृष्टानिकरोति। १२ ॥ (२) प्रोक्षत्यश्वम्। वायुष्ट्वावायुः त्वापचतैः पाकैः अवतु। वायवग्नि सँयोगाद्विद्र्याणिपच्यन्ते। असितग्रीवः छागैः असितग्रीवोग्निः धूम-

(१) का० द्यौरिति प्रत्याह : ब्रह्मा होतारं प्रति वक्ति। पूर्वचित्तिः पूर्वस्मरणविषया द्यौर्दृष्टिरासोत् द्योशब्देन दृष्टिर्लक्ष्यते सर्वप्राणिनामिष्टत्वात्।

(२) का० अश्वप्रोक्षणमङ्गत्वा वायुष्ट्वेति। अङ्गत्वौषधीभ्य इति प्राक्तनमन्त्रेण वायुष्ट्वेत्यारभ्य देवः सविता दधात्वित्यन्तन कण्डिकाचतुष्टयेनाश्वमेधिकेन चाश्वप्रोक्षणं करोत्रीति सूत्रार्थः।

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सँयोगात् । छागैः अवतु कृष्णग्रीवादिभिः पर्यङ्कैः । अश्वाङ्गेष्वालभ्यमाना अश्वायोपकुर्वन्ति अदृष्टेनोपकारेण । न्यग्रोधश्वमसैः अवतुसोमसंवन्धेन । शल्मलिः स्वकीययाङ्गज्ञात्वा अवतु-पालयतु । एषस्यः एषसः राध्यः रथेसाधुराध्यः । वृषासेक्ता । पञ्चिश्चतुर्भिः । आदुग् आगन् आगतः चतुर्ग्रहणाङ्किम् । तस्मादश्वस्त्रिभिस्तिष्ठति अथ युक्तः सर्वैः सममायुतदृतिश्रुतिः । वह्माक्त-

ल्म्मलिर्व्वृङ्क्षा ॥ एषस्यगात्थ्योव्वृषाप्रुड्भिश्चतुर्भिरेदंगन्ब्रह्मक्लं पञ्चनोवतुनमोग्नयें ॥ १३ ॥ सꣳशितोरश्मिनारथꣳसꣳशितोर श्मिनाहयंः ॥ सꣳशितोऽअप्स्वप्सुजाब्रह्मासोमंपुरोगवꣳ ॥ १४ ॥

ष्वाश्च । ब्रह्मापरिबृढः अकृष्णः नविद्यतेकृष्णमस्य यकृष्णश्चन्द्रमाः । सचनोस्माकम् अश्वम् अवतु । नमः अग्नये अग्निंनमस्करोत्यविघ्नाय ॥ १३ ॥ सꣳ० शितोरश्मिना । तिस्रो-नुष्टुव्विराट्त्रिष्टुभः । प्रोक्षणे एवअश्वदेवत्याः । सम्पूर्वः श्यतिः शोभने वर्तते । संदर्शितः यथा दर्शनीयतमः रश्मिनारथोभवति । यथाच संसितः रश्मिनाहयोश्वः । एवमयंसंशितः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अप्सुअङ्गिः । अप्सुजाः अप्सुजातो श्वः । अप्सुजानाः अश्वइतिश्रुतिः । किम्भूतः ब्रह्मा-
विभर्ता । परिवृढोवा । सोमपुरोगवः । सोमसंस्कारान्पुरस्कृत्य स्वर्गंलोकं गच्छतीति सोम
पुरोगवः । सोमार्थाहि पशवः । सयत्पशुमालभते रसमेवास्मिन्दधातीति श्रुतिः ॥ १४ ॥
किञ्च । स्वयं वाजिन् । स्वयमेवहे वाजिन् तन्वं शरीरं कल्पयस्व । स्वराज्यं तवास्तीत्यर्थः ।

स्वयँवाजिन् ॥ स्वयँवाजिँस्तन्वङ्कल्पयस्वस्वयंयंजस्वस्वयञ्जुषस्व ॥ महिमातेन्येनसन्नशे ॥ १५ ॥ नवै ॥ नवाऽउऽएतन्म्रिय सेनरिष्यसिदेवाः ॥ ऽइदोषेपृथिभिः सुगेभिः ॥ यत्वासंतेसुकृतो

अतएवस्वयमेवयजस्व । नतेन्योयष्टास्तीतिभावः । स्वयञ्जुषस्व । स्वयमेवाभिरुचितंस्था-
नंकुरुष्व । किमर्थमिदमुच्यतेस्माभिरितिचेत् । महिमातेतवसंवधीअन्येनमहिम्नानसंनशे । नशि-
रदर्शनार्थः । वेदेतुव्याप्त्यर्थोपिभवति । नसंव्याप्यते ॥ १५ ॥ नवै । वैजपादपूरणौ । नए-
तत् म्रियसेयत् संम्रियसे । नचरिष्यसिविनश्यसि ॥ विशस्यमानः । किमिति । यत्देवान्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्यतिएषिगच्छसि । पथिभिः सुगभिः साधुगमनैर्देवयानैरित्यर्थः । किंच । यत्रआसतेसुकृतः साधुकारिणः । यत्रचतेययुः गताः तत्रत्वान्देवः सवितादधातु ॥ १६ ॥ (१) उपगूह्यात्यपः । अग्निः

यत्रतेययुस्तत्रंत्वाट्टेवःसंवितादधातु ॥ १६ ॥ अग्गिनःपुशुः ॥ अग्गिनःपुशुरांसीत्तेनांयजन्तुसऽएतँल्लोकमंजयुद्यस्मिंन्नुग्गिनःसतेंलोकोभंविष्यतितञ्जेष्यसिपिबैताऽअपः ॥ व्वायुःपुशुरांसीत्तेनांयजन्तुसऽएतँल्लोकमंजयुद्यस्मिंन्व्वायुः सतेंलोकोभंविष्यतितञ्जेष्यसिपिबैताऽअपः ॥ सूर्य्यंःपुशुरांसीत्तेनांयजन्तुसऽएतँल्लोकमंजयुद्य

पशुः । सृष्टियज्ञे देवानामासीत् । तेनाग्निनातेऽयजन्त । सचाग्निस्तत्रसाधनभावमुपगतः सन् एतं पृथिवीलोकम् अजयत् । यस्मिन्लोकेऽग्निः । अतः सतेलोकोभविष्यति तञ्जेष्यसि ।

(१) का० उपगूह्यात्यपां पेरुरग्निः पशुरिति । अपां पेरुरिति प्राकृतेन मन्त्रेणाग्निः पशुरिति वैकृतेन च प्रोक्षणीरभ्यास्ये उपगूह्यातीति सूत्रार्थः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विवएता: प्रोक्षणी:अप: । वायु: । सूर्य: पशु: व्याख्यातमन्यत् ॥ १७ ॥ (१) परिपश्व्येहुत्वा प्राणायस्वाहेति । तिस्रोपरा: वाचयतिपत्नीर्नयन् । अश्वे । अनुष्टुप् ॥ अश्वस्तुति: । पत्ना: परस्परमामंत्रयन्ते । हेअम्बे हेअम्बिके हेअम्बाले । नमानयति अश्वं प्रतिप्रापयति कञ्चन-

स्मिन्त्सूर्य्युऽसतेलोभंविष्यतितञ्जेष्यसिपिबैताऽअपः ॥ १७ ॥ प्रा णायुस्वाहा ॥ प्रानायुस्वाहाव्यानायुस्वाहा ॥ अम्बेऽअम्बिकेम्बालि केनमानयतिकञ्चुन ॥ ससस्त्यश्वक ९ सुभद्रिकाङ्काम्पीलवासिनीं

कश्चिदपि । मदगमनेनच । ससस्ति । सस्त्व । ये । अन्यांपरिगृह्यशेते । कुत्सितोश्व: । अश्वक: । अकुत्सितोपीर्ष्ययाकुत्स्यते । सुभद्रिकाम् । कुत्सितामुभद्रासुद्रिका । इयमपीर्ष्य-याकुत्स्यते । कांपीलवासिनीम् कांपील नगरेढि सुभगा सुरूपाविदग्धा विनीताश्चस्ति योभ-

(१) का० परिपश्व्ये हुत्वा प्राणाय स्वाहेति तिस्रोऽपरः । परिपश्व्ये स्वाहा देवेभ्यो देवेभ्यः स्वहेति द्वे आहुती हुत्वा प्राणायेत्याद्यास्तिस्र आहुतीर्जुहोति एकामश्वसंज्ञपनादौ चतस्रोऽन्ते इति सूत्रार्थः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वन्ति ॥ १८ ॥ (१) पत्नयः त्रिःपरियन्त्यश्वम् । गणानांत्वा । स्त्रीगणानाम् । मध्येत्वां युगपत् गणपतिं हवामहे आह्वयामः । एवमेव । प्रियाणां मनुष्याणां मध्येत्वा मेव प्रियपतिं प्रियं-भर्तारंहवामहे । एवमेव निधीनां सुखनिधीनाम्मध्येत्वा मेव निधिपतिं हवामहे । कथं कृत्वा । हेवसो । अश्व ममत्वं पतिर्भूयाः इति । महिषी अश्वमुप संविशति । आहमजानि ।

म् ॥ १८ ॥ गणानांत्वा ॥ गणपंतिꣳहवामहेप्प्रियाणांत्वाप्प्रियपंति ꣳहवामहेनिधीनात्वांनिधिपतिंꣳहवामहेव्वसोमम ॥ आहमंजानि गर्भ्भधमात्वमंजासिगर्भ्भधम् ॥ १९ ॥ ताऽउभौचतुरंःपदꣳसम्प्रसार

आकृष्य अहम् अजानि अजगतिक्षेपणयोः । क्षिपामि । गर्भधम् । गर्भस्यधारयित्र रेतः । आत्वमजासि गर्भधम् । आकृष्यच त्वंहेअश्व अजासिक्षिपसिगर्भधं रेतः ॥ १९ ॥ ताउ-भौ । यौ आवांकृतसङ्केतौ तौउभौ त्वं चाहञ्च । चतुरः पदः पादान् । द्यौतवसम्बन्धिनौ

(१) का० अधोवासेन प्रच्छादयति स्वर्गं लोक इति। अधोवासेनाश्वमहिषौ छादयति अध उपरिष्टाच्छादनत्वमं वासो-ऽधोवातः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्यौचममसम्बन्धिनौ । संप्रसारयाव । एवं हि सम्बन्धे संवेश प्रकार इत्यभिप्रायः । अधीवासेन प्रच्छादयति । स्वर्गेलोके । एषवैस्वर्गोलोको यत्र पशु ऽसञ्ज्ञपयन्ति । प्रोर्णुवायाम् । जर्णोतिराच्छादने । प्रोर्णुवनङ्कुरुतमित्यध्वर्युराह । अश्वशिश्नमुपस्थेकुरुते । वृषावाजीवृषासेक्तावाजीअश्वःरेतोधारेतसः धारयितारेतोदधातुआसिञ्चतु ॥ २० ॥ (१) उत्सक्थ्या । गायत्र्याऽश्वं

यावस्वर्गेलोकेऽप्रोर्णुवाथांव्वृषांव्वाजीरेतोधारेतोदधातु ॥ २० ॥ [३]
उत्सक्थ्या ऽ अवगुदन्धेहिसमुञ्जारयाव्वृषन् ॥ यस्त्रीणाञ्जीवभोजं

यजमानोऽभिमन्त्रयते । उद्गतेसक्थनीयस्याः साउत्सक्थी तस्याउत्सक्थ्याः महिष्याः । अवगुदन्धेहि । अवाचीनङ्कुरुम् रेतोधेहि सिञ्च । कथमितिचेत् । समञ्जिञ्जारयावृषन् । सञ्चारय अञ्जिम् अनक्तिव्यनक्ति पुंस्त्वमित्यञ्जिः पुंस्त्वजननमुक्तम् । हेवृषन् सेक्तः । कथंभूतोञ्जिः । यःस्त्रीणाञ्जीवभोजनः । यस्मिंस्मति स्त्रियोजीवन्तीत्युच्यन्ते । यस्मिंश्चसति । भोजनादीन् भोगा-

(१) का० उत्सक्थ्या इत्यग्रं यजमानोऽभिमन्त्रयते ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्लभन्ते । सजीवभोजनः ॥ २१ ॥ इतउत्तरम् दशानुष्टुभोभिमेथिन्यः पुंस्त्वजननमुक्तम् । द्वितीयो-परिष्टाद्बृहती अत्रचयोयत्रभग्यते सतत्रदेवतात्वमुपगच्छति । अध्वर्युः कुमारीमभि मेथयति । यका-सकौ । अकचप्रत्ययोव कुत्सायान् । अङ्गुल्याप्रदर्शयन्नाह । यकाअसकौ । शकुंतिका । अल्पेकन् प्रत्ययः । अल्पीयसी पक्षिणीव । आहलक् इति । प्रकारवचनम् । हलेहले इति ब्रुवन्ती । वञ्चति

नꣳ ॥२१॥ युकामुकौ ॥ शंकुन्तिकाहलुगितिवञ्चति ॥ आहंन्तिगभे पसोनिगंल्गलीतिधारंका ॥ २२ ॥ युकोमुकौ ॥ शंकुन्तकऽआहलु

त्वरितं गच्छति । चपलेत्यर्थः । तस्याअपि । आहन्ति । हन्तिर्गत्यर्थः । आगच्छति । अन्तर्भावित ण्यर्थोवा । आगमयति प्रवेशयति । अत्यर्थं वाहुति । गभेपसः । गभइतिआद्यन्तवर्णविपर्ययः । पसः पसतेः स्पृशतिकर्मणः । भगेशिश्नमाहन्तीत्यर्थः । अथ तदानिगल्गालीति अत्यर्थं शुक्रंमञ्चति धारकायोनिः । यद्वा शब्दानुकरणम् निगल्गालीति गिरतेवा । निगिरतिशिश्नंयोनिः ॥ २२ ॥ अध्वर्युं प्रत्याहकुमारी । यकोसकौ । यकः असकौ यः असौ शकुंतकइव आहलगितिवञ्चति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्याश्लीलंभाषिष्ठाः किमन्यत् ब्रवीमि । विवक्षतइव तेमुखम् । असाधुवक्तुमिच्छतः इव तेमुखंपश्यामि । अतो हेअध्वर्यो मानः अस्मान् त्वमभि भाषथाः ॥ २३ ॥ ब्रह्मामहिषीमभि मेथति । माताचते । हेमहिषि यदामाताच तवपिताचतव । अग्रेवृक्षस्य । वार्क्ष्यस्येति तद्धितलोपः । वार्क्ष्यस्यपर्यंकस्य उपरितनभागम् रोहतः । मैथुनार्थमेकं पर्यंकमारोहतइति अश्लीलाभिप्रायं

गितिव्वक्षंति ॥ व्विवंक्षत ऽइवतेमुखमद्ध्वंर्य्योमानस्त्वमुभिभाषथाꣳ ॥ २३ ॥ माताचं ॥ तेपिताचतेग्रंव्वृक्षस्यंरोहतꣳ ॥ प्रतिंलोमीतिंतेपितागुभेमुष्टिंमंतꣳसयत् ॥ २४ ॥ माताचं ॥ तेपिताचुतेग्रंव्वृक्षस्यंक्रीडतꣳ ॥ व्विवंक्षत ऽइवतेमुखम्ब्रह्मन्मात्त्वंव्वंदोवु

वचनम् । तदाप्रतिलोमीति तिलस्नेहनि । स्नेहाम्यहमनेनकर्मणा । इतिएवमिति प्रकारवचनम् वदन् । तवपितागभे भगेमुष्टिं मुष्टाकारंलिंगशिश्नम् अतंसयत् अक्षिपत् । एवन्तवोत्पत्तिः ॥ २४ ॥ महिषीप्रत्याह । माताचते । हेब्रह्मन् । यदामाताच तेपिताचते अग्रेवृक्षस्य पर्यंकस्यक्रीडतः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तदात्वमुत्पन्नः । तुलयोत्पत्तिरावयोः । यश्चोभयोर्दोषोन तमेकश्चोदयितुमर्हति । एवंसति । यदसाधुवदितु मित्यतइव तेमुखंपश्यामितत् हेवह्मन् मात्वंवदोवहु ॥ २५ ॥ उद्गातावा वातामभिमेथयति ऊर्ध्वामेनाम् । कश्चित्पुरुषमाह । ऊर्ध्वामेनांवा वाताम् उच्छ्रितांकुरु । कथमिव । गिरौभारं मध्येनिगृह्य हरेत् एवमेनां मध्येनिगृह्य । ऊर्ध्वामुच्छ्रापय । अथ यथेत्येतस्यस्थाने तथाच

हु ॥ २५ ॥ ऊर्ध्वामेनाम् ॥ ऊर्ध्वामेनामुच्छ्रापयगिरौभारंहरन्निव ॥ अथास्यैमध्मेधताꣳशीतेव्वातेपुनर्न्निव ॥ २६ ॥ ऊर्ध्वमेनम् ॥ ऊर्ध्वमेनमुच्छ्रयताद्गिरौभारंहरन्निव ॥ अथास्यमध्मे

उच्छ्रापय यथा अस्यावातायःमध्यं योनिप्रदेशः एधताम् । एधवृद्धौ वृद्धिंयायात् । अधैनांगृह्णीयाः । शीतेवाते पुनर्न्निव । * पावाखलाव । पावाहि धान्यवाते शुद्धंकुर्वन । ग्रहणमोक्षौभटितिकरोति ॥ २६ ॥ वावाता प्रत्याहोद्गातारम् । भवतोयेतदेवम् । ऊर्ध्वमेनम् । उद्गातारमुच्छ्रयतात् उच्छ्रापय । अवस्त्रीपुरुषायते । गिरौभारंहरन्निव । अथैवं क्रियमाणस्यास्य मध्यंप्रजननम् एजतु-

* यस्यस्पष्टार्थः । यथा शीतले वायौ वाति पुनर्धान्यपवनं कुर्वाणः क्षणोवलो धान्यपात्रं यथा ऊर्ध्वं करोति तथेत्यर्थः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चलतु । अथैनन्निगृह्णीष्व शीतेवतेपुनन्निव । यवान् ॥ २७ ॥ होतापरिप्लक्षामभिमेथयति । यदस्याः । यत्यदा अस्याः परिप्लक्षायाः । अंहुभेद्याः । अल्पयोनेः । अंहुः हन्तव्यः भेद्यप्रदेशः प्रजननमसाद्दति अंहुभेदी तस्याः अंहुभेद्याः । कृधुद्दतिह्रस्वनाम । ह्रस्वं शिश्नम । स्थूलञ्च उपातसत् उपसङ्गच्छेत् । अथतदा अल्पत्वात् योनेः स्थूलत्वाच्च ह्रस्वत्वाच्च दुः प्रजननसा ।

जतुशीतेव्वातेंपुन्नन्निंव ॥ २७ ॥ यदंस्याः ॥ यदंस्याऽअंहुभेद्यांःकृधुस्थूलमुपातंसत् ॥ मुष्कावदंस्याऽएजतोगोशफेशंकुलावंिव ॥२८॥ यद्देवासंः ॥ यद्देवासोंललामंगुम्प्रविंष्टीमिनुमाविंषुः ॥ सुक्षनादेंदि

मुष्कौह्यषणौ इत्एवम् असाः प्रजननसोपरिएजतः । एजृकम्पने । कम्पनङ्गतः । कथमिव गोशफेगोष्पदे उदकपूर्णे । शकुलाविव मत्स्याविव ॥ २८ ॥ परिप्लक्षाप्रत्याह । यद्देवासः । होतृप्रमुखान् सर्वानेव ऋत्विजः परिवदति । यदा एतेदेवासः शिश्नदेवाः शिश्नक्रीडिनः । ललामगुम् ललामेतिमुखमभिधीयते मुखङ्गन्तुङ्गच्छतीति ललामगुःशिश्नम् । यद्वा ललामेतिपौंड्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मभिक्रीयते । शिश्नंहि योनिम्प्रविशत् पौरुषभवति । प्रविष्टोमिनम् प्रवेश्यविष्टम्भ्यच । आविषुःआलिङ्गनचुम्बनादिभि र्निगृह्णीयु र्नारीम् । अथतदा । सक्थ्यादेदिश्यतेनारी । सकथिकृतेन कुटिलगमनेन अतिदिश्यतेलक्ष्यतेनारी । नहि तस्याःकिञ्चिदव्याप्तम् पुरुषेणभवति अन्यत्रसकथ्यूरित्यभिप्रायः । कथमिवासत्यस्याक्षिभुवोयथा । द्विःप्रकारंसत्यम् अक्षिप्रभवमनक्षिप्रभवञ्चेति । अक्षिग्राह्य मक्षिप्रभवम् तत्रहि सर्वंव्याप्तंभवति । अनक्षिप्रभवं श्रोत्रग्राह्यम तत्तु-

श्यतेनारीसत्यस्याक्षिभुवोयथा ॥ २९ ॥ यद्वरिणः ॥ यद्वरिणोयवमत्तिनपुष्टम्पशुमन्यंते ॥ शूद्रायदर्य्यंजारानपोषायधनायति ॥३०॥

साकांक्षम् वक्तुराप्ततामपेक्षते । अतोविशिनष्टि अक्षिभुवइति । सत्यस्यअक्षिभुवः यथाअवितथत्वंतथेति ॥ २९ ॥ चक्षुषापालागलीमभि मेथयति । यद्वरिणः । यदाहरिणोमृगः यवंससग्रम् अतिभक्षयति । अथतदाक्षेवी । नपुष्टम्पशु । पशुमितिप्राप्ते विभक्तिलोपः । पुष्टम्पशुम् मन्यते-अवगच्छति । ममक्षेत्रम् भक्षितमितियथा । एवम् शूद्रायत् यसाशूद्रसाभर्तुः । अर्य्यजाराअर्य्यः वैश्यःजारोयसाः साअर्य्यजारा भवेत्तदा सशूद्रःक्षेत्री । नपोषायममेतदितिमन्यते । नच-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तस्माद्धनायति। धनमिवचतांनमन्यतेपरस्योपभोग्यत्वात् ॥ ३० ॥ पालागलीप्रत्याह। यद्धरि-णोयवमत्तिनपुष्टं बहुमन्यतेचेचीति। यदुक्तं भ तोप्येतदेवमितिसोल्लुहमाह। कियांस्तुविशेषः। शूद्र. यत्अर्यायै अर्यायाः वैश्यायाः जारः जारयिता। तदाचेचीवैश्यः आत्मनः पोषंनानुम-न्यते। नहिसातस्य पोषयानिकृष्टश्च शूद्रः उत्कृष्टावैश्याइति। समाप्तमश्लीलभाषणम् ॥ ३१ ॥

यद्धरिणोयवमत्तिनपुष्टंबहुमन्यतेशूद्रोयदर्यायैजारोनपोषुमनुंमन्यते ॥३१॥ दधिक्राण्वोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः ॥

(१)ऋत्विजोयजमानश्च सुरभिमतीमृचमन्तत आहुः वाचमेवंपुनन्ति। दधिक्राण्णः। अनुष्टुवश्वदे-वतया। यत् दधिक्राणः अश्वसंस्कारार्थं मश्लीलभाषणम् अकारिषम अकार्षम अकार्ष्मकृत-वन्तः वचनव्यत्ययः। एकवचनस्यस्थानेबहुवचनंवोध्यम्। उपरिष्टाद्बहूनिपदानि बहुवचनान्तानि दृश्यन्ते। किम्भूतस्यदधिक्राण्णः। जिष्णुःजेतुः अश्वस्याश्वनेसाव्यापिनः वाजिनः। ओविजी भय-

१ का० महिषीमुत्थाप्य पुरुषा दधिक्राव्ण इतगाहुः। महिषीं यजमानस्य प्रथमपरिणीतां पत्नीमश्वसमीपमुपसामुत्थाप्य पुरुषा अध्वर्युब्रह्मोद्गातृहोतृचत्तारो मन्त्रं पठेयुरिति सूत्रार्थः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चलनयोः वेजनवतः तत्रसुरभीणिमुगन्धीनि । अश्लीलभागणेलहि दुर्गन्धीनिमुखानिभवन्तिपापहे-
तुत्वात् । नः अस्माकंमुखानि । निकारलोपश्छान्दसः करत्करोतु यन्नइत्यध्याहारः । किञ्च ।
प्रणः आयूंषितारिषत् । प्रतारिषत् प्रवर्द्धयतुच नः अस्माकम् । बहुवचनवालयीवन दृष्ट्वयोपे
क्षम् ॥ ३२ ॥ पत्न्योसि पथङ्कल्पयन्ति । गायत्रीत्रिष्टुप् षड्भिर्ऋग्भिः । तत्राद्या उष्णिक् चत-

सुरभिनोमुखांकरत्प्रणऽआयूंऽषितारिषत् ॥ ३२ ॥ [१२] गायत्त्रीत्रिष्टुप् ॥ गायत्त्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह ॥ बृहत्त्यु
ष्णिहाकुकुप्सूचीभिःशम्यन्तुत्वा ॥ ३३ ॥ द्विपंदायाः ॥ द्विपंदा
याश्चतुंष्पदास्त्रिपंदायाश्चषट्पंदाः ॥ त्रिच्छंन्दायाश्चसच्छंन्दाः

स्रोनुष्टुभः परात्रिष्टुप् । गायत्रीचत्रिष्टुपचजगतीच अनुष्टुप्च । अनुष्टुप्च पङ्क्त्यासहबृहतीच ।
उष्णिहासहककुप्च । सूचीभिः शम्यन्तुत्वाम्हेअश्व मनमगानामभेदेनवर्त्मनिदर्शनं सूचीभिः
क्रियतेतेनपथाऽसिः प्रवर्तते ॥ ३३ ॥ द्विपदायाः । याःद्विपादाः याश्चतुष्पदाः याश्चत्रिपदाः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

याश्चषटपदाः । याश्चविच्छन्दाः विगतच्छन्दा याभ्यस्ताः । विषमाक्षराः विषमपदाःछन्दोलक्षणेनानभिसंबद्धाः । याश्चसच्छन्दाः अन्यूनातिरिक्ताक्षराश्छन्द । साजातयः ताः सर्वाः सूचीभिः शम्यन्तुत्वाम् । ३४ । महानाम्न्योरेवत्यः । महानाम्न्यऋचः शाक्वर्यइतियाभण्यन्ते । रेवत्यएताअपिरेवत्यः । रेवतन्तासुसामभवति । विश्वाः सर्वाः आशादिशः । प्रभूवरीः प्रभूततमाः । मैघीः

सूचीभिः शम्यन्तुत्त्वा ॥३४॥ महानाम्न्यो रेवत्यः ॥ महानाम्न्यो रेवत्योविश्वाऽआशाः प्रभूवरीः ॥ मैघीर्विद्युतोवाचः सूचीभिः शम्यन्तुत्त्वा ॥ ३५ ॥ नार्यस्तेपत्नीलोमविचिन्वन्तुमनीषया ॥ देवानाम्पत्नीर्दिशः सूचीभिः शम्यन्तुत्त्वा ॥ ३६ ॥ रजताहरिणीः ॥

मेघेभवाः विद्युतः तदुत्पन्नायाश्ववाचः ताः सर्वाः सूचीभिः शम्यन्तु । शमनेनहविः कुर्वन्तुत्वाम् । ३५ । नार्यस्ते । नृणामपत्यानिवहूनिस्त्रीलक्षणानिनार्यः । तेतव । पत्न्यःयजमानस्यपत्न्यः । लोमलोमानिविचिन्वन्तु पृथक्कुर्वन्तु । मनीषया मनसइक्षणामनसः पर्यालोचनेन । देवानाञ्चयाः पत्न्यः दिशः ताः सर्वाः सूचीभिः शम्यन्तु शमनेनहविष्कुर्वन्तुत्वाम् । ३६ ॥ रज-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ताहरिणीः । रजतमुवर्णसीसमय्यः सूच्यः । युजः सहयोजनाः । युज्यन्तेकर्मभिः सीमालक्षणैः । याः ताः अश्वस्यवाजिनः वेजनवतः त्वचिरोमसु । सीमा. सिमाशब्दः सीमपर्यायोमर्यादावचनः सीमानङ्कुर्वाणाः शमान्तुहविः कुर्वन्तु शमान्तीः हविष्कुर्वाणाः अश्वम् ॥ ३७ ॥ कुविदङ्गे तिव्याख्या-

सीमायुजोयज्यन्तेकर्म्मभिः ॥ अश्वस्यव्वाजिनस्त्वचिसिमाः शम्यन्तुशम्म्यन्तीः ॥ ३७ ॥ कुविदङ्ग ॥ यवमन्तोयवञ्चिद्यथादान्त्यनुपूर्व्वंव्वियूय ॥ इहेहैषाङ्गृणुहिभोजनानियेबर्हिषोनमः उक्तिंव्यजन्ति ॥ ३८ ॥ [८] कस्त्वा ॥ कस्त्वाच्छ्यतिकस्त्वाव्विशास्तिकस्तेगात्रा-

तम् ॥ ३८ ॥ (१) अश्वम्विशास्ति अनुवाकेनशङ्कृचेन । तत्राद्यागायत्री पराअनुष्टुभः । कस्त्वा । कः प्रजापतिः त्वाम् आच्छ्यति । छोछेदने । आछिनत्ति । त्वचः । कश्चप्रजापतिःत्वां विशा-

१ का० अश्वं विशास्त्यानुवाकेन कस्त्वाच्छ्यतीति । षड्चेनानुवाकेनाश्वं विशास्ति अश्वोदरं पाटयति मेदस उद्धरणाय वपाया अभावात् उदरमध्यस्थं स्नायनं घृताभं घनं श्वेतं मांसं मेद इति सूत्रार्थः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तित्वचावियोजयति । कश्चप्रजाति: तेतवगात्राणि शरीराणि शमयति शमनेनह विर्भाव मापादयति । कउते प्रजापति रेवते शमिताकवि:मेधावीक्रान्तदर्शन: । यद्वाप्रश्नरूपोयं मन्त्र: । कोयं मनुष्य: त्वाम् आक्ष्यातिकश्चत्वां विशास्ति कश्चतेगात्राणि शमयति । कश्चउतेशमिताकवि: । न कश्चिदपीत्यभिप्राय: । उ:पादपूरण: ॥ ३९ ॥ यस्मिन्पक्षे कस्त्वाप्रजापति स्त्वेतिव्याख्यातं

णिशम्म्यति ॥ कउंतेशमिताकुवि: ॥३९॥ ऋतवंस्तऽऋतुथापर्व्वंश मितारोव्विशांसतु ॥ संव्वत्सरस्तेजंसाशमीभि:शम्म्यन्तुत्त्वा ॥४०॥ अर्द्धमासाः परूं ँषितेमासा ऽआक्ष्यंन्तुशम्म्यंन्त ऽ ॥ अहोरात्त्रा

तस्मिन्पक्षेप्रतार्यते । ऋतवस्ते । ऋतवश्चतवशमितार: ऋतुथा ऋतावृतौकालेकाले । पर्व । पर्वणि पर्वणि । संवत्सरस्यचतेजसा । शमीभि: कर्मभि: शमयन्तुशमनेह विर्भावमापादयन्तु त्वांहे अश्व ॥ यदातुक: त्वांविशासितुं समार्थोमनुष्यएवं व्याख्यातम् तदा ऋतवोदेवा: तेशमितार: इत्येवं व्याख्येयम् ॥ ४० ॥ अर्द्धमासा: । अर्द्धमासा: मासाश्च तेवपरूंषिपर्वणि आक्ष्यन्तु आक्षि-

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्दन्तु शमान्तः शमनेन ह विभावमापादयन्तः । किञ्च । अहोरात्राणिमरुतश्च विलिष्टन्दुःश्लिष्टंसूदयन्तु षूदक्षरणे पठ्यते । इह सन्धाने वर्तते वाक्ययोगात् सन्दधन्तु तेतव ॥ ४१ ॥ दैव्या अद्वर्यवः । येचदैव्यादिव्या अध्वर्यवः अग्निप्रभृतयः तेचत्वात्वाम् । आक्रान्तुं विचशासतु चकारो भिन्नक्रमः । विशासतुच । किञ्च गात्राणि पर्वशः तेतवसिमाः मर्यादाः क्रुरावन्तु कुर्वन्तु

णिंमरुतोव्विलिंष्टुंसूदयन्तुते ॥ ४१ ॥ दैव्याऽअद्ध्वर्य्यव ॥ स्त्वाक्रान्तुव्विचंशासतु ॥ गात्राणिपर्व्वशस्तेसिमाऽक्रराव्वन्तुशम्म्यन्तीऽ ॥ ४२ ॥ द्यौस्तें ॥ पृथिव्युन्तरिक्षँव्वायुश्छिद्रंम्पृणातुते ॥ सूर्य्यस्तेन क्षंतैंऽसहलोकङ्कृणोतुसाधुया ॥४३॥ शन्तें ॥ शन्तेपरेंब्योगात्रेंब्युऽ

शमान्तीः । मर्यादा दर्शतेन शमनं कुर्वाणाः ॥ ४२ ॥ द्यौस्ते द्यौश्चते तव पृथिवीचअन्तरिक्षञ्चच वायुश्चछिद्रं पृणातु पूरयतुते । किञ्च । सूर्यश्चतेतवनक्षत्रैः सहलोकं स्थानं कृणोतु साधुयासाधुम् । द्वितीयार्थेयाछान्दसः ॥ ४३ ॥ शान्ते । सुखं ते तव अस्तु हेअग्नेपरेभ्यः गात्रेभ्यः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शंसुखम् अवरेभ्यः । अस्तु । शम अस्थभ्यः अस्थिभ्यः मज्जभ्यश्च अस्तु । शञ्चास्तुतन्वैशरीराय । षष्ठ्यर्थेकृन्दसिचतुर्थीवक्तव्येति षष्ठ्यर्थेचतुर्थीतन्वाः तव ॥४४॥ (१) इत उत्तरं ब्रह्मोद्यमष्टादशर्चम् (उत्तरप्रत्युत्तरैः परस्परं सम्वादः ब्रह्मोद्यम्) तत्राद्याच स्रोनुष्टुभः कास्विदासीत्पूचि-

शमस्त्वरेभ्यः ॥ शमस्थभ्योमज्जभ्यःशम्वस्तुतन्वै तवं ॥ ४४ ॥
[६] कःस्विदेकाकीचरतिकऽउस्विज्जायतेपुनः ॥ किंउस्विद्धिमस्यभेषु
जङ्गिम्भावपनम्महत् ॥४५॥ सूर्य्यऽएकाकी ॥ चरतिचन्द्रमाजायते
पुनः ॥ अग्निर्हिमस्यभेषजम्भूमिरावपन्महत् ॥४६॥ किंउस्वित् ॥

तिरित्याद्याश्च चतस्रोनुष्टुभः त्रिष्टुभोन्त्याः । होताध्वर्युम्पृच्छति: कः स्विदेकाकी । ४५ ॥ तमुत्याह । सूर्यएकाकीचरति अग्रेव्याख्यातौ ॥ ४६ । अध्वर्युर्होतारम्पृच्छति । किंउस्वित्सूर्य-

(१) का० प्राग्वापाद्धोमाद्धोताध्वर्यू च सदसि संवदेते चतसृभिः कः स्विदेकाकीति पूर्ववत् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सनं ज्योतिः । किञ्च समुद्रसमंसरः । किंस्वित्पृथिव्यै पृथिव्याः वर्षीयः महत्तरम् कस्यचमात्रापरिमाणम् नविद्यतेनास्ति ॥ ४७ ॥ तंप्रत्याह । ब्रह्मसूर्यसमम् । ब्रह्मत्वयी-त्तत्रणम्वा । सूर्यस्यज्योतिः । द्यौःसमुद्रसमंसरः । इन्द्रःपृथिव्यै वर्षीयान्महत्तरः ।

किꣳस्वित्सूर्य्यंसमुज्ज्योतिꣳकिꣳ संमुद्रसंमꣳसरः ॥ किꣳ स्वित्पृथि व्यैव्वर्षीयꣳकस्यमात्त्रानविंद्यते ॥ ४७ ॥ ब्रह्मसूर्य्यंसमम् ॥ ब्र ह्मसूर्य्यंसमुज्ज्योतिर्द्यौः संमुद्रसंमꣳसरः ॥ इन्द्रः पृथिव्यैव्वर्षीयान्न्गो स्तुमात्त्रानविंद्यते ॥ ४८ ॥ पृच्छामित्वा ॥ चितयेंटवसखयदित्त्वम

गोस्तुमात्रानविद्यते गवाह्यियज्ञोधार्यते सजातःकारणम् भवतीत्येतदभिप्रायम् । पृथिवीवा-गोः ॥ ४८ ॥ (१) ब्रह्मोद्गातारम् पृच्छति पृच्छामित्वा । पृच्छामित्वाभवन्तम् चितये । चितोसंज्ञाने

(१) का० ब्रह्मोद्गातारं पृच्छति पृच्छामीति । चकाराच्चतुर्ऋग्भिः सदसि ब्रह्मोद्गातारौ संवदेते ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

परिज्ञानाय। हेदेवसख उद्गातः। यदित्वम् अचष्टःसन्मनसा प्रश्नविवेचनाय सूक्ष्मान-
र्थान् जगन्यअवगच्छसि। येषुविष्णुः यज्ञःविषुपदेषुगार्हपत्याहवनीयदक्षिणाग्निषु आदृष्टः
यजेरेतद्रूपम्। तेषुविश्वंभुवनम् भूतजातम्। आविवेश इतनेति। प्रश्नेप्लुतः ॥ ४९ ॥
प्रत्याह। अपितेषु तेषु अहमस्मि अपित्वञ्चेत्यपिशब्दः। तेषु गार्हपत्याहवनीयदक्षिणाग्निषु।

तन्मनसाजुगन्थं ॥ येषुविष्णुस्त्रिषुपदेष्वेष्टुस्तेषुविश्वम्भुवनमा
विवेशाऽ ॥ ४९ ॥ अपितेषु ॥ त्रिषुपदेष्वस्मिन्येषुविश्वम्भूवन
माविवेश ॥ सद्यःपर्येमिपृथिवीमुतद्यामेकेनाङ्गेनदिवोऽ अस्यपृष्ठ
म् ॥ ५० ॥ केष्वन्तः ॥ पुरुषेऽआविवेशकान्यन्तःपुरुषेऽअर्पिता

विषुपदेषु। अहमस्मित्वञ्च केषु। येषुविश्वम्भूतजातम् आविवेश। आविष्टम्। यत्पुनरेतदुक्त-
मृषता यदित्वमत्रमनसा जगन्थेति। अत्रब्रूमः। सद्यःएककालमेव। पर्येमिपरिगच्छामि पृथि-
वीमुतअपिचद्याम् एकेनअङ्गेन मनसाअसादिवः पृष्ठञ्च किमुतभूतजाति तत्राविष्टानीति ॥ ५० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उद्गातारं ह्वयिष्यन्तं पृच्छति । केऽस्यन्तः । केषु अन्तर्मध्येपुरुषः आविवेशआविष्टः प्रविष्टः । कानिचान्तः मध्येपुरुषेअर्पितानि । एतत् हेब्रह्मन् उपवक्ष्यामसि । वक्ष्यामीत्याधान्ये । दृष्टपुराह्वानपूर्वंसंहर्षे वर्तते । उपसङ्गम्याह्वयेत् क्षिप्रमाहूहूच्छ्रामिभवन्तम् । किंस्विन्नः किंपुनरस्माकम्प्रतिवोचसि

नि ॥ एतद्ब्रह्मन्नुपवक्ष्यामसित्त्वाकिꣳस्विन्नुꣳप्रतिवोचास्यत्वं ॥ ५१ ॥ पञ्चस्वन्तः ॥ पुरुꣳषुऽआविꣳवेशꣳतान्यन्तःपुरुꣳषेऽअर्पꣳितानि ॥ ए तत्त्वात्वꣳप्रतिमन्वानोऽअꣳस्मिन्नमाययाभवꣳस्युत्तꣳरोमत् ॥ ५२ ॥ [८] कास्विꣳत् ॥ कास्विꣳदासीत्पूर्व्वचित्तिꣳकिꣳस्विꣳदासीद्बृहद्वयꣳः ॥ का

मध्येपुरुषआविवेश । किंच तानिप्राणाधीनानि करणानि अन्तःपुरुषेअर्पितानि । एतत् त्वाभ-वन्तम्प्रतिमन्वानः प्रतिजानानः अस्मिअवस्थितः । नचमायया प्रज्ञया भवसिउत्तरः उद्गातृतरःमत् प्रतिब्रवीषि अत्रप्रश्ने ॥ ५१ ॥ प्रत्याह । पञ्चस्वन्तः पञ्चस्वितिप्राणाःख्यायन्ते । पञ्चसुप्राणेषु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मत्तःमामपेच्य ॥ ५२ ॥ (१) होताध्वर्युंपृच्छति । कास्विदासीत् ॥ ५३ ॥ प्रत्याह । द्यौरासीत् ।

व्याख्यातौ ॥ ५४ ॥ अध्वर्युर्होतारम्पृच्छति । काईमरे ईमितिचकारार्थे अरेइत्यामन्त्रितवि-

स्विंदासीत्पिलिप्पिलाकास्विंदासीत्पिशङ्गिला ॥ ५३ ॥ द्यौरांसी

त् ॥ द्यौरांसीत्पूर्वचित्तिरप्रथ्वंऽआसीद्बृहद्वयः ॥ अविंरासीत्पिलि

प्पिलारात्रिंरासीत्पिशङ्गिला ॥ ५४ ॥ काऽईम् ॥ काऽईमरेपिशङ्गि

लाकाऽईङ्कुरुपिशङ्गिला ॥ काऽईमास्कन्दंमर्षतिकाऽईम्मन्थाँव्विसंर्प्प

ति ॥५५॥ अजारें ॥ पिशङ्गिलाप्रथ्वावित्कुंरुपिशङ्गिला ॥ शुशऽ

षयःउमावपिनियातौ । काचअरेहोतः पिशङ्गिला काचकुरुपिशङ्गिला । कश्चआस्कन्दम् अर्ष-

तिकश्च पत्यांविसर्प्पति ॥ ५५ ॥ प्रत्याह । अजारेअजानित्यारात्रिः अरेअध्वर्यो पिशङ्गिला ।

(१) का० पुनः पूर्वावपरेणोत्तरवेदिं काखिदिति । ततः सदसो निष्क्रम्य हविर्धानस्य पुर उत्तरवेदेः पश्चादुपविश्य पूर्वौ पूर्वोक्तौ होत्रध्वर्यू चतुर्ऋग्भिः संवदेते इति सूत्रार्थः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

साक्षिपिशंरूपम् गिलतिभक्षयति। सहितस्याःप्रभावः। श्वावित् सेधाउच्यते वृकपिशंगिला। क्रव्याउपलभ्यो पलभ्यपिशंरूपंगिलति भक्षयतीत्साकुरुपिशंगिला। साक्षिशतमूलानाम् स्कोभक्षणाय कुक्षौस्थापयति। शतंचभक्षयति। सहितस्याःप्रभावः। शश्वच्चआस्कन्दम् अस्कन्दास्कन्द्यमर्षतिगच्छति। सहितस्यास्वभावः। अहिश्च स्वकीयंपन्थानम् विसर्पतिविकुर्वन्गच्छति ॥ ५६ ॥

आस्कन्दंमर्षत्यहिःपन्थाँविसंर्पति ॥ ५६ ॥ कत्त्यस्य ॥ विष्टाःक त्यृचराणिकतिहोमासःकतिधासमिद्धः ॥ यज्ञस्यत्वाविदथापृच्छम त्वकतिहोतारऽऋतुशोयजन्ति ॥ ५७ ॥ षडस्य ॥ विष्टाःश्रुतम्

व्विश्वश्वेदाऽ ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिऽस्वस्तिनोबृहस्प्र तिर्दधातु ॥ १९ ॥ पृषदश्वामरुतः ॥ पृषदश्वामरुतऽपृश्निन्नमात रःशुभंयावानोव्विदथेषुजग्मयऽ ॥ अग्निजिह्वामनवःसूरचक्षसो व्विश्वश्वेनोदेवाऽअवसागमन्निह ॥ २०॥ भद्रक्रर्णेभिऽशृणुयामदेवाभ

आट्टगमहनेतिकिः। यद्वृत्यंभूतामरुतस्ते अवसाअन्नेन हविर्लक्षणेन आहूताः सन्तः आगमन्-आगच्छन्तु दूहेत्यनुषंगः। येच अग्निजिह्वा अग्निजिह्वा अग्निमुखाहुतादाद्वृत्यर्थः। मनवः चतुर्दशतेच अवसागमन्निह। येच सूरचक्षसः आदित्यदर्शनाः विश्वदेवाः तेच नःअस्माकम् अवसागमन्निहयज्ञे ॥ २० ॥ भद्रक्रर्णेभिः। भद्रमनुकूलं कर्णेभिः कर्णाभ्यांशृणुयाम हेदेवाः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भद्रम्पश्येम अक्षभिः अक्षिभ्या हियजत्राः यजनीयाः। किञ्च। स्थिरैरङ्गैः अशिथिलैः अङ्गैः। तुष्टुवांसः देवान्स्तुतवन्तः। तनूभिः भार्यापुत्रपौत्रादिकाभिस्तनूभिः सहिताः व्यसेमहिव्यश्नुवामहि। देवैर्हितं देवैर्यत् स्थापितं मनुष्याणामायुः तत्व्यश्नुवामहि ॥ २१ ॥ शतमित्। शतमपिशरदःअन्ति अन्तिकेसमीपेभवथ हेदेवाः। आकल्पकालमित्यभिप्रायः। ऋषिभिरुदितमेतत्

द्रम्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंयदायुः ॥ २१ ॥ शतमित् ॥ शतमिन्नुशरदोऽअन्ति देवायत्रानश्चक्राजरसंन्तनूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमा

यत्रयस्मिन्शरदांशते नःअस्माकं यूयञ्चक्रकृतवन्तः जरसंजरान्तनूनाम जरानिमित्ताम् शक्तिमित्यभिप्रायः। किञ्च। पुत्रासोयत्रपितरोभवन्ति पुत्राअग्नयः यत्रशरदांशते। यजमानस्यपितरो जनितारोभवन्ति। तदुक्तम् तत्रवैप्रजापतिः प्रजाः सस्रुजइत्युपक्रम्य। तस्माज्जनयित्वाविश्रहीति। यत्रपितरोभवन्ति एतदप्युक्तमेव। सयत्रम्रियते पत्रैनमग्ना वभ्यादधाति तदेषोऽग्नेर-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धिज्ञायते सएषपुत्रव: सम्पिताभवति । अथवापुत्रा एवपितृणामौर्द्ध्वदेहिकं कुर्वाणा: पितरोयत्रसं पद्यन्ते तदपिशरदांशतमन्तिक एवेति । यतएवमतोब्रूम: मानोमध्यारीरिषता युर्गन्तो: । मारीरिषत् माहिंसीष्ट नोस्माकं मध्यामध्ये अकालएवआयु: । गन्तो: गन्तृगमनशीलम् । उक्तञ्च सञ्चित्य सञ्चित्यतमुग्रदण्डं मृत्युमनुष्यस्य विचक्षणस्य । वर्षासुसिक्ताश्चर्मवन्या: सर्वेप्रपन्ना: शिलीभवन्तीति ॥२२॥

नोमध्यारीरिषतायुर्गन्तोः ॥ २२ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासपितासपुत्रः ॥ विश्वेदेवाऽअदितिःपञ्चजनाऽअदितिर्जातमदितिर्जनित्वम् ॥ २३ ॥ [१०] मानः ॥ मानोमित्रश्चोव

सर्वात्मक त्वेनादितिं मंचहुकस्तौति अदितिश्च अन्तरिक्षम् अदितिश्चमाता साचपिता साचपुत्र: सङ्गतिकृान्दसोलिङ्व्यत्यय: विश्वेचदेवा: पंचजना: मनुष्याश्चअदिति: किम्बहुनोक्तेन अदितिरेवजातंभूतम् अदितिरेवजनित्वंजनिष्यमाणम् अथवानैवादितिरनेनोच्यते किम्पुन: एतान्येवद्यौ: प्रभृतीनिअदानानिमहाभाग्ययुक्तानीति २३ मान: । अश्वस्तोमीयंजुहोति । द्वाविंशत्यक्तग्भिस्त्रिष्टु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ब्भिः। तृतीयाषष्ठ्यौजगत्यौ। दीर्घतमाऋषिः। अश्वस्यस्तूयमानत्वात्या तेनोच्यते सादेवतेतिन्यायेन अश्वोदेवता। तृतीयःपादःप्रथमंव्याख्यायते यच्छब्दयोगात्। यत्वाजेनअश्वस्य। देवजातस्यदेवैर्जनितस्य। सूरादश्वंवसवोनिरतष्टदृत्येतदभिप्रायम्। सप्तेःसरणस्य। प्रवक्ष्यामः उच्चारयामः। विदथे यज्ञे वीर्याणि चरित्राणि तत्मापरिख्यन मागर्हन्तु नः अस्माकंदेवाःस्तुत्याः नत्वश्वप्रभृतयस्तिर्यङ्ग-

रुंणोऽअर्य्यमायुरिन्द्रंऽऋभुक्षामरुतःपरिंख्यान्॥ यद्वाजिनोंदेवजांत स्यसप्तेः प्रवक्ष्यामोंविदथेंवीर्य्याणि॥ २४॥ यन्निर्णिजां॥ य न्निर्णिजारेक्णंसाप्प्रावृंतस्यरातिङ्गंभीताम्मुंखतोनयंन्ति॥ सुप्प्रांङ्

इतिस्याद्गर्हा। अतोब्रवीमिमापरिख्यन्निति। यद्यपिगर्होचिताः तथापिअश्वादिरूपेणदेवानामेवस्तुतत्वादित्याशयः। केते देवाः मित्रःवरुणः अर्यमाअयुर्वायुः वकारलोपेन। इन्द्रश्च ऋभुक्षामरुतश्च॥ २४॥ यन्निर्णिजा। यदानिर्णिजा निर्णेजनेनोदकस्नानेन संस्कृतस्य आलम्भनकालेयत्स्नापनमश्वस्यतदेतदुक्तम्। तथारेक्णसा रेक्णइतिधननामधनेनमणिकाख्येन प्रावृतस्यकै-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सरपुच्छेषुचितस्य अश्वस्य। सुवर्णान्मणीन्केसरपुच्छेषु पत्न्यआवपन्ति तदभिप्रायमेतत्। रातिन्दानम् आजासक्तुधानालाजालक्षणम् गृहीतांमुखतो नयन्ति। अश्वायराचिहुतशेषं प्रयच्छन्तीत्येतदभिप्रायम्। तत् तदा अश्वस्य सुप्राङ्सुष्ठुप्रगश्चनः अजःमेम्यत् मेम्यदिति-शकानुकरणम्। मेमेइतिशब्दंकुर्वाणः। विश्वरूपः नानावर्णः कृष्णग्रीवआग्नेयोरराटेपुरस्तादि-त्येतदभिप्रायमेतत्। किञ्च इन्द्रापूष्णोः इन्द्रस्यपूष्णश्चप्रियंपाथः अन्नंपशुलक्षणम् अप्येति अभ्या-

जोमेम्यंहिप्रश्नवंरूपऽइन्द्रापूष्णोः प्रियमप्येतिपाथः ॥ २५॥ एष च्छागः ॥ पुरोऽअश्वेनवाजिनापूष्णोभागोनीयतेविश्वदेव्यः ॥

गच्छति। यदिहपठ्यते सौमापौष्णः श्यामोनाभ्याम् तदेवान्यस्यांश्रुतौपठ्यते इन्द्रापौष्णः श्या-मोनाभ्यामिति। तदयंमन्त्रोभिवदति। इन्द्रापूष्णोः प्रियमप्येतिपाथइति ॥ २५ ॥ एष-च्छागः। एषआग्नेयश्छागः पुरः अग्रतोस्थितः नीयते अश्वेनवाजिनाव्यापकेनसहितः। पू-ष्णश्च पोषकस्याग्नेश्चभागोभजनीयः नीयतेअश्वैःसह। सोपिपर्य्यग्यएव। विश्वेदेव्यः विश्वभ्यः सर्वेभ्योदेवेभ्यः हितः अग्नेःसर्वदेवात्मकत्वात्सर्वदेवप्रियत्वम्। कस्मात् अभि प्रियम् अभि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रेतंयत् । यच्चपुरोडाशम् । पुरोडाशङ्कर्तुम् अर्वत । अश्वेनसहितम् । अश्वस्तस्मिन्कालेसंज्ञप्यते पशुपुरोडाशः क्रियते तदेतदुक्तम् । त्वष्टाच एनमजम् । तदासौश्रवसाय शोभनान्तकरणाय जिन्वतिप्रीणाति । सहितस्याधिकारइति । २६ ॥ यद्वविष्यम् । यदाहविष्यम् ऋतुशःऋतावृतौ स्वचारिणंदेवयानम् देवानाम् प्रापणीयम् देवयानमार्गगामिनम्वा आदित्यवदनिवारि-

अभिप्रियंत्यत्पुरोडाशमर्वतात्वष्टेदेनꣳसौश्रवसायजिन्वति।२६।
यद्वविष्यम् ॥ यद्वविष्यमृतुशोदेवयानन्त्स्मर्मानुषाः पर्य्यश्वमन्नयन्ति ॥ अन्नांपूष्णऽप्रथमोभागऽएतियुज्ञन्देवेभ्यः प्रतिवेदयन्

तगतिंवा । त्रिःसंस्कृतम् । स्नापनंव्यंजनसुवर्णमणिकप्रवारैः मानुषःऋत्विग्यजमानाः परिणायन्तिअश्वम् । अचतत्रेत्यर्थः । तस्मिन्कालेपूष्णः पोषकस्याग्नेः प्रथमोभागोजाख्यःएतियज्ञम् देवेभ्यःप्रतिवेदयन् अजः स्वकीयेनशब्देन । चरकश्रुतौपूष्णो ललाटइतिपठ्यते तदभिप्राय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मेतत् ॥ २७ ॥ होताध्वर्युः । होतातत्रशंशिता सुविप्रइति संबन्धः । यस्मिन्यज्ञे होताविशंसिता । शस्त्राणामपिसाधु मेधावी साधुब्राह्मणोवा अध्वर्युश्च यस्मिन्यज्ञे आवयाः आभिमुख्येन वयतिकर्मणीत्यावयाः अग्निमिन्धः अग्निदीपकः ग्रावग्राभः । ग्रावग्राहः सोमाभिषवायग्रावग्रहणशीलः उतअपिशंसा । तेनयज्ञेन साध्वलङ्कृतेन स्वेष्टेन साधुदृष्टेनच । वक्षणाः

न्नुजः ॥ २७ ॥ होतांद्ध्वर्य्युः ॥ होतांद्ध्वर्य्युरावयाऽअग्निमिन्धो ग्रावग्राभऽउतशंस्तासुविप्रः ॥ तेनयज्ञेनस्वरङ्कृतेनस्विष्टेनव्व क्षणाऽआपृणद्ध्वम् ॥ २८ ॥ यूपव्व्रस्काऽउत ॥ येयूपवाहाश्चषालँ

नदीः देवानांतुष्टिकराः । पयोदधिपयसा पुरोडाशमांसैः । आपृणध्वम् आपूरयध्वम् अक्षपणान्दातव्यमित्यभिप्रायः ॥ २८ ॥ यूपव्रस्काउतयूपं येव्रश्चन्ति तएवमुच्यते । उतअपिच येयूपवाहाः यूपंयेवहन्ति । चषालंयेअश्वयूपायतक्षति येजनाः अश्ववन्धनयूपायचषालं यूपाग्रभागन्तक्षति । तक्षन्तीति प्राप्तेश्छान्दसमेकवचनम् साधुसम्पादयन्ते । येचअर्वतेअश्वायपचनम्प-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

च्यतेनेनेतिपचनकाष्टादिसम्भरन्ति । उतोअपिच तेषाञ्जनानां संबन्धिनी अभिगूर्तिः गुरीउद्यमने । आगूरणमभिगूर्त्तिः स्वकालेसर्वं करणीयमितिबुद्धिः इन्वतुव्याप्नोतु ॥ २९ ॥ उपप्र । उपप्रागात् उपैतुसुमत् स्वयमित्यर्थइतियास्कः । मेममअधायिनिहितम् यत् मत् मननम् किंतदितिचेत् । देवानाम्आशाः शंसनानि साधुसाध्वयं पशुरागच्छेदित्येवमादीने । उप-

ष्येऽअश्वयुपायुतक्षंति॥येचार्वंतुपचंनꣳसुम्भरंन्त्युतोतेषांमुभिगूंर्त्ति र्न्नऽइन्वतु ॥ २९ ॥ उपप्प्र ॥ उपप्प्रागांत्सुमन्मेधायिमन्म्मदेवा नामाशाऽउपंवीतपृष्ठꣳ ॥ अन्वेनंविप्राऽऋषंयोमदन्तिदेवानांम्पु ष्टेचक्रमासुबन्धुम् ॥ ३० ॥ यद्वाजिनः ॥ यद्वाजिनोदामंसन्दानम

आगतः वीतपृष्ठः साधुपोषणेन प्राप्तपश्चाङ्गागः । कामितपृष्ठोवा । अश्वपृष्ठं हिसर्वएवारोढुंकामयन्ति । यतएवमतोब्रवीमि । अन्वेनंविप्राऋषयोमदन्ति । अनुमदन्तिअनुमोदन्ति एनमश्वं विप्राऋषयश्च । स्वयञ्च देवानां पुष्टेपोषणाय । चक्रमकृतवन्तः । सुवन्धुंशोभनवन्धनम् शोभनार्थवादंवा ॥ ३० ॥ यद्वाजिनः । वेजनवतः । दामग्रीवावन्धनरज्जुः सन्दानंसम्यगवच्छेदकं पादव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्धनम् अर्वतः अश्वस्य। पञ्चशीर्षण्या शिरसिवद्वानियोजनीया रज्जुः अस्याश्वस्य। यद्वाघः पादपूराणे ।अस्याश्वस्य प्रभृतम्प्रहृतं निच्चिप्तम् आस्येमुखे तृणम् सर्वाणितानि तेतव हेय-जमान। अपिदेवेषु अपिप्रजापतये अस्तु। सन्त्वितिप्राप्तेवचनव्यत्ययः॥ ३१॥ यदश्वस्य। यत्-अश्वस्य क्रविषः अश्वाङ्गभूतस्यक्रव्यस्यमांसस्य क्रव्यंविकृन्ताज्जायतइतिनैरुक्ताः। अङ्गम्।

व्वंतोयाशीर्षण्यारशनारज्जुरस्य॥ यद्वांघास्प्रभृंतमास्ये तृणꣳ सर्व्वा तातेऽअपिंदेवेष्ववंस्तु॥ ३१॥[८] यदश्वस्य॥ क्रविषोम च्चिकाश यद्वास्वरौस्वधितौरिप्तमस्तिं॥ यच्चस्तंयोःशमितुर्य्यन्नखेषुसर्व्वाता तेऽअपिंदेवेष्ववंस्तु॥ ३२॥ यदूवंड्यम्॥ यदूवंड्यमुदरंस्याप्वातिय

मच्चिकाआश अशितवती। यद्वा। स्वरोस्वधितौरिप्तमस्ति। यच्च स्वरोपश्वच्छनकाले स्वधि तौशासेछेदनकालं लिप्तेलग्नमस्ति। यच्च हस्तयोशमितुः रिप्तम् यच्चनखेषुरिप्तम्। सर्वाताते अपिदेवेष्वस्तुइतिव्याख्यातम्॥ ३२॥ यदूवध्यम् यत् ऊवध्यम् भच्चितमपरिणत मामाशयस्थमू

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वध्यमुच्यते। उदरस्य अयुतंपृथग्भूतम् अपवातिगन्धायते। यश्च आमस्यपक्वस्यक्रविषः मांसस्यगन्धः अस्तिविद्यते। सुकृतातच्छमितारःक्रणवन्तु। तत्सर्वंशमितारः विशसनकर्तारः सुकृतानिसुसंस्कृतानिदोषरहितानि कुर्वन्तु। उतअपिच मेधंमेध्यं यज्ञार्हम्। श्रृतपाकं देवयोग्यपाकंपचतु अतिपक्वमीषत्पक्वञ्चमाकुर्वंत्वित्यर्थः॥ ३३॥ यते। शूलेसशेषश्रपणम् तदभिवदत्यंयं

ऽआमस्यक्रविषोगन्धोऽअस्ति॥ सुकृतातच्छमितारः क्रणवन्तूतमेधंꣳश्रृतपाकम्पचन्तु॥ ३३॥ यत्ते॥ यत्तेगात्रादग्निनापच्यमानादभिशूलन्निहतस्यावधावति॥ मातङ्गम्यामाश्रिषन्मात्रणेषुदेवे

मन्त्रः। यच्चतेतवगात्रादवयवात् अग्निनापच्यमानात् ऊष्मरूपं रसोवा अवधावति गच्छतितथानिहतस्य निशेषेणहतस्य यदङ्गरसरूपम् अभिशूलंशूलमभिलक्ष्यमांसादुत्कृष्टं धावतिगच्छति। माश्रिषत्माश्लिषत् तदङ्गभूम्याम् माचत्तणेषु। किंतु देवेभ्यः तत् उशद्भ्यः वशकान्तौ

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कामयमानेभ्यः रातन्दानम् अस्तु ॥ ३४ ॥ येवाजिनम् । येजनाः वाजिनमश्वंपरिपश्यन्तिपक्वंसन्तम् । येच एनमश्वम् आहुः । किमाहुः सुरभिरयमश्वः अतोनिर्हर किंचिदस्मभ्यंदेहीति । इतिशब्दःप्रकारवचनः येच अर्वतोश्व रयसंबधिनीं मांसभिक्षाम्उपासते हुतशिष्टमांसयाञ्चांकांक्षते । उतोतेषाम् अपिच तेषांसंबन्धि नीया अभिगूर्त्तिः सा नः अस्मान् इन्वतु व्याप्नोतु । यद्वादेवपरोयं मन्वो-

ब्भ्युस्तदुशञ्जोरातमस्तु ॥ ३४ ॥ येव्वाजिनम् ॥ येव्वाजिनम्परिपश्यं न्तिपक्वंय्याऽइमाहुःसुरभिर्न्निर्हरेति ॥ येचार्व्वंतोमाऽंसभिक्षामुपा संताऽउतोतेषांमभिगूर्तिर्न्नऽइन्वतु ॥ ३५ ॥ यन्नीक्षणम् ॥ यन्नीक्षंण

व्याख्येयः । येदेवाः वाजिनंपरिपश्यन्तिपक्वम् कदाहोष्यतीति विलंवंदृष्ट्वा । येचसुरभि रयमश्वोतनिर्हरनिःशेषेणास्मभ्यंदेहीत्याहुः । येचार्वंतो मांसभिक्षामुपासतेलिप्सते उतोतेषामभिगूर्त्तिन्नइन्वतु । वयन्तुदेवानामन्यभूताइत्यभिप्रायः ॥ ३५ ॥ यन्नीक्षणम् । यत्नीक्षणम् नितरामीक्षाते शृताश्च तव संबन्धिनीर्था इतियेनदध्यादिना तत् नीक्षणम् । मांस्पचन्याः मांसस्यपचियुट्घजोरित्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कारलोपः । उखायाः यानिचपात्राणि यूषणः वसायाः यूषशब्दस्ययूषन्नादेशः षष्ठ्रेकवचने उपधालोपश्च । आसेचनानिआसिच्यतेयेष्वित्यासेचनानि । ऊष्मण्याऊष्मशब्दस्यधारणार्थेयत्-प्रत्ययः । यानिचऊष्मण्यानि । पिधाना । पिधानानिच चरूणांस्थालीनाम् । येच अंकाः अंकोपलक्षकाः । शरीरवचनोङ्कशब्दः । याश्वसूनाः अश्वविशसनाधिकरणभूताः वेतसमय्यः

म्माँस्प्पचंन्त्याऽउखायायापात्चांणियूषणाऽआसेचंनानि ॥ ऊष्म्मु
ण्यापिधानांचरूणामङ्काःसुनाःपरिंभूषन्त्यश्वंम् ॥ ३६ ॥ मात्वां ॥
मात्वाग्निर्ध्वंनयीद्धूमगंन्धिर्म्मोखाभ्राजंन्त्यभिविक्तजग्घ्रिः ॥ ङुष्टँ

तानिसर्वाणि । परिभूषन्ति । भूषअलङ्कारे । अलंकुर्वन्ति । परिरक्षन्तिवा । अश्वम् ॥ ३६ ॥ मात्वाग्निः । मात्वा हेअश्व अग्निःध्वनयीत् । ध्वनिःशब्दकर्मा शब्दंकारयेत् कथंभूतः धूमगंधिः अल्पधूमावरणः मांसंहिपचन्नग्निर्दहन्नल्पधूमावरणोभवति । तच्चदह्यमानंसमसिमाशब्दङ्करोत्यतएवमुच्यते । माच उखाभ्राजन्ती संदीपिता अत्यन्ताग्निसंयोगेन । अभिविक्त ओविजी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भयचलनयोः अभिविनक्तु । अभिनष्टाविदीर्यंतवा । उड्डावाबुड्डा मांसरसंतदिहोच्यते । जग्रिः गन्ध-ग्रहणशीलाउखा । नन्वचेतनोखा कथंगन्त्र्यञ्जिघ्रति । उच्यते । अधिष्ठात्र्योत्र देवताः सन्तीति पुर-स्तात्प्रतिपादितम् तच्चात्रपुनः स्मार्य्यते इष्टंयोगेनसङ्गतीकृतम् वीतंकामितम् अभिगूर्तम् अभ्यु-द्यतम् वयट्कृतं चादानकाले । यद्वा इष्टंप्रयाजैः वीतमाप्रीभिः पर्यग्निकृतम् अभिगूर्त्तं येय-जामह इत्यागूर्त्योक्तम्वषट्कृतं वषट्कारेणसंस्कृतम् । तन्नाद्दशम् देवाएवदेवासः प्रतिगृ-

व्वीतमभिगूर्तं व्वषट्कृतन्तन्देवासऽप्रतिगृब्भण्त्यश्वम् ॥ ३७ ॥

निक्रमंणन्निषदंनम् ॥ निक्रमंणन्निषदंनंव्विवर्तंनंयच्चपड्वीशमव्वंतऽ॥

भ्ल्लन्तिप्रतिगृल्लन्ति अश्वम् ॥ ३७ ॥ निक्रमणंनिषदनम् । निक्रमणंगमनम् वसतिस्थानात् । निषदनं तत्रैवस्थितिः । विवर्तनंभ्रमणम् । यान्येतानि चेष्टितानि । यच्चपड्वीशम् । पादे-षुविशतीति पड्विशम्पादवन्धनमुच्यते । अर्वतःअश्वस्य यच्च पपौ पीतवानुदकम् । यच्चघासिं यवसंजघास । घस्तृअदने भक्षितवान् । सर्वाणितानि निक्रमणादीनि तेतव हेअश्व अपि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देवेषु अपिप्रजापतये अस्तुसन्तु तान्यपि निरर्थकानिमाभूवन्नित्याशयः ॥ ३८ ॥ यदश्वाय । यत् अश्वाय संज्ञप्यमानाय वासःउपस्तृणन्ति । सर्वतआच्छादयन्ति । यच्च अधीवासम् उपर्याच्छादनयोग्यं वासउपस्तृणन्ति । यानिच हिरण्यानिउपस्तृणन्ति अस्मैअश्वाय । यच्च संदा-

यच्चपपौयच्चघासिञ्जघासुसर्व्वातातेऽअपिदेवेष्वस्तु ॥ ३८ ॥ यद श्वाय॥यदश्वायवासंऽउपस्तृणन्त्यधीवासंह्याहिरण्यान्यस्मै॥ सन्दानमर्व्वन्तम्पड्वीशम्प्रियादेवेष्वायामयन्ति ॥ ३९ ॥ [८] यत्ते ॥ सादेमहंसाशूक्तस्य * पाष्ण्यर्याव्राकश्यावातुतोदं॥ स्रुचेवताहुविषो

नंसन्दीयतेनेनेतिसंदानं शिरोबंधनम् अर्वन्तम् अर्वतेड्तिविभक्तिव्यत्ययः अश्वायेतिसमानाधिकरण्यात् । यच्च पड्वीशम्यादवासः एतानिप्रियाणिदेवेषु आमयन्तिगमयन्ति ॥ ३९ ॥ यते सादे । हेअश्व यत् तेतव सादे । सीदन्त्यश्ववाराअस्मिन्निति सादोश्वपृष्ठम् तस्मिन्सादे

* पाष्ण्यर्ये त्यत्र परन्तुरेफह काराभ्यामिति मूत्रेण षकारस्य द्वित्वन्नभवति कुतः ऊष्मान्तस्थाभ्यश्चस्मर्ग: ॥ एतेभ्यः परः स्मर्गो द्विरुच्चारयत् । तेनरेफषकारौद्वौणकारावितिसिद्धम् प्रा० अ० ४ । सू० १०२ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अवस्थितोश्ववरः । महसामहत्वेनान्वितःसन् कथंभूतस्यशुक्रतस्य शब्दानुकरणमेतत् शुल्कारंकुर्वतः अनन्तरम् पाषाणावाकशयावातुतोद । तुदव्यथने । तुदतिव्यथयति सुचाइव तातानि यथासुचाहविषः हविरितिविभक्तिव्यत्ययः अध्वरेषु यज्ञेषु जुह्वति एवंसर्वाणि तेतव ब्रह्मणात्वयीलक्षणेनसूदयामिचारयामि आहुतित्वेनकल्पयामीत्यर्थः ॥ ४० ॥ चतुस्त्रिंशत् । चतुस्त्रिंशत् वङ्क्रयः । वाजिनः वेजनवतोश्वस्यदेववन्धोः देवानांप्रियस्य । देवावन्धवोस्यइतिवा भावीदेवव-

ऽअध्वरेषुसर्व्वांतांतेऽब्रह्मणासूदयामि ॥ ४० ॥ चतुंस्त्रिꣳशद्वाजिनः॥ चतुंस्त्रिꣳशद्वाजिनोदेवबंन्धोर्व्वङ्क्रीरश्वस्यस्वधितिꣳसमेति ॥ अच्छिद्रागात्राव्वयुनाकृणोतुपरुꣳष्परुरनुघुष्याव्विशस्त ॥ ४१ ॥ एकु

न्धुः । देवोह्यसौभविष्यति एवंभूतस्याश्वस्य वंक्रीःवंक्रयः उभयपार्श्वस्थास्थीनिस्वधितिः छेदनसाधनोसिः समेतिएकमकृत्वासङ्गच्छति यतः अतोब्रवीमि । अच्छिद्रागात्रा अक्षिद्राणि अनवखण्डितानि गात्रागात्राणि वयुनाप्रज्ञानेन कृणोताकुरुत हेशमितारः । किञ्च परुःपरुः पर्वपर्व हृदयाद्यंगम् अनुघुष्यइदमिदमितिसंशन्यविशस्त विसनङ्कुरुत उत्तरार्द्धस्यैवमन्त्ररूपसंबन्धः ॥ ४१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एकस्त्वष्टुः । एकः । अश्वस्याविशस्ताविशसितासंवत्सरः । तदुक्तम् संवत्सरस्यतेजसेति त्वष्टुः आदित्यादुत्पन्नस्याश्वस्य तदुक्तम् सूरादश्वंवसवोनिरतष्टदिति । द्वायन्तारा । द्वौनियन्तारौ अहोरात्रौद्यावापृथिव्यौवाभवतः । तथर्तुः द्वितीयोमासानांनियन्तेतिशेषः । एवमश्वस्याविशसितॄन् उक्त्वा अथेदानींस्वकीयंकर्माध्वर्युराह । यातेयानि तव हेअश्व गात्राणामङ्गानाम् ऋतुथा

स्त्वष्टुः॥ एकस्त्वष्टुरश्वस्याविशस्ताद्वायुन्तारांभवतस्तथर्ऽऋतुः॥
यातेगात्रांणामृतुथाकृणोमितातापिण्डांनाम्प्रजुंहोम्यग्नौ॥ ४२॥
मात्वांतपतिप्रयऽआत्तमाप्रियन्तम्मास्वधितिस्तन्वऽआतिष्ठिपत्ते॥

ऋतावृतौ कालेकालेवंधनानि क्रृणोमि करोमि। तातातानितानि पिण्डानांमांसपिण्डानां मध्येप्रजुहोमि प्रक्षानानुरोधेनजुहोमि। अग्नौ॥ ४२॥ मात्वातपत्। मात्वान्तपत्। त्वाश्वेनाचविज्ञानात्मोच्यते सुखदुःखयोर्भोक्तां प्रियआत्माप्राणउक्तः। सहिश्रुतौ प्रिमित्येतदुपासीतेत्युक्तः। देवानाम् पियन्तम् देवलोकगमनप्रवृत्तं सन्तम्। माचस्वधितिः शस्त्रंतन्वःशरीरस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अतिष्ठिपत् अस्थापयत् एकादशमवदानभूतम् तेतव। माच तेतव गृध्नुः मांसग्रहणेगर्द्धालु र्लुब्धः। अविशस्ताविशसने अकुशलः। अतिहायअतिक्रम्य। छिद्राछिद्राणिगात्राणि असिना-मिथूकः मिथ्याअकार्षीत् ॥ ४३ ॥ नवै। नवाउएतदिति व्याख्यातम्। अन्यच्च हरीन्द्राश्वौ तेतव। युंजायोजनार्हौ वोडारौ प्रतिधुरौअभूताम् पृषतीच मरुतांसंवन्धिनावश्वौ प्रतिधुराव-

मातेगृध्नुरविशस्ता * तिहायछिद्रागात्राण्यसिनामिथूकः ॥४३॥ न वै ॥ नवाउएतन्मित्रयसेनरिष्यसिदेवाꣳ ॥ इदंषिपृथिभिःसुगेभिः ॥ हरीतेयुञ्जापृषतीऽअभूतामुपास्थाद्वाजीधुरिरासभस्य ॥ ४४ ॥

भूताम्। तदुक्तम् अश्वरथयाने युंजन्त्यश्वकाम्याहरीइति। एभिर्दिव्यैस्त्वंसमानं लोकंसंज्ञात-इत्यभिप्रायः। एनमुपश्रुत्य स्वयमेव उपास्थात् उपस्थितः वाजीधुरिरासभस्य अश्वसंवन्धिनः। रासभावश्विनोरित्यादिष्टं प्रयोजनम् ॥ ४४ ॥ इदानींयाच्ञा। सुगव्यन्नः। शोभनगव्यं नोस्माकं

* अतिहायेत्यत्रापितुक् न भवति यस्यातिहाये त्यादियुक्तत्वात्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वाजीकृणोतुकरोतु । स्वश्व्यंशोभनाश्वञ्चकरोतु । पुंसःपुत्रान्करोतु । दुहितरः पुत्राश्चपुत्रशब्देनोच्यन्ते इत्यतोविशेषणंपुंसइति । उतअपिच विश्वापुषम् सर्वसम्पोषकंरयिन्धनङ्करोतु । किञ्च अनागाः अनपराधम् त्वञ्च । नोस्माकम् अदितिर्देवमाताच करोतु । नैघंटुकोवाअदितिशब्दः । अनागास्त्वंनः अदितिःअदीनोश्वःकरोतु । किञ्च । क्षत्रंनोस्माकं वनताम् । करोत्यर्थेवनतिः ।

सुगव्यंन्नः ॥ सुगव्यंन्नोव्वाजीस्वश्व्यंम्पुंसः पुत्चाः ॥ उतविं श्वापुषंद्रयिम् ॥ अनागास्त्वन्नोऽअदितिः कृणोतुक्षत्रन्नोऽअश्वो व्वनताꣳहविष्मान् ॥ ४५ ॥ [६] द्रुमानु ॥ कुम्भुवंनासीषधामेन्द्रं श्चुव्विश्वेवेचदेवाः ॥ आदित्यैरिन्द्रःसगंणोमरुद्भिरस्मभ्यंम्भेषजा

करोतु । हविष्मान् । अश्वः । सर्वेअश्वावयवाः हवींषि ॥ ४५ ॥ द्रुमानु । षड्द्विपदाः त्रिराजः तिस्रोवैश्वदेव्यः । तिस्रआग्नेय्यः । द्विपदाउत्तमा जुहोतीतिश्रुतिः । नुकम्इतिनिपाता वनर्थकौ द्रुमानिभुवनानि भूतजातानि । सीषधाम साधयाम वयम् । ततोनन्तरम् इन्द्रःऐश्वर्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वान् विश्वेच देवाः आदित्यैः सहितः इन्द्रःसगणः मरुद्भिश्च सहितः अस्मभ्यमस्माकं भेष-

कंरत् ॥ युन्नश्चंनस्तुन्वुश्चप्रजाश्चांदित्यैरिन्द्रंःसहसौषधाति ॥४६॥ अग्नेत्त्व ॥ न्नोऽअन्तंमऽउतत्त्वातांशिवोभंवावरूथ्यः ॥ वसुंरग्नि र्वसुंश्रवाऽअच्छांनक्षिद्युमत्तंमꣳरयिन्दांꣳ ॥ तन्त्वांशोचिष्टदीदिवꣳ सुम्म्रायंनूनमीमहेसखिंभ्यꣳ ॥ ४७ ॥ [२]

इतिसंहितायाम्पञ्चविंशोऽध्यायः ॥ २५ ॥ [१५]

जाभेषजानि करत्करोत् । किञ्च यन्नश्च नोस्माकं तन्वश्च शरीरञ्च आदित्यैः सह इन्द्रः सौषधातिसाधयतु वश्यंकरोतु ॥ ४६ ॥ अग्नेत्वन्नइति व्याख्यातम् ॥ ४७ ॥

इति उव्वटकृतौ मन्त्रभाष्ये पञ्चविंशतितमोध्यायः ॥ २५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इषेत्वेतिप्रारभ्य दर्शपौर्णमासाग्निहोत्र पशु चातुर्मास्पा ऽग्निष्टोम वाजपेय राजसूया ग्निसौत्रामण्य श्वमेध संवङ्गामन्त्रा व्याख्याताः । नामाख्यातोपसर्ग निपातजनिता वाक्यार्थाश्च । अथेदानीं खिलान्यनुक्रमिष्यामः । अग्निष्टोमा ग्निसौत्रामण्य श्वमेध पुरुषमेध सर्व मेध पितृमेध प्रवर्ग्योपिनिषत् संवङ्गामन्त्राव्याख्येयाः तदुहोच्यन्ते । अत्रच येत्र संवङ्गाम-

* अग्निश्च ॥ पृथिवीचसन्नंतेतेमेसन्नंमतामुदोषायुश्चान्त रिक्षञ्चसन्नंतेतेमेसन्नंमतामुदऽआदित्यश्चद्यौश्चसन्नंतेतेमेसन्नं

न्त्रा स्तेषां तदेवार्षम् । असंवङ्गानान्तु आदित्यएव । आदित्यानीमानि यजूंषीतिवाआहुरितिश्रुतेः । याज्ञवल्क्योवा यज्ञवल्क्येनाख्यायन्त इतिश्रुतेः । अविनियुक्तानां मन्त्राणां लैङ्गिको विनियोगः तद्यथा अग्निश्च पृथिवीचेति सन्नसन्नतिमन्त्राः । लिङ्गंनाम प्रकाशन सामर्थ्यमुच्यते । योहि यमर्थंवदितुं समर्थः सतत्र श्रुत्याविनियुज्यते । अग्निश्च पृथिवीचसन्नते । सन्न-

(१) इषे त्वेत्यारभ्य दर्शपौर्णमासपितृयज्ञाग्निहोत्रोपस्थान पशुचातुर्मास्याग्निष्टोमवाजपेयराजसूयाग्निसौत्रामण्यश्वमेधस म्बङ्गा मन्त्रा व्याख्याताः । इदानींखिल्यान्युच्यन्ते

* अग्निश्चपंचदशोच्चात एकादशद्यौर्षाड्विर्ठ०शति ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मनंसन्नतिः प्रह्वीभावः । आनुकूल्येनप्रवृत्तिः । अग्निश्च पृथिवीच संभोगार्थंसंनते यस्मादतो- ब्रवीमि तेअग्निपृथ्वी मेमम सन्नमताम । अत्र णिचोलोपश्छान्दसः । सन्नमयितां वशवर्त्ति- नङ्करुताम्इत्यर्थः । अद इति पुरुषादेर्विशेषनामोपलक्षणम् द्वितीयान्तं चोपलक्षयतिकर्मभावात् । एवमुत्तरेष्वपियोजयम् । वायुश्चान्तरिक्षञ्च आदित्यश्च द्यौश्च आपश्चवरुणश्च । सप्तस ठ० सदः । परमात्मोच्यते । यस्यतव सप्तसंसदः सप्तसंसदानि प्रकृतानीत्येवम् अग्निपृथिवीवायवन्तरि-

मतामुदऽआपश्चुव्वरुणश्चुसन्नंतेतेमेसन्नंमतामुदः ॥ सुप्तसुꣳस दोंऽअष्टमीभूतसाधंनी ॥ सकांमाꣳ ॥ ऽअङ्गिनस्कुरुसुज्ज्ञानंमस्तु

क्षादित्यद्युलोकाम्बवरुणा न्तानि । यस्यच तव अष्टमीवभूव भूतानांसाधनीष्टथवी । नहि पृथि- वीमन्तरेण भूतानामु त्पत्तिरस्ति । तत्त्वं प्रार्थ्यसे । सकामान् अङ्गनाः कुरु सकामान्मा- र्गान् अस्माकंकुरु । यदाहि तैर्लभ्यते तदा सकामामार्गाः स्युः । संज्ञानञ्च सङ्गतञ्चज्ञानम् अस्तु मेमम अमुना । विशेषनामाभिप्रायमेतत् । विज्ञानात्मोच्यते । यस्य तव सप्तसं- सदः । मनश्च बुद्धिश्च पञ्चबुद्धीन्द्रियाणिच । अष्टमीच वाक्भूतसाधनी भूतप्रज्ञप्तिकरी ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तन्त्वांववीमि । सकामान् अध्वनःकुरु अस्माकम् सन्तानंच । अस्तु । मेमम अमुना ॥ १ ॥ यथेमाम् । यथा इमांवाचं कल्याणीम् अनुद्देजिनीम् दीयतांभुज्यतामित्येव मादिकाम् । आवदानि । जनेभ्योर्थाय । केतेजना इत्यतआह । ब्रह्मराजन्याभ्याम् ब्राह्मणाय राजन्यायच शूद्रायच अर्य्यायच अर्योवैश्यः । स्वायचात्मीयायच । अरणः अपगतोदकःपरइत्यर्थः । आवदानीति

मेमुनां ॥ १ ॥ यथेमाम्॥यथेमाँव्वाचंङ्कल्याणीमावदानिजनेभ्यꣳ ॥ ब्ब्रह्मराजन्याभ्याꣳशूद्रायचार्य्यायचस्वायचारंणायच ॥ प्प्रियोदेवानान्दक्षिणायैदातुरिहभूयासमयम्मेकामꣳ समृद्ध्यतामुपमादोनं

सर्ववसंवधयते ॥ प्रियोदेवानाम् । अवसानरहितानुष्टुप् । यथेमांवाचमिति यथाशब्दयोगात्तथा-शब्दोवाध्याहर्त्तव्यः । तथातेनप्रकारेणप्रियोदेवानां भूयासम् । दक्षिणायै दक्षिणायादातुश्च इहास्मिन्नेवकाले प्रियोभूयासम् अयमितिकामनामग्रहणम् । तद्यथाअयंग्रामलाभकामः अस्मै मेसमृध्यताम् । किंचउपमाअदः नमतु । अदइतियःकामइष्यतेसउच्यते । तद्यथाउपनमतु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मांप्रतिदेवदत्तः ॥ २ ॥ बृहस्पतेऽति बृहस्पतिसवेऽनया त्रिष्टुभाबृहस्पतिदेवतया ग्रहोगृह्यते गृह्यमदस्यार्षम् बृहस्पतेर्वा। हे बृहस्पते। अतिशयेन यत्द्रविणंधनम्। अर्य ईश्वरः अर्यश्व्दःस्वामिन्यन्तोदात्त वैश्येऽाद्युदात्तः। अर्हात्पूजयेत् । यच्चद्यु मद्विभाति । द्यु मत्द्यु तिमत् विभातिभासते। क्रतुमज्जनेषु । यच्च क्रतुमत्यज्ञवत् जनेषु विभातीत्यनुवर्त्तते यत्दीदयत्

मतु ॥ २ ॥ बृहंस्पतेऽअतिं ॥ बृहंस्पतेऽअतियदर्य्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेंषु ॥ यद्दीदयुच्छवंसऽऋतप्प्रजाततदस्मासुद्रविंणन्धेहिचित्रम् ॥ उपयामगृंहीतोसिबृहस्प्पतयेत्त्वैषतेयोनिर्ब्बृहस्प्प

शवसा यच्चदीप्यते शवसावलेन। रक्षितारोपि यस्यसन्तीत्यभिप्रायः। हेऋतप्रजात ऋतात्मत्यादविनाशिनः प्रजायतइतिऋतप्रजातः तत्संबुद्धौहेऋतप्रजात तत्द्रविणम् अस्मासु धेहिस्थापयंचित्रंनानारूपम्। उपयामगृहीतोसिबृहस्पतयेत्वा । एषतेयोनिर्बृ हस्पतयेत्वा। स्थापन-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मंत्रः ॥ ३ ॥ इन्द्रगोमन्। ताभ्यांगायत्रीभ्यामिन्द्राय गोमते गृह्णेगृह्यतेगोसवे। आदित्यस्याषँ याज्ञवल्क्यस्यवा। हे इन्द्रगोमन्। गोभिःसंयुक्त। स्तुतिभिर्वा। इहयज्ञे आयाहिआगच्छ एत्य चपिबसोमम् हे शतक्रतो वहुकर्मन् कथंभूतं सोमम् विद्यद्भिर्ग्रावभिः सुतम् दोअवखण्डने। अस्यशतरिविद्यन्तः तैः विद्याद्भिः विशेषेणावखण्डयद्भिः ग्रावभिः सुतमभिषुतं सोमम् ॥ उप-

तंयेत्वा ॥ ३ ॥ इन्द्रगोमन्॥ इन्द्रगोमन्निहायांहि * पिबासोमंꣳशत क्रतो ॥ विद्यद्भिर्ग्रावंभिꣳसुतम् ॥ उपयामगृंहीतोसीन्द्रांयत्त्वागो मंतऽएषतेयोनिरिन्द्रांयत्त्वागोमंते ॥ ४ ॥ इन्द्रायांहि ॥ इन्द्रायांहि

यामगृहीतोसीन्द्रायत्वागोमतेगृह्णामि। एषतेयोनिरिन्द्रायत्वा गोमतेसादयामि ॥ ४ ॥ इन्द्रा-यांहि। हेइन्द्रआगच्छ हेवृत्रहन्। वृत्रस्याहंतः एत्यचसोमम्पिव हेशतक्रतो वहुकर्मन्। कथंभूतंसोमम्। गोमद्भिः स्तुतिमद्भिः। ग्राव्णासंयुतैर्वा अंशुवचनोवा गोशब्दः ॥ ग्रावभिः

* पिबासोमम्पि बामुतस्यस्थामयोभुवोनू रणेशमोष्वेतिदण्डकसूत्रेणपिबासोममित्तात्रदीर्घन्निपात्यते प्रा० अ० ३। सू० १२८।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सुतमभिषुतम् उपयामेतिव्याख्यातम् ॥ ५ ॥ ऋतावानम् । तिस्रोवैश्वानरीया पुरोरुचः गायत्रीत्रिष्टुप्गायत्र्यः । अधस्तनएवऋषिः । ऋतावानं सत्यंव्रतं यज्ञवन्तमुदकवन्तंवा वैश्वानरम् ऋतस्यवा । उदकस्ययज्ञस्यसत्यस्यवा ज्योतिषश्चपतिम् । अथवा ऋतस्यसर्वगतस्य-

व्वृत्रहन्निपवासोमंशतक्रतो ॥ गोमंङ्गिर्ग्यावंभिःसुतम् ॥ उपयामगृहीतोसीन्द्रायत्त्वागोमंतऽएषतेयोनिरिन्द्रायत्त्वागोमंते ॥ ५ ॥ ऋतावांनंव्वैश्वश्वानरम् ॥ * ऋतावांनंव्वैश्वश्वानरमृतस्यज्योतिंषस्पतिंम् ॥ अजंस्रङ्घर्म्ममींमहे ॥ उपयामगृ'हीतोसिव्वैश्वश्वानरायंत्त्वैषतेयोनिंर्व्वैश्वश्वानरायंत्त्वा ॥ ६ ॥ व्वैश्वश्वानरस्यंसुमतौ ॥ स्यांमराजाहि

ज्योतिषः पति मधिपतिम् । अजस्रमअनुपक्षीणंधर्मम् अक्षरणंदीप्तंवाईमहेयाचामहे । आयज्ञसमाप्तिमितिशेषः सामंर्थ्यात् । उपयामेतिव्याख्यातम् ॥ ६ ॥ वैश्वानरस्यसुमतौ ।

* ऋतावान मित्यत्रअक्षर श्रिम मतिसुमत्तोत्तरादि सूत्रेण वकारेपरे ऋतेताकार स्यदीर्घोवि धीयते प्रा० अ० सू० ६८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्वितीयः पादः पूर्वं व्याख्यायते । यः वैश्वानरः राजादीप्तः हिकमिति निपातसमाहारोनर्थः । यश्चवैश्वानरः भुवनानांभूतजातानामभिश्रीः अभ्याश्रयणीयः सर्वोपकारसामर्थ्यात् । यश्च इतो जातः इतोऽरणितः कुतश्चिद्वा उत्पन्नः सन् विश्वमिदंसर्वमिदं विचष्टे अभिविपश्यति । यथादृष्टव्यं कर्मानुरूपेण । यश्चवैश्वानरः यततेस्पर्द्धते सूर्येणसहस्वकीयदीप्त्या तस्यवैश्वा-

कुम्भुवंनानामभिश्श्रीः । इतोजातोविश्वंमिदंविचष्टेवैश्वानु रोयंततेसूर्य्येण ॥ उपयामगृंहीतोसिवैश्वानरायंत्वैषतेयोनिंवैं श्वानरायंत्वा ॥ ७ ॥ वैश्वानरोनंः ॥ वैश्वानरोनंऽऊतयेऽआ

नरस्यसुमतौ कल्याणमतौ वयंस्यामेतिप्रार्थना । उपयामेतिसमंजसम् ॥ ७ ॥ वैश्वान-रोनः वैश्वानरोग्निः नोस्मान्ऊतये अवनायपालनाय आप्रयातु आगच्छतु परावतःदूरात् । योहिदूरादागच्छेत् आगच्छेदप्यसौसमीपादित्यभिप्रायः । केनआप्रयातु । उक्थेनस्तोमेन । वाह-सावाहनभूतेन । अन्यत्रापिस्तोमोवाहनइत्युच्यते । वाहिष्ठोवाहनास्तोमइति । उपयामेतिसमान

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

म् ॥ ८॥ आग्निर्ऋषिः । आग्नेयीगायत्रीपुरोरुक् । ऋषिरुक्तः । यःअग्निः ऋषिः दृष्टामन्त्राणाम् पवमानः । इतश्चेतश्चगच्छन् । पाञ्चजन्यः पञ्चजनेभ्योहितः । चत्वारोवर्णानिषादपञ्चमाः पञ्चजनाः । तेषांहियज्ञेधिकारोस्ति । पुरोहितः । पुरएनन्दधाति यज्ञं कुर्वाणाः । तम्ईमहेयाचामहे । महागयम्

प्रयांतुपरावतः ॥ अग्निरुक्थेनुव्वाहसा ॥ उपयामगृहीतोसिव्वै श्रवानुरायंत्वैषतेयोनिर्व्वैश्रवानुरायंत्वा ॥ ८ ॥ अग्निर्ऋषिः ॥ अग्निर्ऋषिः पवमानःपाञ्चजन्यःपुरोहितः ॥ तमीमहेमहागु यम् ॥ उपयामगृहीतोस्युग्नयेत्त्वाव्वर्चसऽएषतेयोनिरुग्नयेत्वाव्व र्चसे ॥ ९ ॥ मुहा २ँ ॥ ऽइन्द्रः ॥ मुहाँ २ ॥ ऽइन्द्रोव्वज्रहस्तःषोड

महान्तंगृहम् । महत्त्वंच गृहस्यद्रव्यनिवन्धनम् उपयामगृहीतोस्यग्नयेत्त्वावर्चस इतिव्याख्यातम् ॥ ९ ॥ महांइन्द्रः । माहेन्द्रीपुरोरुक् गायत्री । उक्तमार्षम् । महान्इन्द्रः वज्रहस्तः । षोडशी ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पञ्चप्राणाः पञ्चबुद्धीन्द्रियाणिपञ्चकर्मेन्द्रियाणि मनःषोड़शम् एतल्लिङ्गंयस्य सषोड़शीन्द्रः। पञ्चदशोवावज्रश्चेन्द्रश्चषोडशीवज्रस्य । शर्मशरणंयच्छतु ददातु । हन्तुच पाप्मानं ब्रह्महत्यादिकम् । यश्चास्मान् द्वेष्टि तञ्चहन्तु । यञ्चवयंद्विष्मः तञ्चहन्तु । उपयामेतिसमानम् ॥ १० ॥ तम्वः ऐन्द्रीबृहती । जपस्वाध्यायादिषुविनियोगः । आदित्यस्यार्षम् याज्ञवल्क्यस्यवा आश्र-

शीशर्म्मंयच्छतु ॥ हन्तुंपाप्मानंय्योस्मान्द्वेष्टिं ॥ उपयामगंहीतो सिमहेन्द्रायंत्त्वैषतेयोनिर्म्महेन्द्रायंत्त्वा ॥ १० ॥ तंव्वंः ॥ तँव्वोदस्म्मन्तीषहंव्वसोंर्म्मदानमन्धंसः ॥ अभिवृत्सन्नस्वसंरेषुधेनवऽइन्द्रंङ्गी

ध्यायपरिसमाप्तेः । हेऋत्विग्यजमानाः तमिन्द्रं गीर्भिर्वाग्भिः स्तुतिलक्षणाभिः । नवामहे । णुस्तुतौ अभिष्टुमः किमर्थम् । वःयुष्मभ्यं दास्यतीति । कथंभूतमिन्द्रम् दस्मम् । दर्शनीयम् प्रियवादिनंकार्यसाधनञ्च । ऋतीषहम् ऋतीगतिः गतिमावेण शत्रुंसहतइत्यृतीषाट् तमृतीषहम् । वसोर्मन्दानमन्धसः । वसोर्वासयितुः सोमस्यस्वकीयेनैकदेशेन मन्दानंमाद्यन्तम् अ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ध्वसः अधायनीयस्यचान्तस्य स्वकीयेनैवांशेनमाद्यन्तम् कथमिवनवामहे । वत्संनस्वसरेषुधेनवः । नकारउपमार्थीयः । वत्समिव । स्वसरेषु स्वयमेवसरन्ति येषुतानिस्वसराण्यहानितेषुस्वसरेषु अहस्सु । धेनवः । यथानवप्रसूताधेनवः दिनेषुअतिहार्द्रात् वत्संशब्दैराश्वासयेयुः एवंवयमप्यतिसौहार्द्रेणेन्द्रङ्गीभिर्नवामह इतिसमस्तार्थः ॥ ११ ॥ यद्वाह्विष्ठम् । आग्नेय्यनुष्टुप् हेउद्गातः यत् वाह्विष्ठं वोढृतमं बृहत्साम तत् अग्नयेअर्थाय अर्चगाय । ततोद्रष्टाग्निंब्रूहि ।

र्भिर्न्नवामहे ॥ ११ ॥ यद्वाह्विंष्ठम् ॥ यद्वाह्विंष्ठ न्तद्ग्नयेबृहदर्च्चविभावसो ॥ महिंषीवत्त्वद्रयिस्त्वद्वाजाऽउदीरते ॥ १२ ॥ एहिं ॥ एहय्य

हेविभावसो विभूतधनअग्ने । महिषीवत्वद्रयिः मेहिषीप्रथमवित्ता । यथाप्रथमपत्नीधर्मार्थकामात्मिकाउदीरते उत्तिष्ठतिसुखात्मिकाभवति एवंत्वद्रयिः सुखात्मिकाभुदीरते उतिष्ठति ॥ अथवा । महिषीयथा सर्वान्भोगान् उदीरते उत्क्षिपति परोपकाराय । एवंत्वत्तोरयिः उदीरते त्वत्तश्च वाजाःअन्नानि उदीरते उद्गच्छन्ति परोपकाराय ॥ १२ ॥ एहि । आग्नेयीगायत्री । अधस्त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नमंत्रस्तुतोग्नि रिहसंबोधाते । एहिआगच्छ हेअग्ने । जकारोनर्थकः । कोहेतुरितिचेत् । सुव्रत्राणि साधुव्रवाणि ते तव हे भगवन्नग्ने । इत्थेतराः इत्थंत्वदीये नामबंधकर्मरूपे ग्रंथिता: इतराः स्तुतिलक्षणाः गिरोवाचः । यद्वा इत्थमुद्गात्स्तोत्रजनिताः इतराअन्यागिरोयागीयन्ते । हे तुंन्यस्यति । एभिश्च इन्दुभिः अध्वर्युणाभिषुतैः सोमैःत्वंवर्द्धसेवर्द्धस्व ।

सुव्रत्रवाणितेग्नऽइत्थेतरागिरः ॥ एभिर्व्वर्द्धासऽइन्दुभिः ॥ १३ ॥ ऋतवस्ते॥ ऋतवस्तेयज्ञंवितन्वन्तुमासाऽऋन्तुंतेहविः ॥ संव त्सरस्तेयज्ञन्दंधातुनऽप्रजाञ्चपरिपातुनः ॥ १४ ॥ उपह्वरेगिरी

॥ १३ ॥ ऋतवस्ते । यजमानेनाग्निरुच्यते अनयाऽहुत्या । ऋतवः तेतव यज्ञंवितन्वन्तु । मासाश्चतेहविः रुचन्तु । संवत्सरश्च तवयज्ञंदधातुधारयतु नःइतिनिपातोनर्थकः । प्रजांच परिपातुनः इतियजमानआत्मानमाह । नोस्माकं प्रजांचपरिपातुसंवत्सरएव ॥ १४ ॥ उपह्वरेगिरीणाम् । चतस्रोगायत्र्यः सोम्यः । उपह्वरेगह्वरेगिरीणांपर्वतानाम् प्रसिद्धमेतत् । एका

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हाहीनसत्राणिक्रियन्तामित्यनया । धियावसुग्राविप्रःमेधावी सोमःअजायत । जगत्धारयितु-मिच्छन् ॥ १५ ॥ उच्चाते । व्यवहितपदप्रायोमन्त्रः हे सोम तेतव अन्धसःअधग्रानीयात् र-सी भूतात् । जातमुत्पन्नम् यज्ञपरिणामभूतम् उच्चाउच्चैः । दिविसत् । द्युलोकेविद्यमानम् पश्चात्भूमिः आददे गृहीतवती । किंतत् द्युलोकप्राप्तंभूमिरादत्ते । उग्रम्उद्गूर्णं महाचौरादि

णाम् ॥ उपह्वरेगिरीणाꣳसङ्गमेचनदीनाम् ॥ धियाविप्रोऽअजायत ॥ १५ ॥ [१५] उच्चातेॅ ॥ उच्चातेजातमन्धॅसोदिविसद्भूम्याददे ॥ उग्रꣳशर्म्ममहिश्रवः ॥ १६ ॥ सनः ॥ सनऽइन्द्रायुय

भिरनाधृष्यम् शर्मशरणंगृहम् महिश्रवः महच्छ्रवणीयंधनम् । पञ्चाहुतिपरिणामोद्घाटनमात्र मेतत्कृतम् यथा हुतिः प्रथमंदिविगच्छति ततोन्तरिक्षे जलरूपेण ततोभूमावन्नरूपेण ततोनरेरेतोरूपेण ततोयोनौ पुरुषरूपेणेति पञ्चधाहुतिपरिणामः ॥ १६ ॥ सनः । यस्त्वंवरि-वोवित् । वरिवोधनम । तद्विंदतिवेत्तिवायोसौवरिवोवित् यस्त्वंधनस्यलब्धावेदितावा । सः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नः सोस्माकं यज्ञम् इन्द्राय यज्यवेयष्टव्याय वरुणायच मरुद्भ्यश्चार्थाय । परिस्रवरक्ष अथवा । सत्वंनःयज्ञम् इन्द्राय यज्यवेवरुणाय मरुद्भ्यश्चवरिवोविदिति एतेषांविशेषणं कृतविभक्तिव्यत्ययं गृह्यतेसामानाधिकरण्यात् वरिवोविद्भ्यः धनविद्भ्यः परिस्रव । क्रियाविशेषणंवा । एतेभ्योदेवेभ्यः परिस्रव तथाचपरिस्रव यथावरिवोविद्भवति ॥ १७ ॥ एनाविश्वानि । एनाएनानिविश्वानिशर्वाणिदुग्मानिधनानि । अर्य ईश्वरः सोमः आभादाय अस्मभ्यंददात्वितिशेषः । तानिच सोमदत्तानि ।

उज्यंवेव्वरुंणायमरुद्भ्यः ॥ वुरिवोवित्परिंस्रव ॥ १७ ॥ एनाव्विश्श्वांनि ॥ एनाव्विश्श्वान्न्युर्य्यऽआद्युम्नानिमानुंषाणाम् ॥ सिषांसन्तोव्वनामहे ॥ १८ ॥ अनुंवीरैः ॥ अनुंवीरैरनुंपुष्यास्म्मगोभिर

सिषासन्तः । षणुदाने । अस्यसन्यनुनासिकस्याकारः । दातुमिच्छन्तः दानाभिमुखीभूताः सन्तोवयम्धनानिवनामहे सम्भजामहे ॥ १८ ॥ किमर्थंधनमतो दातुमिच्छन्तो धनवन्तइत्याह । अनुवीरैः । आशीर्देवताविष्टुप् । अनुपुष्यास्मवीरैः वयम् अनुपुष्यास्मच गोभिः वयम् । अन्वश्वैः अनुपुष्यास्मच वयमश्वैः । अनुसर्वेणपुष्टैः । अनुपुष्यास्मच वयंसर्वेणपुष्टेनेति वचनव्यत्ययः । अनुद्विपदा अनुपु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ष्पास्मच वयंद्विपदाद्विपादेन अनुपुष्पास्मचचतुष्पादेन । किञ्च । देवाःनोस्माकं यज्ञम् ऋतुथाऋता
र्तौकालेकाले नयन्तु ॥ १९ ॥ अग्ने पत्नीः इतउत्तर पञ्चनेष्टुर्याज्याः । आद्यागायत्री । देवा-
नांपत्न्यः त्वष्टाचदेवता । हेअग्ने देवानांपत्नीः इहास्मिन्यज्ञे उपावहआगमय कथंभूताः
उशतीःकामयमानाः अस्मान् । त्वष्टारञ्चउपावह । किमर्थम् । सोमपीतये सोमपानाय ॥ २० ॥

न्नवश्प्रैरनुसर्व्वेणपुष्टटैः ॥ अनुद्विपदानुचतुष्पदाव्वयन्देवानोयु
ज्ञमृतुथानयन्तु ॥ १९ ॥ अग्नेपत्नीः ॥ अग्नेपत्नीरिहावहदेवा
नामुशतीरुपं ॥ त्वष्टारꣳसोमपीतये ॥ २० ॥ अभियज्ञम् ॥ अभि
यज्ञङ्गृणीहिनोग्नावोनेष्टꣳपिबऽऋतुना ॥ त्वꣳहिरत्नधाऽअ

अभियज्ञम् । हे गायत्र्यौ ऋतुग्रहाणां याज्ये । नेष्टास्वकीयामधिष्ठात्रीं देवतामवीति । अभि-
गृणीहिस्तुहि यज्ञंनोस्मत्संबन्धिनम् । हेग्नावः । ग्नाःपत्न्यः ताविद्यन्तेसाग्नग्नावान् तत्संबोधनं
हेग्नावः । मतुवसोःरुःसंबुद्धौछन्दसीतिरुत्वम् । हेनेष्टः पिबच ऋतुनाकालेनसह । कस्मात्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मेवमुच्यसे इतिचेत् । तत्राह । त्वंहिरत्नधाअसि । यस्मात्वमेवरमणीयानामनानां दातासि ॥२१॥ द्रविणोदाः । ऋत्विजउच्यन्ते । अयमग्निः । द्रविणोदाः । धनस्यबलस्य वादाता । पिपीषतिपातुमिच्छति पिबतेःसनीकारः । सोममितिशेषः । एवञ्चेदतोब्रवीमि । हेऋत्विजः । जुहोतप्रचतिष्ठत जुहुतच प्रतिष्ठतच कर्मसु । किञ्च । नेष्ट्रात् नेष्ट्रियात् धिष्ण्यात् ऋतुभिःकालैःसह

सिं २१ द्रविणोदाऽपिपीषति । जुहोतप्रचतिष्ठत ॥ नेष्ट्राद्दृतुभिरि ष्यत ॥ २२ ॥ तवायम् ॥ तवायꣳसोमस्त्वमेह्यु र्वाङ्शंश्वत्तमꣳ सुमनाऽअस्यपाहि ॥ अस्मिन्यज्ञेबर्हिषद्यानिषद्यादधिष्ववेमज्जु

सोममइष्यत पुनःपुनःपिबत ॥ २२ ॥ तवायम् । ऐन्द्रीविष्टुप् माध्यन्दिनीया । हेइन्द्र यतः तवायंमाध्यन्दिनीयः सोमः अतःअस्माभिः प्रार्थ्यमानः त्वम् आद्रहि आगच्छ । कथंभूतः । अर्वाङ् अर्वागञ्चनः अवरेणाञ्चितः । एत्यच शश्वत्तमं शाश्वतिकतमम् सोमं सोमभागंगृहाण संगृह्यचसुमनाभूत्वा अस्यसोमस्यपाहिपिव । पीत्वाच । अस्मिन्यज्ञेबर्हिषि निषद्य अवस्थानं-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृत्वादधिष्वधारयस्व इमंजठरे इन्दुंसोमम् हेइन्द्र ॥ २३ ॥ अमेवनः । देवपत्न्यः त्वष्टाचावष्टयन्ते । जगती तार्तीयसवनीया याज्या । अमाशब्दोगृहवचनः । यथागृहाणिस्वानिएवं नःअस्माकं यज्ञगृहाणि । सुहवाः साध्वाह्वानाः आहिगन्तन आगच्छत । हिःपादपूरणः । आगत्यच निवर्हिषिसदतन निषीदत उपविशत वर्हिषि । निषद्यच रयिष्टन रतिंकुरुत ।

ठरऽइन्दुंमिन्द्र ॥ २३ ॥ अमेवंनः ॥ अमेवंनःसुहवाऽआहिगन्तंनुनिबु र्हिषिंसदतनारयिंष्टटन ॥ * अथांमन्दस्वजुजुषाणोऽअन्धंसुस्वष्टंहे वेभिर्ज्जनिंभिःसुमङ्गणः ॥ २४ ॥ स्वादिंष्ठयामदिंष्ठया ॥ स्वादिंष्ठयाम

आदित्यामुपष्टासुदेवपत्नीषु । अथमन्दस्व तृप्यस्व जुजुषाणः सेवमानः । अन्धसः सोमस्यस्वमंशम् हेत्वष्टः देवेभिर्देवैः जनिभिः जननहेतुभूताभिः देवपत्नीभिः सुमङ्गणः सन्शोभनमदादेवास्तेषां स्त्रीणाञ्चगणः यस्यससुमङ्गणः ॥ २४ ॥ स्वादिष्ठया । सौम्यौपावमान्यौगायत्र्यौ । जपादिषुविनियोगःउक्तञ्च । रसीभूतो यदासोमः पवित्रात्त्वरतिग्रहम् ऋग्भिःस्वादिष्ठयाद्याभिः 'पवमानःसउ-

* एवाच्छचक्रमाथ ॥ एव अच्छ चक्रम अथ एतेङ्कस्याव्यञ्जनमात्रे परेदीर्घमाद्यतेइतानेनअथेतःकारस्यदीर्घोभवतिप्रा अ० ३ । सू० १२५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

च्यते। स्वादिष्ठयास्वादुतमया मदिष्ठयामदयितृतमया पिवस्वदशापवित्वात् द्रोणकलशंप्रतिगच्छ हेसोमधारया। यस्त्वम् इन्द्रायपातवे इन्द्रःपिवतु इत्यनेनाभिप्रायेण सुतःअभिषुतोस्माभिः ॥२५॥ रक्षोहाविश्वचर्षणिः। अयमेवसोमः रक्षोहा रक्षसामपहन्ता विश्वचर्षणिः सर्वसाजगतोद्रष्टा। यथार्हम्प्रति। अभिआसदत आभिमुख्येनसन्तः सीदतिवा। किमभ्यासदत् योनिंस्थानम्।

दिष्ठयापवस्वसोमधारया ॥ इन्द्रायुपातवेसुतः ॥ १५ ॥ रक्षोहाविश्व-
श्वचर्षणिरभियोनिमयोहते ॥ द्रोणंसधस्थमासदत् ॥ २६ ॥ [११] ॥ २ ॥

इतिसंहितायांषड्विंशतितमोऽध्यायः ॥ २६ ॥

कथंभूताम्। अयोहते। अयसाकृष्णलोहेन हतमुत्कीर्णम् सोमभाजनीकृतम्। हतमितिवि-भक्तिव्यत्ययः योनिसामानाधिकरण्यात्। किंनामानंयोनिम् द्रोणे। अत्रापिविभक्तिव्यत्ययः द्रोणंद्रोणकलशलक्षणम्। सधस्थंसहस्थानलक्षणम् सोमानाम् ॥ २६ ॥

इतिउव्वटकृतौमन्त्रभाष्येषड्विंशतितमोध्यायः ॥ २६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

(१) समास्त्वा। आग्निकोधायः। सामिधेन्योनव त्रिष्टुभः आग्नेय्योग्निनादृष्टाः। प्राकपी-
वोन्नाया ऋषिरग्निः कर्माङ्गभूतमग्निंस्तौति समाशब्दोमासवचनः संवत्सर इतिशब्दोपादान-
सामर्थ्यात्। समाः मासाश्च त्वां हेअग्ने ऋतवश्चवर्द्धयन्तु। संवत्सराश्च ऋषयश्च सप्त-

*समास्त्वा ॥ समास्त्वाग्नऽऋतवोवर्द्धयन्तुसंवत्सराऽऋषयोयानिसु
क्त्या ॥ सन्दिव्येनंदीदिहिरोचनेनविश्वाऽआभाहिप्रदिशश्चतस्रः
॥१॥ सञ्चेद्यस्वाग्नेप्रचंवोधयैनमुच्चातिष्ठमहतेसौभगाय ॥ माचरिषद्

ऋषयामन्त्रदृष्टारोवा प्राणावा। यानिचसत्या सत्यानिआर्षाः मन्त्राःत्वांवर्द्धयन्त्वित्यनुवर्तते। त्वम-
ग्नेतैर्वर्द्धमानः। सन्दिव्येनदीदिहि रोचनेन। सन्दीदिहि संदीप्यस्व दिव्येन दिविभवेन
रोचनेनदीप्त्या। किञ्च विश्वाःसर्वा आभाहिदीपयदिशःप्रदिशश्च चतस्रःआभाहि ॥ १ ॥ सञ्च।
समिद्धयस्वच हेअग्ने। प्रवोधयच अवगतार्थञ्च यनंयजमानङ्कुरु। यथाग्निश्चेतव्यइति। उते-

१) अयमध्यायः पञ्चचितिकस्याग्नेः सम्बन्धो प्रजापतिदृष्टः। नव ऋचोऽग्निदेवत्यास्त्रिष्टुभोऽग्निना दृष्टाः इष्टकापशौ समिध्यमानसमिद्वतोरन्तराले आसां विनियोगः।

* समास्त्वादशोर्द्ध्वाअस्यपीवोअन्नाद्दादशकावभित्वैकादशचत्वारः पंचचत्वारिंठ०शत्।

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ष्ठच महतेसौभगायऐश्वर्याय । किञ्चमाचरिषत् माचविनश्यतु उपसत्ता उपसदनस्यकर्ता यजमानःसन्नग्निमुपसीदति । तेतव । हेअग्ने । किञ्च । ब्रह्माणस्ते ब्राह्मणाश्च ऋत्विग्यजमानाः तवसंवन्धिनः । यशसःसन्तु । मत्वर्थीयलोपः यशश्विनःसन्तु । माअन्येयशस्विनःसन्तुअयजमानाअलङ्करिष्णवः ॥ २ ॥ त्वामग्ने । हेअग्ने त्वाम् इमेब्राह्मणाः ऋत्विजःवृणतेवृणवन्ति

पसुत्तातेऽअग्नेब्रह्माणस्तेयशसः सन्तमान्ये ॥ २ ॥ त्वामग्ने ॥ त्वा मग्नेव्वृणतेब्राह्मणाऽइमेशिवोऽअग्नेसंव्वरणे*भवानऽ ॥ सपत्नहा

यागाय । यतएवमतःप्रार्थयामः । शिवःशान्तः हेअग्ने संवरणेब्राह्मणैःसह एकस्मिन्वरणे । भव नःअस्माकम् । त्वन्देवोवयञ्चमत्या इत्यभिप्रायः । सपत्नहानोअभिमातिजिच्च । सपत्नानांहन्ताचभवास्माकम् अभिमातिशब्दोपिशत्रुवचनः । अतएवंव्याख्यायते । सपत्नानांहन्ताभव हतावशिष्टानांजेताचभवेति । किञ्च । स्वेगयेस्वकीयेगृहे जागृहिअप्रयुच्छन् । युच्छीप्रमादे । अप्र-

* भवच ॥ भवेतायं हृस्वोदीर्घमापद्यतेन कारेपरेइति सूत्रेणभवेताकारस्य नकारेपरेदीर्घोभवति तेनभवानइति सिद्धम् प्रा० अ० ३ । सू० १०९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मादयन् उन्नतमनाइत्यर्थः ॥ ३ ॥ इहैव । इहएवकर्मणि वर्तमानानामस्माकम् हेअग्ने अधिधारयरयिमउपरिनिश्चिन्मधनम् । किञ्च । मात्वां निक्रन्नीचैःकुर्वन्तु अवज्ञयापश्यन्तु । पूर्वचितः पूर्वं येअग्निञ्चितवन्तः । निकारिणः । ज्ञानकर्मसमुच्चयातिशयेन येन्योन्यजन्मानि । नीचैःकुर्वन्ति । किञ्च । त्वत्वम् । हेअग्ने सुयमंसाधुयन्तृअस्तु तुभ्यन्तव । किञ्च उपसत्ता यजमानःसन्नुपसदनं

नोऽअभिमातिजिद्धुस्वेगयेजागृह्यप्प्रयुच्छन् ॥ ३ ॥ इहैव ॥ इहैवाग्नेऽअधिधारयारयिम्मात्त्वानिक्रन्न्पूर्वचितोनिकारिणः ॥ त्वत्वमग्नेसुयमंमस्तुतुभ्यंसुपसत्तावर्द्धतान्तेऽअनिष्टृतः ॥ ४ ॥ त्वत्वेणाग्ने ॥ त्वत्वेणाग्नेस्वायुः सदमस्वमित्त्वेणाग्नेमित्त्वधेयेयतस्व ॥ सजातानां

करोत्यग्नेः । वर्द्धतान्तेतव । अनिष्टृतः । स्तृहिंसायाम् अनुपहिंसितःसन् ॥ ४ ॥ त्वत्वेणाग्ने । त्वत्वेणसम्पाद्यात्मानम् हेअग्ने । स्वायुःसाध्वायुः सन्सम्भरस्वयज्ञंवोढुम् । मित्वेणचसम्पाद्यात्मानंमित्वधेयेयतस्व । यथामित्वाणिधार्यन्ते तथायत्नङ्कुरु । किञ्च । सजातानांसमानजन्मनां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मध्यमस्थाएधि मध्यमस्थानोभव । यथासजाताअपि यज्वानोभवन्ति तथास्यादित्यभिप्रायः । किञ्च । राज्ञां हेअग्ने विहव्यःविविधमाह्वातव्यः दीदिहिदीप्यस्व दुहयज्ञगृहे । यथाराजानोपि यज्वानोभवेयुः तथास्त्वित्यभिप्रायः ॥ ५ ॥ अतिनिहः । अतिक्रम्यनिहन्तृन् निपूर्वस्यहन्तेः उःप्रत्ययः । प्रथमैकवचनस्यस्थाने द्वितीयावहुवचनंवाक्यसंवन्धात् । अतिस्निधः । स्नेधतिःकुत्सित-

म्मङ्गमस्त्थाऽएधिराज्ञांमग्नेव्विहव्व्योदीदिहीह ॥ ५ ॥ अतिनिहः ॥ अतिनिहोऽअतिस्निधोत्यचित्तिमत्त्यरातिमग्ने ॥ व्विश्वाह्यग्ने दुरितासहस्वाथास्मभ्यंसहवीराꣳरयिन्दाः ॥ ६ ॥ अनाधृष्योजात

कर्मा । अतिक्रम्यच कुत्सिताचरणान् । अत्यचित्तिम् अचित्तिरन्यमनस्कता । अतिक्रम्यचान्यमनस्कताम् अत्यरातिम् । अरातिरनुपजीव्योजनः तञ्चातिक्रम्य हेअग्ने । विश्वाह्यग्ने दुरितानिसहस्व । विश्वानिदुरितानि सहस्वअभिभव हिरनर्थकः अथानन्तरम् अस्मभ्यंसहवीरां सपुत्रांरयिन्धनं दाःदद्याः ॥ ६ ॥ अनाधृष्यः । यस्त्वमनाधृष्यः । अशक्यः खलीकर्तुम् । जातवेदाः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जातप्रज्ञानश्च अनिष्टृतः अनुपहिंसितश्च । स्तृणाते रेतद्रूपम् । विराट्च राजदीप्तौ । विराजनशीलः विराट्चेतश्च । तन्त्वांव्रवीमि हेअग्ने दीदिहिदीप्यस्व दृहकर्मणिवर्तमानः विश्वाः सर्वा आशादिशः । किञ्च प्रमुचन्मानुषीर्भियः । विक्षिपन्मानुषाणि भयानि जन्मजरामृत्युशोकदैन्यादीनि । शिवेभिः शिवैःशान्तैः अर्चिभि अद्यास्मिन्यवि । परिपाहि नःसर्वतोगो-

वेदाꣳ॥ अनाधृष्योजातवेदाऽअनिष्टृतोविराडंग्नेक्षत्रभृद्दीदिह्यृह ॥ विश्वाऽआशाꣳ प्रमुञ्चन्मानुषीर्भ्भियःशिवेभिरद्यपरिपाहिनो वृधे ॥ ७ ॥ बृहꣳस्पतेसवितꣳ ॥ बृहꣳस्पतेसवितर्बोधयैनꣳसꣳशितꣳ शित्सन्तराꣳसꣳशिशाधि ॥ वर्द्धयैनम्महतेसौभगायविश्वंऽएनु

पायात्मान् । किमर्थम् बृधे वर्द्धनाय ॥ ७ ॥ बृहस्पतेसवितः । हेबृहस्पते हेसवितः । बोधयकामेष्ववगतार्थंकुरु । एनंयजमानम् किञ्च । संशितञ्चित् । चिच्छब्दोप्यर्थे संशितव्रतमपियजमानम् सन्तरामतितराम् संशिशाधिशिक्षय । वर्द्धयच एनं यजमानम्महते सौभगायऐश्वर्याय ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विश्वेचदेवा एनंयजमानम् अनुमदन्तु । उत्साहयन्तु । बृहस्पतिशब्देनसवितृ शब्देनचाग्निरेवोच्यते । अथवा वाक्यद्वयम् एकेनबृहस्पतिरुक्तः अपरेणसविता ॥ ८ ॥ अमुत्रभूयात् । अमुत्रामुष्मिल्लोकेयत् शरीरम्भूयात् । अध अथ यत्यमस्यसदनेच शरीरंभूयात् । तस्मात्च हेवृहस्पते । अभिशस्तेः अभिशंसनाच्च अमुञ्चः । किञ्च प्रत्यौहतां प्रतिप्रेरयताम् अन्यत्रनयताम् अश्विनौमृत्युम् अस्माद्यजमानात् कथंभूतावश्विनौ । देवानांभिषजौ हेअग्ने शचीभिः ।

मनुमदन्तुदेवाः ॥ ८ ॥ अमुत्रभूयादधं ॥ अमुत्रभूयादधयद्युमस्युत्त्व
हंस्पतेऽअभिशस्तेरमुञ्चꣳ ॥ प्रत्यौहतामुश्विनांमृत्युमस्माद्देवानांम
ग्नेभिषजाशचीभिꣳ ॥ ९ ॥ उद्वयम् ॥ उद्वयन्तमंसुस्परिस्वः पश्यं

अत्रापिबृहस्पतिशब्दआमन्त्रितोग्निशब्दस्य द्रष्टव्यः सामिधेनी प्रकरणस्याग्नेयत्वात् । ननु बृहस्पतिशब्दो नैघण्टुको नचाग्निशब्देदृति ताआग्नेय्यः प्राजापत्या यदग्निरपश्यत् तेनाग्नेय्योयत्प्रजापतिर्ठ॰ समैधत तेनप्रजापत्याद्दृतिश्रुतेः प्रजापतेः सर्वदेवात्मकत्त्वात् । तस्मादेनं प्रजापति र्ठ॰ सन्तमग्निरित्याचक्षते दृतिश्रुतेरदोषः ॥ ९ ॥ उद्वयमितिव्याख्यातम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ १० ॥ उद्ध्वोअस्य । द्वादशआप्रियः प्रयाजदेवताः । उष्णिहः अष्टम्याद्येगायत्र्यौ । ताविषमा विषमाक्षरपादाद् व्यादिश्रुतेः । ताआग्नेय्यः प्राजापत्याः । यदग्निरपश्यत्ते नाग्नेय्यः यत्प्रजापतिमाप्रीणात्तेनप्राजापत्या इतिचश्रुतिः । अग्निर्ऋषिः । प्रजापतिश्चाग्निरूपेण संस्तूयते ॥ अस्याग्नेः प्रजापतिरूपेण संस्तूयमानस्य ऊर्ध्वाःप्रगुणाः देवमार्गेण यायिन्यः समिधोभवन्ति । ऊर्ध्वाशुक्रा ऊर्ध्वा-

न्त्याउत्तरम् ॥ देवन्देवत्रासूर्य्यमगन्म्मज्योतिरुत्तमम् ॥ १० ॥ [१०]
ऊर्द्ध्वाऽअस्यसमिधोभवन्त्यूर्द्ध्वाशुक्राशोचीँष्यग्नेः ॥ द्युमत्तमा
सुप्रतीकस्यसूनोः ॥ ११ ॥ तनूनपादसुरः ॥ तनूनपादसुरोविश्श्रव

नि च शुक्राशुक्रानि शुक्रानिशोचींष्यर्चींषिभवन्ति । द्युमत्तमा दीप्तमत्तमाच वीर्यवत्तमानिचेत्यर्थः । सुप्रतिकस्य सुमुखस्ययजमानस्य । सूनोः । सद्मेनऋनयति । यद्दन्थंभूतोग्निस्तंब यंस्तुम इतिवाक्यशेषः ॥ ११ ॥ तनूनपात् । अज्यस्यअग्नेर्वा । यःतनूनाङ्नवांनपात् आजग्राभिप्रायमेतदुच्यते । अथवा योग्निःतनूनामपांनपात् पौचः । असुरःअसुमान् प्राणवान्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रोमत्वर्थीयः । यद्वा असुरःवसुरः धनवान् अस्मिन्पक्षेआदिलोपः । विश्ववेदाः । सर्वधनः सर्वज्ञोवा । देवोदानादिगुणयुक्तः । देवेष्वपिदेवः दीप्तिमान् । यर्हृष्टशःसःपथःयज्ञमार्गान्-अनक्तु । मध्वामधुस्वादुना घृतेन । इत्यन्नामप्रभूतं यज्ञेघृतमस्तु येनमार्गा अभ्यक्ताः स्युरित्य-भिप्रायः । ॥ १२ । मध्वायज्ञम् । हेअग्नेयस्त्वंमध्वामधुस्वादुना घृतेनयज्ञं नक्षसेव्याप्नोषि ।

वेदादेवोदेवेषुदेवः ॥ पृथोऽअनक्तुमद्ध्वाघृतेन ॥ १२ ॥ मद्ध्वायु ज्ञम् ॥ मद्ध्वायुज्ञन्नक्षसेप्रीणानोनराशꣳसोऽअग्ने ॥ सुक्षदेवःसंवि ताविश्ववारः ॥ १३ ॥ * अच्छायम् ॥ अच्छायमेति । शवसाघृतेनेडा

नक्षतिर्व्याप्तिकर्मा । कथंभूतः । प्रीणानःदेवान् । नराशंसश्च । नरैर्ऋत्विग्भिश्च शंस्यतेस्तूयतेयः सतथोक्तः । सुक्षक्षसाधुक्षच्च । देवः सविता । विश्ववारः सर्वस्यवरणीय श्चभवसि । तंत्वांस्तु-मद्रतिशेषः ॥ १३ ॥ अच्छायम् । अच्छाभेराप्नुमितिशाकपूणिः अच्छएति अभ्येति । अग्निम्अय-मध्वर्युः । शवसास्वकीयेन प्रज्ञानबलेनयुक्तः । घृतेनच गृहीतेनइडानःस्तुवन् । वह्निर्वोढा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नमसाचानेन हविर्लक्षणेनाभ्युद्यतेन स्रुचःबाहुभ्यांगृहीत्वा । अध्वरेषु प्रयत्सुयज्ञेषुवर्तमानेषु ॥ १४ ॥ सयक्षत् । सएवाध्वर्युः यक्षत् । यजतु । अस्याग्नेः सम्बन्धिमहिमानं महाभाग्यन् । सइम् सएवचमन्द्रामन्दीनीयान्यन्नानि यजतु । कथंभूतस्याग्नेः सुप्रयसः । प्रयइत्यन्ननाम शोभनानिप्रयांस्यन्नानि हविर्लक्षणानि यस्यससुप्रयाः तस्यसुप्रयसः । अथकस्मादन्यदेवताः परित्यज्याग्नेर्महि-

नोऽव्हुन्निर्न्नमंसा ॥ अग्निꣳस्रुचोऽअध्वरेषुंप्रयत्सु ॥ १४ ॥ सयं क्षदस्यमहिमानंमग्नेऽसाइंम्मन्द्रासुंप्रयसः ॥ वसुश्चेतिष्ठोव्वसुधातं मश्च ॥ १५ ॥ द्वारोंदेवीः ॥ द्वारोंदेवीरन्ववस्युव्विश्वेव्व्रताद्दन्तेऽ

मानं यक्षदित्युच्यत इतिचेत् अतआह वसुश्चेतिष्ठो वसुधातमश्च । यतोसौ वसुवासयिता चेतिष्ठोतिशयेनचेतयिता । कृताकृतगुणविशेषः वसुनांधानानां दातृतमश्च अतःअग्निस्तूयते ॥ १५ ॥ द्वारोदेवीः । अस्याग्नेः प्रथमम् द्वारः देव्यः व्रताव्रतानिकर्माणि ददन्तेधारयंति । ताभ्यः अनुपश्चात् । विश्वेविश्वेदेवाः देवशब्दलोपः । व्यवहितपदप्रायोर्ङर्चः । कथंभूताद्वारः । उरुव्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चसः वहुव्यञ्चनाः । धाम्नास्थानेन ऋत्विक्संवन्धिनापत्यमानाः । पतऐश्वर्ये ऐश्वर्यंकुर्वाणाः । याद्वत्यंभूता यज्ञगृहद्वारस्तावयंस्तुम इतिशेषः ॥ १६ ॥ तेअस्य । तेउषासानक्ता उषाश्च नक्ताचरात्रिः । अस्याग्नेः योनायोनौ आहवनीयाख्ये स्थितस्य योषणेभार्ये । दिव्येदिविभवे नकारोनर्थकः । तेद्रुमंयज्ञम् अवतांसुगुप्तंकुरुताम् । अद्वरंसोमञ्च नोस्माकम् सम्पादयतामितिशेषः ॥ १७ ॥ दैव्याहो-

अग्नेः ॥ उरुव्यचंसोधाम्नापत्यंमानाः ॥ १६ ॥ तेऽअंस्य ॥ तेऽअंस्ययो षंणेदिव्येनयोनाऽउषासानक्ता ॥ द्रुमंयज्ञमवतामद्ध्वरन्नः ॥ १७ ॥ दैव्याहोतारा ॥ ऽऊर्द्ध्वमद्ध्वरन्नोग्नेर्जिह्वासुभिर्गृणीतम् ॥ कृणुतन्नःस्विष्टिम् ॥ १८ ॥ तिस्रोदेवीः ॥ तिस्रोदेवीर्बर्हिरेदꣳसं

तारा । अयज्वाग्नि रसौचमधग्रमः हेदैव्यौहोतारौ । ऊर्ध्वमध्वरंनः कुरुतम्देवयानयायिनं कुरुतमित्यभिप्रायः । अग्नेर्जिह्वामभिगृणीतम् अग्निमुखं साधुवर्णयतमित्यर्थः । कृणुत कुरुतञ्च नःअस्माकं स्विष्टिम् । साधुयजनम् ॥ १८ ॥ तिस्रोदेवीः । तिस्रः देव्यः । वर्हिः आइदंसदन्तु । आसदन्तु आसीदन्तु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इदंवर्हिः । कतमास्ताः । इडापृथिवीस्थाना सरस्वतीचमध्यस्थाना । मही स्तुवन्तीति । प्रत्येकन्तिसृभिरपियोज्यम् यद्वा एकमेववाक्यम् । तिस्रोदेव्यो वर्हिरिदमासदन्तु इडासरस्वती भारत्योमहत्यो गृणानाइन्ति ॥ १९ ॥ तन्नः । तत्रायस्पोषम् नःअस्मभ्यमस्तदर्थम् । तुरीपम् तूर्णमश्नुते । तूर्णत्वाप्नोति । अद्भुतंमहत् अभूतपूर्वम् । पुरुक्षु पुरुषुबहुषु यत्क्षियंति निवसति तत्पुरुक्षुत्वष्टादेवः

इन्त्विडासरस्वतीभारती ॥ महीगृणाना ॥ १९ ॥ तन्नः ॥ तन्नस्तुरीपम् अद्भुतम्पुरुक्षुत्वष्टासुवीर्य्यम् ॥ रायस्पोषंविष्यतुनाभिमस्मे ॥ २० ॥ वनस्पतेवसृजाररांणस्त्मनादेवेषु ॥ अग्निर्हव्यंशमिताशूदया

सुवीर्यंसाधुवीर्यम् । रायस्पोषविशेषणान्येतानि चत्वारिपदानि । विष्यतु । सप्तिरुपसृष्टोविमोचने विमुंचतु । नाभिमस्मे राष्ट्रमध्यम् प्रयच्छासु ॥ २० ॥ वनस्पतेव । हेवनस्पते अवसृज । स्रुङ्मुखतोरवाचीनं निक्षिप हविंषिरराणः । यद्वा रादाने ददानः । त्मना मन्त्रेव्याड्यादेरात्मनइत्याकारलोपः देवेषु विषयभूतेषु । कस्मात्त्वमेवमुच्यसेस्माभिरित्यतआह । यतःअग्निःशमिता शामित्रमिति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तद्वितलोपः। हव्यंहविर्जातम् सूदयाति। षूदक्षरणे संस्करोति। अतोहेवनस्पतेअवसृजेति-संवम्भः ॥ २१ ॥ अग्नेस्वाहा। हेजातवेदः स्वाहाकृणुहि स्वाहाकृतिंयज इन्द्राय। हव्यं-हविः प्रयच्छेतिशेषः। विश्वेदेवाश्च इदंहविः जुषन्तांसेवन्ताम् ॥ २२ ॥ अथैनंवायवे नियुत्वते शुक्रान्तूपरमालभत इत्यसप्तपशोः पीवोअन्नारयिवृधः इत्याद्याः षट्याज्यानुवाक्यास्तिष्ठभो

ति ॥ २१ ॥ अग्ग्नेस्वाहा ॥ कृणुहिजातवेट्ऽइन्द्रायहुव्यम् ॥ वि श्वेंट्देवाहुविरिदञ्जुंषन्ताम् ॥ २२ ॥ [१२] पीवोंऽअन्नारयिवृधंः ॥ सुमेधाःश्वेतःसिंषक्तिनियुतांमभिश्श्रीः ॥ तेव्वायवेसमंनसोव्वितं

वायव्याः। तत्रचप्राजापत्यः पशुपुरोडाश इतिपठ्यते। तस्यआपोहयत् हेप्राजापत्ये। यान् नियुतःअश्वान्। पीवोअन्नान् पीवःपुष्टमन्नं येषामितिपीवोअन्नान् रयिम्बनं येवर्द्धयन्ति तेर-यिवृधः सुमेधाः कल्याणप्रज्ञानोवायुः। श्वेतःवायोर्वर्णवचनम् शुक्लोहिवायुरितिश्रुतिः। सिष-क्तिसेचति। नियुतामभिश्रीः नियुतामभ्याश्रयणीयः अथयान्वायुः सिषक्ति तेनियुतोश्वा वाय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वेर्थाय । समनसस्त्रमनस्कास्सन्तः वितस्थुः तान्विश्वानि इत्पादपूरणे नरःमनुष्याऋत्विग्यजमानाः स्वपत्यानि शोभनानामपत्यानां यानिकर्माणितानि चक्रुःकुर्वन्ति । एतदुक्तंभवति । वाग्वश्वसंयोगे सतिसर्वमिदं यज्ञादिप्रवर्ततेइति ॥ २३ ॥ रायेनु । रायेधनाय उदकलक्षणाय नुत्तिप्रम् यंवायु ञ्चत्तुःजनयितुः रोदसीद्यावापृथिव्यौ इमे । जनयोर्द्यावापृथिव्योः संयोगेपिसतिवायुमन्तरेण जगद्धारणं नोपपद्यते इतिजनितवत्यौ द्यावापृथिव्यौ । यंवायुञ्च रायेधनायोदक-

स्त्थुर्व्विश्वेन्नरः स्वपत्यानिचक्रुः ॥ २३ ॥ रायेनु ॥ यञ्जुञ्चतुरो टंसोमेरायेदेवीधिषणांधातिदेवम् ॥ अधंव्वायुन्नियुतः सञ्चतस्वाऽ उतश्वेतंव्वसुधितिन्निरेके ॥ २४ ॥ आपोंह ॥ आपोंहयद्बृहतीर्व्वि

लक्षणाय । देवीधिषणा धियंबुद्धिंकर्मवा सनोतिसम्भजते इतिधिषणावाक् मध्यस्थाना धातिधारयति । देवंदानाविगुणयुक्तम् । अधअथेत्यर्थः समनन्तरमेव । तम्वायुंनियुतः अश्वाःसश्वतसरन्तःसेवन्तः स्वाःस्वकीयाः । उतअपिच श्वेतंवायुं वसुधितिंवसुनोधनस्योदकलक्षणस्य धारयितारम् । निरेके । जनैराकीर्णप्रदेशेवस्थितम् वायुम् नियुतः सश्वतस्वाइत्यनुवर्तते ॥ २४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आपोह । आपोहवा इदमग्रेसलिलमेवासीदित्येतद्ब्राह्मणं निदानभूत मनयोःकण्डिकयोः । आपः । पुराकल्पद्योतको हइतिनिपातः । यत् । यदाबृहती बृहत्यःमहत्यः । विश्वंसर्वम् आत्मत्वेन । आयन्प्रापुः । गर्भंहिरण्यगर्भलक्षणन्दधानाः । जनयन्तीःजनयिष्यन्त्यः अग्निमअग्निरूपंहिरण्यगर्भम् हिरण्यगर्भवचनोवा अग्निशब्दः । ततःगर्भात्संवत्सरोषितात् देवानांमध्येसमवर्तत समभवत्

प्रश्वमायुगर्भन्दधानाजनयंन्तीरग्निम् ॥ ततोदेवानाꣳसमवर्त्तता सुरेकꣳकस्मैदेवायहविषाविधेम ॥ २५ ॥ यश्चित् ॥ यश्चिदापो महिनापर्य्यपश्यद्दक्षन्दधानाजनयंतीर्य्यज्ञम् ॥ योदेवेष्वधिदेवऽए

असुःप्राणात्मकः । एकःदेवानां सहिलिङ्गशरीरःयदूर्त्वंभूतोहिरण्यगर्भः । तस्मैकस्मै प्रजापतये-हविषाविधेम हविर्दद्मइतिविभक्तिव्यत्ययः ॥ २५ ॥ यश्चित् । योपिदेवः अन्तर्यामी । आपः अपइतिविभक्तिव्यत्ययः । महिनामहाभाग्येन । पर्यपश्यन् परितोदृष्टवान् । दक्षम्प्रजापतिं दधा-नाःजनयन्तीः यज्ञंसृष्टियज्ञम् । यश्चदेष्वेपि अधिदेवः एकआसीत् तस्मैकस्मै प्रजापतयेहवि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षाविधेम हविर्दधइतिविभक्तिव्यत्ययः ॥ २६ ॥ प्रयाहि प्रयासि याभिर्नियुद्भिः । नियुच्छब्द उभयलिङ्गः स्त्रियांपुंसिच । दाश्वांसंयजमानम् अच्छअच्छामेराम्रुमिति शाकपूणिः । हवींषि दत्तवन्तंयजमानमभि । हेवायो इष्टयेयागाय एषणायवा । दुरोणे यज्ञगृहेवर्तमानंयजमानम् । ताभिर्नियुद्भिरागत्य । नोरयिंसुभोजसं युवस्व । निपूर्वोयौतिर्दानार्थः । नियुवस्व देहि नोस्मभ्यं-

कुऽआसीत्कस्मैदेवायहविषाविधेम ॥ २६ ॥ * प्रयामिः ॥ प्रयाभिर्य्यासिदाश्वाꣳसमच्छानियुद्भिर्व्वायविष्टयेदुरोणे ॥ निनोरयि६सुभोजसंय्युवस्वनिवीरङ्गव्यमश्व्यंचुराधः ॥ २७ ॥ आनः ॥ आनोनि

रयिन्धनम् किम्भूतम् सुभोजसम् साधुभुज्यतइतिसुभोजातम् सुभोजसम् । किञ्च । वीरंपुत्रम् गव्यञ्च राधः अश्व्यंचराधोधनम् नियुवस्वइति ॥ २७ ॥ आनः । आउपयाहि नःअस्माकम् अध्वरंयज्ञम् । नियुद्भिःअश्वैः शतिनीभिः । शतानिविद्यन्तेयासु ताःशतिन्यः ताभिःशतिनीभिः सहस्रिणीभिश्च । एतदुक्तभवति । बहूनामपि वाहनानांवयन्तर्प्पयितुंक्षमाः एत्यच । हेवायो

* यद्यपिपदादौविद्यमानस्यअसंयुक्तस्ययकारस्यजकारोच्चारणंविहितमस्ति तथापिउपसर्गात्परस्यनभवतितदुक्तंयाज्ञवल्क्यशिक्षायांउपसर्गपरोयस्तुपदादिरपिदृश्यते । ईषत्स्पृष्टोयथाविद्युत्पदच्छेदात्परश्चवेत् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अस्मिन्सवने तृतीयसवने मादयस्व । तृप्यस्व इदानीमृत्विजः पादेनाह । यूयंपात पालयत स्वस्तिभिः अविनाशैः सदानःअस्मान् ॥२८॥ नियुत्वान्वायो । षट्वायव्यायाज्यानुवाक्याः । तत्रवायोशुक्रोइत्यनुष्टुप् । एकयाचेतिविष्टुप् । गायत्र्योन्याश्यतस्रः । तृतीयःपादः प्रथमंव्याख्यायते । यतोगन्तागमनशीलः तृनन्तोयम् गन्ताउदात्तः तद्धर्मावातत्साधुकारीवा एतेहितृनोर्थाः । असि ।

युञ्जि॑ ऽ शुतिनी॑भिरद्ध्वर॒ ऽसं॑हस्रिणी॑भिरुपया॑हियुज्ज॒म् ॥ व्वायो॑ ऽअस्मिन्त्सव॑नेमादयस्वयूयम्पा॑तस्वस्ति॑भि॒ऽ सदा॑न॒ऽ ॥ २८ ॥ नियु त्वा॑न्न्वायो ॥ नियुत्वा॑न्न्वायुवाग॑ह्ययु॒ऽ शुक्रो॑ ऽअ॒यामिते ॥ गन्ता॑सि सुन्व॒तोगृ॒हम् ॥ २९ ॥ व्वायो॑शुक्र॒ऽ ॥ व्वायो॑शुक्रो॑ऽअ॒यामिते॒मद्ध्वो

सुन्वतःअभिषवंकुर्वतः यजमानस्यगृहान्प्रति । अतोब्रवीमि । नियुत्वान् नियुत्गुणकोभूत्वा हेवायो आगहिआगच्छ । अयञ्चशुक्रो ग्रहःअयामि आगच्छत्वितिलकारपुरुषव्यत्ययः तेत्वांप्रति । त्वमेवहि शुक्रादीनांग्रहाणां स्थानमित्यभिप्रायः ॥ २९ ॥ वायोशुक्रः हेवायो शुक्रोग्रहःअयामिस्वयमेवागच्छतु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तेत्वांप्रतिकथंभूतः। मद्वोअग्रम् रसस्यसारभूतःदिविएषणेषुयज्ञेष्विित्यर्थः। त्वंचआयाहिसोमपी- तयेसोमपानाय। यतःस्पार्हःस्पृहणीयःहेदेव। नियुत्वतानियुक्तवतामन्त्रेणस्तूयसे ॥ ३० ॥ वायुरग्रेगाः। वायुःअग्रे गमनशीलः यज्ञप्रीः यज्ञेनप्रीयतइतियज्ञप्रीः। साकङ्गच्छति मनसा- यज्ञम्। योह्यादरेण विस्मितआगच्छति समनसासहागतोभवति। कथंभूतः। शिवःशान्तः

ऽअग्ग्रुन्दिविंष्टिषु॥ आयांहिसोमंपीतयेस्प्पार्होदेवनियुत्त्वंता।३०। व्वायुरंग्ग्रेगाः॥ वायुरंग्ग्रेगायंज्ज्ञप्प्रीः सांकङ्क्रन्न्मनंसायुज्ज्ञम्॥ शि वोनियुद्भि'÷ शिवाभिः÷ ॥ ३१ ॥ व्वायोये ॥ तेंसहस्त्रिणोरथांसुस्तेभि रागंहि ॥ नियुत्वान्त्सोमंपीतये ॥ ३२ ॥ एकंयाच ॥ दुशभिंश्च

नियुद्भिःअश्वैः शिवाभिरेव ॥ ३१ ॥ वायोये हेवायो येतेतव। सहस्रिणः सहस्रसंख्याभिर्युक्ताः रथासः रथाएवरथासः तेभिः तैः आगहिआगच्छ नियुत्वान्भूत्वा सोमपीतयेसोमपानाय ॥ ३२ ॥ एकयाच। एकस्यावायव्याया मृचिपात्राणि विमुच्यन्ते। हेवायो स्वभूते। स्वकीयाविभूति-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

र्यस्य जगत्सर्वंसस्वभूतिः । यानिपात्राणि वहसेदृष्टये देवयज्यायै । एकयाच नियुताद्शभिश्च नियुद्भिः द्वाभ्याञ्चनियुद्भ्याम् विंशतीच । विंशतिशब्दस्यपूर्वसवर्णदीर्घआदेशाः । विंशत्याच नियुद्भिः । तिसृभिश्च विंशताच नियुद्भिरेव । तातानि पात्राणि दृहविमुञ्च ॥ ३३ ॥ तववायो । हेवायो ऋतस्पते । सत्योदक यज्ञवचनऋतशब्दः । सत्यपते । त्वष्टुरादित्यस्य जामातः ।

स्वभूतेद्वाभ्यांमिष्टयेर्व्विंशतीचं ॥ तिसृभिश्चुव्वहंसेत्रिंशतां चनियुद्भिर्व्वायविहताविमुञ्च ॥ ३३ ॥ तवंव्वायो ॥ तवंव्वायवृत स्पतेत्वष्टुर्ज्जामातरद्भुत ॥ अवांस्यावृणीमहे ॥ ३४ ॥ [१२] अभित्वां ॥ शूरनोनुमोदुग्गधाऽइवधेनवः ॥ ईशानमस्यजगतस्तुर्दृशु

सच्चादित्यादप आदायगर्भयति ततोविप्रुषोजायन्ते अतोवायुर्जामातात्वष्टुः अद्भुत । अभूतपूर्व । तवसंबंधीनि अवांसिअन्नानि आवृणीमहे आयाचामः ॥ ३४ ॥ अभित्वा रथन्तरं दक्षिणे पक्ष इतिश्रुतिः । नान्योध्वर्य्यो गायेदितियतोऽत एषांसाङ्गांयोनयः पठ्यन्ते । तवेन्द्र प्रगा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

थोरथन्तरस्ययोनिः । तत्रप्रथमाबृहती द्वितीयासतोष्टहती । आभित्वाशूरनोनुमः । आभिमुख्येन त्वांहेशूर नोनुमः नमामः । कथमिव अदुग्धाइवधेनवः । यथावत्सान्प्रति अदुग्धाधेनवःनमन्ति एवंत्वांप्रतिहविर्भिः स्तोत्रैः शस्त्रैश्चाभिमुख्येननमामः । यद्वा णुस्तुतौ । अयमत्रधातुःशब्दसारूप्यात् अभिनोनुमः अभिष्टुमः त्वांकृतकृत्याःसन्तः स्तुतस्तोत्राः कृतशास्त्राउद्यत हविष्काः । कथमिव । अदुग्धाइवधेनवः । बथाअदुग्ध अकृतकृत्याधेनवः वत्समभिष्टुवुः एवम् । कथंभूतं त्वामभिनोनुमः

मीशानमिन्द्रतस्थुषः ॥ ३५ ॥ नत्वावान् ॥ नत्वावाँ२ ॥ ऽअन्योदि व्योनपार्थिवोनजातोनजनिष्यते ॥ अश्वायन्तोमघवन्निन्द्रवाजिनः ॥

ईशानमस्यजगतः । जङ्गमस्य स्वर्दृशम् स्वःपश्यतीति स्वर्दृक् तंस्वर्दृशम् । यद्वास्वरादित्यः तद्वत् योदृश्यतेसस्वर्दृक्तंस्वर्दृशम् । ईशानंच हेइन्द्रतस्थुषः स्थितवतः स्थावरस्येत्यर्थः ॥ ३५ ॥ नत्वावान् । येनत्वावान् त्वत्सदृशः अन्यः दिव्यःदिविभवः नचपार्थिवःअस्तीतिशेषः । नचजातः नचजनिष्यतेउत्पत्स्यति अतःअश्वायन्तः अश्वान्कामयमानः हेमघवन् धनवन्इन्द्र । वाजिनः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वाजोन्नम् तद्येषामस्तिते वाजिनः हविषासंयुक्ताःसन्तः गव्यन्तःगाःकामयमानाः त्वांह-
वामहे आह्वयामः ॥ ३६ ॥ त्वामित् । बृहतोयोनिः देवतादितुल्यम् इच्छब्दएवार्थे हिर्निर-
र्थकः । त्वामेवहवामहे आह्वयामः । सातौवाजस्य सातिर्लाभः लाभेअन्नस्यविषयभूते । अपि-
चकारवः कर्त्तारः स्तोमानांवयम् त्वामेवचहवेषु शत्रुषुहन्तव्येषु हेइन्द्र सत्पतिंसतांपालयितारम्

जिनोगुव्यन्तंस्त्वाहवामहे ॥ ३६ ॥ त्वामित् ॥ त्वामिद्धिहवांमहे
सातौव्वाजंस्यकारवः ॥ त्वांव्वृत्रेष्विन्द्रसत्पतिन्नरस्त्वाङ्काष्ठास्वर्व
तः ॥ ३७ ॥ सत्वम्॥ सत्वन्नंश्चित्रवज्रहस्तधृष्णुयामुहस्तवानो

स्मृतिस्मृविहितानुष्ठातारोनिषिद्धकर्मपरित्यागिनःसन्तः तत्पतिम् । नरःमनुष्याः आह्वयन्ति ।
त्वामेवकाष्ठासु जेतव्यासु अर्वतःअश्ववतः रथिनोवा आह्वयन्ति । नहित्वदृतेपुरुषाणांकिञ्चि-
त्सिध्यतीत्यभिप्रायः ॥ ३७ ॥ सत्वम् । सःत्वंनः अस्मभ्यम् हेचित्र चायनीय हेवज्रहस्तः
धृष्णुयाप्रसहनेन महःमहत्वेनच स्तवानः स्तूयमानदृतिविकरणव्यत्ययः । हेअद्रिवः अद्रिवन् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अद्रिसारमयंवज्रन्तद्यस्यास्तीतिसंबोध्यते अद्रिवइति । गाम्अश्वञ्च रथ्यंरथेसाधुम् हेइन्द्र संकिर । संकिरतिर्दानातिशये अनेकदेशप्रकीर्णन्देहि कथमिव । सत्रावाजन्नजिग्युषे नकारउपमार्थीयः । यथाजिग्युषेविजितवते । अश्वायहस्तिनेवा । सत्राऽहाणसहितम् वाजंयवसम् सस्नेहमपरिमितंसंकिरेयुर्दद्युः एवमस्मभ्यन्देहि ॥ ३८ ॥ कयानः । वामदेव्यस्ययोनिः तिस्रऐन्द्र्यागोयत्र्यः अन्त्यपादनिवृत् । कयानश्चित्रआभुवदूती कयापुनः ऊतीऊत्या केनपुनरवनेनतर्पणेन । नःअस्मा-

ऽअद्रिवः ॥ गामश्वंरथ्यमिन्द्रसङ्किरसत्रावाजन्नजिग्युषे ॥ ३८ ॥ कयानः ॥ कयानश्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥ ३९ ॥ कस्त्वा ॥ सत्योमदानाम्मꣳहिष्ठोमत्सदन्धसः ॥

कम् चित्रः चायनीयःइन्द्रः आभुवत्भूयात् आकारोवृषणसहमंवधयते । सदावृधः सदाकालंवर्द्धयिता । सखाच कयाचनाम शचिष्टया शचीतिकर्मनाम मतुव्लोपः । अतिशयेनकर्मवत्या अद्भुताकर्मणा सदावृधःसखा भूयादितिवर्तते ।. ३९ ॥ कस्त्वा । कःनामत्वाम् मत्सत्मादयति । सत्यःअवितथः मदानांमदयितृणांमंहिष्ठः अतिशयेनमदजनकः । अन्धसःसोमस्यखभूतोंशः येनमत्तःस-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्त्वम्। दृढाचित् दृढान्यप्यसुरदृन्दानि। आरुजे आरुजसिचूर्णयसि वसुचददासीतिशेषः। यद्वा दृढान्यापिसुवर्णप्रभृतीनि चिरकालस्थायीनिवसूनिआरुजसिचूर्णयसिदानाय॥ ४०॥ अभीषुणः। आभिमुख्येनच सुष्ठुच। नःअस्माकंसखीनाम् अवितापालयिता। जरितॄणांस्तोतॄणाञ्च अस्माकम्पालयिता किञ्च। शतंभवासिशतधाभवसि हेइन्द्र ऊतयेअवनाय रक्षणाय। प्रकृत-

दृढाचिंदारुजेव्वसुं ॥ ४० ॥ अभीषुणंः ॥ *अभीषुणः सखीनामविता जंरित्तॄणाम् ॥ शतम्भवास्यूतयें ॥ ४१ ॥ युज्ञायंज्ञावः ॥ युज्ञायंज्ञा वोऽअग्नयेंगिरागिंराचुदक्षंसे ॥ प्रप्प्रंवयमृतंञ्जातवेंदसम्प्रियम्मि

त्वादस्माकमेवसखीनां जरितॄणाञ्च ॥ ४१ ॥ यज्ञायज्ञावः। आग्नेयस्यचः। तत्रहे दृहत्यौ-तृतीयासतोहहती। यज्ञायज्ञस्यसामान्योयोनिः यज्ञेयज्ञेइतिसप्तम्येकवचनस्य आआदेशः वीप्सा-याम्। वःइतियजमानविषयम् युष्मदर्थम् अग्नयेअग्निमितिविभक्तिव्यत्ययः वाक्यसंबन्धात्। गिरा-गिराच। तयातयाच गिरावाचास्तुतिलक्षणया दक्षसे। दक्षसमितिसन्नतिः। दक्षवन्तमुत्सा-

* पिबासोमम्मिबामुक्तस्यस्यामयीभुवोनूरणे शमीष्वेत्यादिसूत्रेण अभीतीकारस्यषुकारेपरेदीर्घोभवतितेनअभीषुणः इतिसिद्धम्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हवन्तम् अग्निविशेषणञ्चैतत् । प्रप्र:प्रसमुपोद:पादपूरणमित्यभ्यास: शिंसिषत्याख्यातेनसंवन्ध: प्रशं-
सिषंवयम् अहमितिवचनव्यत्यय: । अमृतममरणधर्माणम् जातवेदसंजातप्रज्ञानम् । प्रियंमित्रन्न
मित्रमेव । अथवाक्यर्थवशासदानुपूर्वी । अहंयज्ञेयज्ञे व:युष्मदर्थे अग्निन्दज्ञवन्तं तयातयाचस्तु-
त्याप्रशंसिषम् अमृतञ्जातवेदसं प्रियंमित्रमिव ॥ ४२ ॥ पाहिन: । गोपायव: अस्मान् । हेअग्ने

त्रन्नशंसिषम् ॥ ४२ ॥ पाहिनं ÷ ॥ पाहिनोऽअग्नऽएकयापाहि द्युत
द्वितीययाऽपाहिगीर्भिस्तिसृभिरुर्ज्जाम्पतेपाहिचतसृभिर्व्वसो॥४३॥
ऊर्ज्जोनपातम् ॥ ऊर्ज्जोनपातु ꣳसहिनायमꣳस्मुयुद्दाशेमहव्यदा

एकायागिरा ऋग्लक्षणया । पाह्युतगोपायच द्वितीयया द्वाभ्यांगीर्भ्यामृग्यजुर्लक्षणाभ्याम् । पाहि-
चगीर्भि: तिसृभि: स्तुतिभि: । हेऊर्जामन्नानांपते पाहिचचतसृभि:गीर्भि: । ऋगाद्यास्तिस्र: शिव०
गद्यपद्यकाव्यलक्षणाचतुर्थागी: । हेवसोवासयित: ॥ ४३ ॥ ऊर्जोनपातम् । सत्वं हेअध्वर्यो ऊर्जो- ५७३
नपातम् ऊर्जशब्देनापउच्यन्ते । ताभ्याओषधिवनस्पतयोजायन्ते तेभ्याएषजायतेइत्यपांपौत्रोग्नि: ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तम्। हिन। हिनु। तर्पय। अयम्अस्मयुः। अयंहिअग्निःअस्मान्कामयते। अतोवयञ्च। दाशेम-संकल्पंकुर्याम। हव्यदातये। हविषोदानाय। भुवद्वाजेष्वविता। यतोयम्वाजेष्वन्नेषुविषयभूतेषु अवितागोप्ता। भुवत्भवति। भुवद्वृधे वर्द्धनायचभवति। उतअपिच। त्रातातनूनांशरीराणाम् वहुवचनोपदेशात्भार्यादिशरीरग्रहणम् यतएवम् अतःऊर्जोनपातं हिनद्मितिसंवन्धः। एवमादू-

तये ॥ भुवद्वाजेष्ववितामुवद्वृधऽउतत्त्रातातनूनाम्॥४४॥ संव्वत्स रोसि॥परिवत्सरोसीदावत्सरोसीद्वत्सरोसिव्वत्सरोसि॥उषसंस्तेक ल्प्पन्तामहोरात्त्वास्तेकल्प्पन्तामर्द्धमासास्तेकल्प्पन्तान्मासास्तेक

रविप्रकर्षेण विषममन्वाख्याख्येयाः॥ ४४॥ संवत्सरोसि। सञ्चितोग्निरनेनवयुषा अभिस्तूयते। पञ्चसंवत्सरमयंयुगाधत्तं प्रजापतिमितियदुक्तंज्योतिः शास्त्रेतदिहोच्यते। हेअग्ने यस्त्वंसंवत्सरोसि। सर्वंखल्वसरितासि नचत्वामन्यःसारयति। यश्चत्वम्परिवत्सरोसि यश्चइदावत्सरोसि इदाइदानीमि-तिसमानार्थौ। यश्चइद्वत्सरोसि इदितिनिपातः। यश्चवत्सरोसिनिर्विशेषेण तस्यतेभवतः उषसःकल्प

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्तां क्रतुभावन्त्ववयवत्वेन । एवम् अहोरात्राः अर्द्धमासा मासाऋतवश्च संवत्सरश्चकल्पताम् । त्वञ्च प्रेत्यैप्रगमनाएत्यौआगमनाय मंचाञ्चप्रसारयच । समंचप्रचसारयच । स्वेच्छयासंकोचविकाशधर्मा-भवेत्यभिप्रायः । सुवर्णचिदसीत्याकृतिवचनम् तयादेवतया वाचासहितः । अङ्गिरस्वत् प्राणवव-

ल्पन्तामृतवस्तेकल्पन्ताएसंव्वत्सरस्तेकल्पताम्॥प्रेत्याऽएत्यैसञ्चा
ञ्चप्रचसारय॥सुपर्णचिदसित्यादेवतयाङ्गिरस्वद्ध्रुवःसीद॥४५॥[११]

इतिसंहितायांसप्तविंशोऽध्यायः ॥ २७ ॥

ध्रुवः शाश्वतिकः सीद अवस्थानंकुरु ॥ अभित्वाशूरनोनुमइत्यादिपरमेष्ठ्यपश्यत् ॥ ४५ ॥

इतिउव्वटकृतौ मंत्रभाष्ये सप्तविंशोध्यायः ॥ २७ ॥

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

(१) होतायक्षत्समिधेन्द्रम् । सौत्रामण्यामैन्द्रस्यपशोः प्रयाजप्रैषाः । एकादशऐन्द्रानेकेप्रथमस्येत्यैन्द्राः । आप्रीदेवतास्तु इन्द्रस्यैवविभूतयइति ॥ होतायक्षत् देव्यौहोतायजतु । समिधाइध्मकाष्ठेन हविर्भूतेन । समिधावासहितम् इन्द्रम् यइन्द्रः विषुस्थानेषु समिध्यते । प्रथमन्तावत् इडस्पदेपृथिव्या यजनायप्रदेशेसमिध्यते अग्न्यात्मना द्वितीयंविद्युदात्मना समिध्यते ।

* होतायक्षत् ॥ होतायक्षत्समिधेन्द्रंमिडस्पदेनाभांपृथिव्याऽअधिं ॥ दिवोवर्ष्मन्त्समिध्यतुऽओजिष्ठश्चर्षणीसहांवेत्वाज्यं

नाभौपृथिव्याअधि पृथिवीशब्देनान्तरिक्षमुच्यते । नाभिभूतेऽन्तरिक्षप्रदेशे अधेउपरि ततःतृतीयमादित्यात्मना दिवःद्युलोकस्य वर्ष्मन्वर्षिष्ठेप्रदेशेसमिध्यते एवंचिस्थानइन्द्रः सूयते । यश्च ओजिष्ठः अतिशयेनबली । केषांमध्ये । चर्षणीसहाम् चर्षणयोमनुष्याः तान्येसहन्तेअभिभवन्ति तेचर्षणीसहः देवाः तेषांचर्षणीसहां देवानांमध्ये । सचेज्यमानोवेत्तुपिबतु स्वमंशमा-

(१) इन्द्रमिडः सौत्रामणिकोऽध्याय इति कात्यायनोक्तेः अयमध्यायः सौत्रामणीसम्बन्धी सौत्रामण्यङ्गभूतयोरैन्द्रवायोधस्यारादयन्तपश्वोः प्रयाजानुयाजप्रैषरूपः तस्य प्रजापत्यश्विसरस्वत्योऽध्यायस्य ऋषयः ।

* होतायक्षदेकादशदेववार्हर्हादशपुनरग्नेवंचत्वारः षट्चत्वारिंठ० शत् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ज्यस्य । त्वमपि हेमनुष्यहोतः यज ॥ १ ॥ होतायक्षत्तनूनपातम् आप्रीदेवताभिप्राय मिन्द्राभिप्रायंवा । सहिमरीचेः पौत्रः । दैव्योहोतायजतु तनूनपातमिन्द्रम् ऋतिभिरवनैः सहितम् जेतारमश्वयज्ञवनाम् अपराजितम इन्द्रंदेवंदानादिगुणयुक्तम स्वर्विदम् । स्वर्गंवेत्तिजानाति स्वर्गेवाविद्यतेऽतिहस्वर्वित् तंस्वर्विदम् । केनयजतु । पथिभिर्मधुमत्तमैः । पथिशब्देनात्रह-

स्युहोतुर्य्यजं ॥ १ होतायक्षत्तनूनपातमृतिभिः ॥ होतायक्षत्तनून पातमृतिभिर्ज्जेतारमपराजितम् ॥ इन्द्रन्देवꣳस्वर्व्विदम्पथिभिर्म्मधुमत्तमैर्न्नराश꣡सेनतेजसाव्वेत्वाज्ज्यस्यहोतुर्य्यजं ॥२॥ होतायक्षदि

वीष्युच्यन्ते तैर्हिस्वर्गं लोकंप्रतिपतन्तियजमानाः । हविर्भिःमधुमत्तमै रतिशयेनरससंयुक्तैः । कथंभूतमिन्द्रम् । नराशंसेन यज्ञेनसहितम् तत्तनूनपात् नराशंसावेकस्मिन्प्रयाजेपठिता वतउभयवानयंप्रयाजः । तेजसाच सहितमिन्द्रंयजतु । सचेज्ञमानोवेत्तुपिबतु आज्यस्यस्वमशंस्त्वमपि हेमनुष्यहोतर्यज ॥ २ ॥ होतायक्षदिडाभिरिन्द्रम् । दैव्योहोतायजतु इडभिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रयाजदेवतयासहितमिन्द्रम् ईडितंस्तुतम् आजुह्वानमाह्वयमानं यजमानैरनेकशः । अमर्त्य-ममरणधर्माणम् । सचेजमानः देवः द्युस्थानइन्द्रः । देवैः द्युस्थानैः सवीर्यः समानवीर्यः । वज्रहस्तः । पुरन्दरःपुरान्दारयिता । वेतुपिबतु आज्यस्यस्वमशंत्वमपि हेमनुष्यहोतर्यज ॥ ३ ॥ होतायक्षद्बर्हिषीन्द्रम् । दैव्योहोतायजतु बर्हिषीन्द्रम् बर्हिषिप्रयाजदेवतायांस्थितमिन्द्रम् । यक्ष-

डाभिरिन्द्रम्॥ होतायक्षदिडाभिरिन्द्रमीडितमाजुह्वानुममर्त्य म्॥ दैवोदैवैःसवीर्य्योवज्रंहस्तःपुरन्दरोवेत्वाज्यस्यहोतर्य्यजं॥३॥ होतायक्षद्बर्हिषीन्द्रम् ॥ होतायक्षद्बर्हिषीन्द्रंनिषद्वरंवृषभन्नर्य्यापसम् ॥ वसुभीरुद्रैरादित्यैः सयुग्भिर्बर्हिरासदद्वेत्वाज्यस्यहोत्

साधनमेवात्रप्रयाजदेवतावर्हिः । कथंभूतमिन्द्रम् निषद्वरमनिकुर्वतां वरमत्कृष्टम् । वृषभंवर्षि-तारञ्च नर्यापसम् नर्यापसम । नृभ्योमनुष्येभ्योहितंनर्यंनर्यम् अपःकर्मयस्यसनर्यापाः तंनर्यापस-मिन्द्रम् । सचेज्यमानः वसुभिःरुद्रैःआदित्यैः । सयुग्भिःसमानयोजनैः बर्हिः आसदत् । आसी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दत्त्वितिलकारव्यत्ययः। वेत्तुपिवतु आज्यस्यस्वमशम् त्वमपिहेमनुष्यहोतर्यज ॥ ४ ॥ होतायच्च-
दोजोन । दैव्योहोतायजतु । ओजः नडुतिसमुच्चयार्थीयोनिपातः । ओजश्चवीर्यञ्चसहश्चबलञ्च
इन्द्रियशरीरमनोबलान्यपिसमुच्चितानि । कस्माद्धेतोरेतानियजतु । यतएतानि इन्द्रमवर्द्धयन्
वर्द्धयन्ति । इदानींनवस्तुत्यबलः स्तौति । एवमनेनकर्मणा कृतकृत्याःबलः । सुप्रायणाःसुप्रग-

र्य्यजं ॥ ४ ॥ होतायच्चदोजोनवीर्य्यं६सहोबलऽइन्द्रंमवर्द्धयन् ॥ सुप्रा
युणाऽअस्मिन्यज्ञेविश्रयन्तामृतावधोबलऽइदायमीढुषेऽयन्त्वा
उज्यंस्युहोतर्य्यजं ॥ ५ ॥ होतायच्चदुषेऽइन्द्रस्य ॥ धेनूसूदघेमातरा

मनाः अस्मिन्यज्ञे विश्रयन्ताम् विश्रिताभवन्तु । ऋतावधःसत्यबलोवा । यज्ञबलोवा इन्द्रायइन्द्रार्थम्
कथम् भूताय । मीढुषेसेक्त्रे व्यन्तुपिवन्तु आज्यस्वमंशं त्वमपिहेमनुष्यहोतर्यज ॥ ५ ॥ होतायच्चदुषे ।
दैव्योहोतायजतु । उषे नक्तोषासाविति प्राप्ते पूर्वपदलोपश्छान्दसः । इन्द्रस्यधेनू सुदुघेशोभनदो-
हने मातरामातरौ । महीमहत्यौ । तेचेज्यमाने सवातरोवातशब्दोवत्सवचनः समानोवातावः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्मा:ययोस्तेसवातरौ । नकारउपमार्थीय: । एकशिशुकेद्रवगावौतेजसावत्समिवइन्द्रम्अवर्द्धताम् । वीताम्पिवताम्आज्यस्यस्वमंशंत्वमपिहेमनुष्यहोतर्यज ॥ ६ ॥ होतायक्षद्दैव्याहोतारा । दैव्योहोतारावजतु दैव्यौहोतारौ । भिषजाभिषजौ देवानांवैद्यौ । सखायासखायौ समानख्यानौ । यौचहविषा इन्द्रम्भिषज्यत: । यौचकवीक्रान्तदर्शनौ यौचदेवौद्युस्थानौ यौचप्रचेतसौ प्रकृष्टज्ञानौ-

मुहो ॥ सुवातग्रीनतेजंसाव्वत्समिन्द्रंमवर्द्धतांव्वीतामाज्ज्यंस्यहोतुर्य्यजं ॥ ६ ॥ होतांयक्षद्दैव्याहोतांरा ॥ भिषजासखांयाहविषेन्द्रंम्भिषज्यतः ॥ कुवीद्दवीप्रचेंतसाविन्द्रांयधत्तऽइन्द्रियंव्वीतामाज्ज्यंस्यहोतुर्य्यजं ॥ ७ ॥ होतांयक्षत्तिस्रोदेवीः ॥ होतांयक्षत्तिस्रो

यौच इन्द्राय इन्द्रइतिविभक्तिव्यत्यय: । धत्त:स्थापयत: इन्द्रियंवीर्यम् । तौचेज्यमानौ वीताम्पिवताम् आज्यस्यस्वमशन्त्वमपि हेमनुष्यहोतर्यज ॥ ७ ॥ होतायक्षतिस्रोदेवी: । नभेषजं चयस्त्रिधातवोपस:नकारोभिन्नक्रम:समुच्चयार्थीय: । भेषजञ्च येचत्रयोलोका: त्रिधातव: । अग्निवायुसूर्यास्ते-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षांधातवः अपसः। अपइतिकर्मनाममत्वर्थीयलोपः। अपस्विनः कर्मवन्तः। शीतोष्णवर्षादी-
निहितेषा ङ्कर्माणि। तांश्चहोतायजतु। कतमास्तिस्रोदेव्यः इडासरस्वतीभारतीच। महीःम-
हतीः इन्द्रपत्नीःइन्द्रस्यपालयित्रीः हविष्मतीःहविषासंयुक्ताः। ताश्चेज्यमानाः व्यन्तुपिवन्तु आजा-
स्यस्वमशंत्वमपि हेमनुष्यहोतर्यज ॥ ८ ॥ होतायक्षत्वष्टारमिन्द्रम्। दैव्यौहोतायजतु। त्वष्टारम्प्र-

देवीर्न्नभेषुजन्क्षयंस्त्रिधातवेपसऽइडासरस्वतीभारतीमहीः ॥ इन्द्रं
पत्नीर्हविष्मतीर्य्यन्त्वाज्य्यस्यहोतर्य्यज ॥ ८ ॥ होतायक्षत्त्वष्टा
रमिन्द्रम् ॥ होतायक्षत्त्वष्टारमिन्द्रन्देवम्भिषजꣳसुयजन्घृतश्रि
यं म् ॥ पुरुरूपꣳसुरेतसम्मघोनमिन्द्रायत्त्वष्टादधदिन्द्रियाणिव्वेत्वा

याजदेवताम्। इन्द्रम्इदिपरमैश्वर्ये त्वष्टाचेन्द्रः सामानाधिकरण्यात्। देवन्दानादिगुणयुक्तम
भिषजमिंद्रस्य। सुयजम्। साधुयष्टव्यम् अक्लेशयागम्वा। घृतश्रियम् आज्यहविष्काहिप्रयाजाः।
पुरुरूपं वहुरूपम् सुरेतसंशोभनरेतस्कम् मघोनंमघवन्तंधनवन्तम्। सचेज्यमानस्त्वष्टाइंद्राय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इंद्रेइतिविभक्तिव्यत्ययः दधत्स्थापयत् इंद्रियाणिवीर्याणि । वेत्तुचपिवतुच आजस्यस्वमंशं त्वमपिहेमनुष्यहोतर्यज ॥ ९ ॥ होतायक्षद्वनस्पतिम् । दैव्योहोतावनस्पतियजतु । शमितारंहविषासंस्कर्तारम् शतक्रतुम्वहुकर्माणम् । धियोजोष्टारम् बुद्धेःकर्मणोवासवितारम् । इंद्रियंवीर्यात्मकम् सचेजग्मानः । मध्वासमञ्जन् मधुस्वादुनाघृतेसमञ्जन् यज्ञंसंसृष्टीकुर्वन् । पथिभिःसुगेभिः

ज्ज्यस्यहोतुर्य्यजं ॥ ९ ॥ होतायक्षद्वनस्पतिꣳशमितारम् ॥ होतायक्षद्वनस्पतिꣳशमितारꣳशतक्रꣳतुन्धियोजोष्टारमिन्द्रियम् ॥ मद्ध्वासमञ्जन्न्पथिभिः॑सुगेभिꣳस्वदातियज्ञम्मधुनाघृतेनव्वेत्वाज्ज्यस्यहोतुर्य्यजं ॥ १० ॥ होतायक्षदिन्द्रꣳस्वाहा ॥ होतायक्षदिन्द्रꣳ

मार्गैःशोभनगमनैः । स्वदातियज्ञम् । स्वदातिःप्रापणार्थः । प्रापयतुयज्ञंदेवाननु मधुनामधुस्वादुनाघृतेन सहितम् । वेत्तुचपिवतुचाजस्य स्वमंशंत्वमपि हेमनुष्यहोतर्यज ॥ १० ॥ होतायक्षदिंद्रम् । दैव्योहोयजतु इंद्रम् । स्वहाजास्य स्वाहाकारेणाजदेवतानाञ्च संस्थाङ्करोतु । स्वाहा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मेदसः । स्वाहाकारेणमेदोदेवतानाञ्च संस्थाङ्करोतु । स्वाहास्तोकानाम् स्तोकाविंदवः । स्वाहाकारेण चस्तोकदेवतानांसंस्थांकरोतु । स्वाहा स्वाहाकृतीनाम् स्वाहाकारेणचस्वाहाकृतिदेवतानांसंस्थांकरोतु । स्वाहादेवाआज्यपाजुषाणाइंद्रआजग्मग्म । प्रयाजानुयाजावैदेवाआज्यपाः । स्वाहाकारेणवैदेवाआज्यपाः जुषाणाः सेवमानाः प्रीयमाणावाइंद्र । आजग्मग्मवेत्तु स्वमंशंपिबतु त्वमपिहेम-

स्वाहाज्ज्यंस्युस्वाहामेदंसः स्वाहास्तोकानाꣳस्वाहास्वाहाकृतीनाꣳ स्वाहाहव्यसूक्तीनाम्॥ स्वाहादेवाऽआज्ज्यपाजुषाणाऽइन्द्रऽआ ज्ज्यꣳस्युव्यन्तुहोतुर्य्यजं ॥ ११॥ [११] देवम्बर्हिरिन्द्रꣳसुदेवन्देवैर्वीर वंत्स्तीर्णंवेद्यांमवर्द्धयत् ॥ व्वस्तोर्व्वृतम्प्राक्तोर्भ्भृतꣳगायाबर्हिष्म्मतो

नुष्यहोतर्यज ॥११॥ देवंवर्हिः । एकादशानुयाजप्रैषाः ऐन्द्राःमैत्रावरुणोव्रवातियज्ञसाधनभूतं वर्हिरिहदेवता । यद्देवंवर्हिः । इंद्रमवर्द्धयदितिसंवन्धः कथंभूतमिंद्रम् । सुदेवम् शोभनादेवामरुदादयोयस्य समुदेवः तंसुदेवम् । देवैर्वीरवत् वर्हिषोविशेषणमेतत् । देवैःहविषादातृभिः ऋत्विग्भिः वीर-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वत्वीरयुक्तम् । यच्चस्तीर्णंवेद्याम् यच्चबर्हिःवस्तोर्वृतम् अहनिलूनम् यच्चअक्तोरात्रीप्रभृतम प्रधारितम् । वस्तोरहर्वचनः अक्तोरात्रिवचनः इत्यन्ययहयम् । इन्द्रमवर्द्धयदितिमन्त्रसंवध्यते यच्चरायाधनेन हविर्लक्षणेन अन्यान्यजमानान् बर्हिष्मतः बर्हिषासंयुक्तान् अत्यगात् अतिक्रम्यगतंसंस्कारोत्कर्षात् तद्वत्रिः वसुवनेवसुबननायच वसुधेयस्यवसुधानाय धननिखननायच वेतुपिवतु । त्वच्चहेहोतःयज ॥ १२ ॥ देवीर्द्वारः यच्चदेवद्वारउच्यते यादेव्योयच्चदेवद्वारः इन्द्रम्यामन् यामनिकर्मप्रा-

त्यंगाद्वसुवनेव्वसुधेयंस्यव्वेतुयजं॥१२॥ देवीर्द्वारः॥ देवीर्द्वारऽइन्द्रंस
ङ्घातेवीड्वीर्यामंन्नवर्द्धयन्॥आवत्सेनतरणेनकुमारेणचमीवता या

प्तैःसत्याम् अवर्द्धयन् । यास्चसंघाते देहली कपाटपुटार्गलादि संघातेसतिवीड्वी दृढाः । नहिसंघातमन्तरेण तासां दृढत्वमुपपद्यते । ताइदानीम् आभिमुख्येनस्थित्वा वत्सेनतरुणेन कर्मक्षमेण कुमारेण चमीवता मीङ् हिंसायाम । शत्रूंहिंसावता अपअर्वागम् रेणुकाटम समासपदमेतत् नुदन्ताम । इतिपदानि अपनुदन्तामपनयन्त् । वत्सैः पुत्रैश्चअर्वतेगम्यते प्राप्यतेयस्मिन्स्थित्यर्वातमर्वागम् रेणुकाटम् । काटःकूपः । ककाराभ्यासःकुत्सार्थः । रेणुःपूर्णःकुत्सितःकूपःरेणुकाटः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तंरेणुकंकाटम् उपलक्षणमेतत् यन्नभंशकराणिकूपादीनि यन्नमार्गादपनयन्त्वित्यर्थः । वसुवननाय वसुनिधानायच व्यन्तुपिबन्तु त्वमपिहेहोतर्यज ॥ १३ ॥ देवीउषासानक्ता । येदेवयी उषाश्चनक्तारावित्र इन्द्रंयज्ञेप्रयतिगच्छति वर्तमाने अह्वेताम् आहूतवत्यौवर्द्धनाय । येचदेवयी देवीर्विशः । वसवोरुद्राआदित्या विश्वेदेवामरुतइत्यादिकाः प्रतिअयासिष्टाम् गतवत्यौस्वेनसम्भोगेन ।

व्यंणत्रेणंकंकाटन्नदन्तांव्वसुवनेंव्वसुधेयंस्यव्यन्तुयजं ॥ १३ ॥ देवी ऽउषासानक्ता ॥ देवीऽउषासानक्तेन्द्रंय्युज्ञेप्रयुत्यृच्वेताम् ॥ दैवी र्व्विशुःप्रायांसिष्टाऽसुप्रीतेसुधितेव्वसुवनेंव्वसुधेयंस्यव्वीतांय्यजं।१४।

यद्वा । दैव्यौवाएताविशोयत्पशवइतिश्रुतिः दैवीर्विशः यन्नाङ्गभूताम्पशून्प्रति अयासिष्टां गतवत्यौ अनुयाजेषुहितयोर्भाग इत्यभिप्रायः । येचसुप्रीतेसाधुप्रीते । येचसुधितेसाधुहिते । तेवसुवननायवसुनिधानायच वीतांपिबतां त्वमपिहेहोतर्यज ॥ १४ ॥ देवीजोष्ट्री । देव्यौजोषयित्र्यौ । इदानीन्देवता विकल्पः । द्यावापृथिव्याविवाहोरात्रेइतिवा । सख्यञ्चसमाचेतिकात्थक्यः येदे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्यौजोषयित्यौ । वसुधितीवसुधान्यं यातेवसुनोधारयित्यौवा । येचदेवमिन्द्रम् अवर्द्धताम् अवर्द्धयताम् । अयाश्चन्याघाद्वेषांसि ययोश्च मध्ये अयावि । युपृथग्भावे पृथक्करोतिलकारव्यत्ययः । अन्याएका अघाअघानिपापानि द्वेषांसिचदौर्भाग्यानि आअन्यावच्चत् वसुवार्याणियजमानाय । अन्याएकाआवच्चत् आवहतिवसूनिवरीयाणि यजमानार्थम् । कथंभूते शिक्षितेविदि-

देवीजोष्ट्रीं ॥ देवीजोष्ट्रीव्वसुंधितीदेवमिन्द्रंमवर्द्धताम् ॥ अयांव्युन्या घाद्वेषाꣳस्यान्न्याव्वंच्चद्वसुव्वार्य्याणियजंमानायशिक्षितेव्वंसुवनेंव्वसु धेयंस्यव्वीतांव्यजं ॥ १५ ॥ देवीऽऊर्ज्जाहुंती ॥ देवीऽऊर्ज्जाहुंतीदुघे सुदुघेपयुसेन्द्रंमवर्द्धताम् ॥ इषुमूर्ज्जमुन्न्याव्वंच्चत्सग्घ्रुꣳसपीति

तवेद्येतत्वच्चे । तेचवसुवननायवसुधानायच वीतां पिबतान्वमपि हेहोतर्यज ॥ १५ ॥ देवीजर्जाहुती । अधस्तनप्रैषोक्तएव देवताविकल्पः । येदेव्यौ ऊर्जाहुतीऊर्जाह्वान्यौ दुघेदोग्ध्र्यौ अन्योन्यम् । अनयोरनुसंभोगमिमाः सर्वाःप्रजाः । अनुसम्भुञ्जतद्वृतिस्तुतिः । सुदुघेसाधुदोहने येचपयसा इन्द्रम्अवर्द्धतामवर्द्धयताम् । ययोश्च । इषमन्नम्ऊर्जञ्चतदुपसेचनन्दध्यादि अन्याएकाआ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वत्तत् आवहतियजमानाय। सग्धिंसपीतिमन्या अन्याअपराच सग्धिंसमानांजग्धिंपुचपौत्रादिभिः। सपीतिंसमानाम्पीतिं पानञ्चआवत्तत्। आवहतियजमानाय नवेनपूर्वंदयमानेपुराणेननवमधाताम्। येचदेव्यौनवेन ऊर्जान्धान्येनपूर्वंपुरातनम्ऊर्जन्धान्यम्। दयमाने दयतिःरूपदयाकर्मा। रक्षितवत्यौसत्यौ अधाताम् पुराणेनच ऊर्जाधान्येन नवमूर्जन्धानम् अधाताम्।

मुन्न्यानवेंनुपूर्व्वंन्दयंमानेपुराणेनुनवमधांतामूर्ज्जंमूर्ज्जाहुंती ऽऊर्ज्जयंमानेव्वसुव्वार्य्यांणियज'मानायशिक्षितेव्वंसुवनेंव्वसुधेयंस्यव्वीतांय्यज' ॥ १६ ॥ देवादैव्व्यां ॥ देवादैव्व्याहोतांरादेवमिन्द्रंमवर्द्ध

धारितवत्यौ। येचऊर्जाहुती ऊर्जयमानेस्वीकुर्वाणे। वसूनिवरणीयानियजमानाय। शिक्षितेविदितवेद्येच वसुवननाय वसुधानायच वीताम्प्रियताम् त्वमपिहेहोतर्यज ॥ १६ ॥ देवादैव्या। यौदेवौ दैव्यौहोतारौ। एकःपार्थिवोग्निः एकश्चमध्यमः। देवमिन्द्रमवर्द्धताम यौचहतावशंसावभार्ष्टावसुवार्याणियजमानायशिक्षितौ। अघम्पापंयेशंसन्ति तेअघशंसा हताअघशंसायाभ्यान्तौ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हताघशंसो। आभार्ष्टाम् आहार्ष्टाम् हतवन्तौवसूनिवरणीयानि यजमानाय। शिक्षितौअवगतार्थौ तौचवसुवननाय वसुधानायच वीतांपिवतां त्वमपिहेहोतर्यज ॥ १७ ॥ (१) देवीस्तिस्रः। आदरार्थोभ्यासः पतिन्देवानाम्यालयितारम् इद्रमवर्द्धयन्। तासांमधेप्रभारती भरतआदित्यः

ताम् ॥ हुताघंशꣳसावाभार्ष्टांव्वसुव्वाय्यांणियज॑मानायशिक्षितौ व्वसुवनेव्वसुधेयंस्यव्वीतांय्यज॑ ॥ १७ ॥ देवीस्तिस्रः। देवीस्तिस्र स्तिस्रोदेवीः पतिमिन्द्रंमवर्द्धयन् ॥ अस्पृक्षद्भारंतीदिवꣳरुद्रैर्य्युज्ञꣳ सरंस्वतीडाव्वसुंमतीगृहान्व्वंसुवनेव्वसुधेयंस्यव्वान्तुयज॑ ॥ १८ ॥

तस्यदृयक्षारती दिवम् अक्षत्स्पृशति। रुद्रैर्यज्ञं सरस्वती सरस्वतीचरुद्रैः सहितायज्ञम् अस्पृक्षत्। इडाचवसुमतीवसुभिः तद्वतीगृहान् अस्पृक्षत्। गृहशब्देनात्रायंलोकोभिधीयते लक्षणयापृथिवीस्थानत्वादिडायाः। ताःवसुवननाय वसुधानायच व्यन्तुपिवन्तु त्वमपिहेहोतर्यज ॥ १८ ॥

(१ अतिजगतीच्छन्दस्कं यंऋक्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देवइन्द्रः । यज्ञोदेवता देवःदानादिगुणयुक्तः यज्ञःइन्द्रः । इदिपरमैश्वर्य परमेश्वरः । नरा-
शंसः नराअस्मिन्नासीनाः शंसन्तीतिनराशंसः । त्रिवरूथाः । वरूथशब्दोगृहवचनः त्रीणिव-
रूथानि गृहाणिसहोहविर्धानाग्नीध्राणियस्य सत्रिवरूथः । त्रिवन्धुरः वन्धुरशब्दःसारथिस्था-
नवचनः । त्रीणिवन्धुराणिसारथिस्थानानि ऋग्यजुःसामलक्षणानियस्य सत्रिवन्धुरः । देवमिंद्रम-

देवऽइन्द्रः ॥ देवऽइन्द्रोनराशꣳसस्त्रिवरूथस्त्रिबन्धुरोदेवमिन्द्रमव
र्द्धयत् ॥ शतेनंशितिपृष्ठानामाहितꣳ सहस्रेणप्रवर्त्ततेमित्त्वावरुणे
दंस्यहोत्त्रमर्हंतोबृहस्पतिंस्तोत्त्रम् श्रिश्रवनाद्ध्वर्य्यवंव्वसुवनेंव्वसु
धेयंस्यव्वेतुयज ॥ १९ ॥ देवोदेवैः ॥ देवोदेवैर्व्वनस्पतिर्हिरंण्यपर्णो

वर्द्धयत् । यश्च शतेनशितिपृष्ठानामाहितः । शतगुणोहिअग्निराधेयः तदभिप्रायमेतत् । सह-
स्रेणगवांप्रवर्तते । सहस्रेणगवांयष्टव्यमित्यर्थः । यस्यचास्य मित्रावरुणाइत् मित्रावरुणावेवहो-
त्त्रमर्हतः । बृहस्पतिश्च स्तोत्त्रमौद्गात्रमर्हति । अश्विनौच आध्वर्यवमर्हतः । सवसुवननाय
वसुधानायच वेतुपिवतु त्वमपिहेहोतर्यज ॥ १९ ॥ देवोदेवैः । यूपउच्यते योदेवोवनस्पतिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देवैरेवहिरण्यपर्णः देवाःसौवर्णानिपर्णानियस्यसतथोक्तः । मधुशाखः मधुरसवतीशाखायस्य समधुशाखःदेवैरेव । सुपिप्पलः साधुफलोदेवैरेव । देवमिन्द्रमवर्द्धयत् यश्चदिवम् अग्रेणअस्पृक्षत् स्पृशति । आअन्तरिक्षम्स्पृक्षदित्यनुषङ्गः । मधोरनेतिशेषः साकांक्षत्वात् । पृथिवीमदृंहीत् पृथिवीम्उपरेणेतिशेषः अदृंहीत्दृढामकरोत् सवनस्पतिः वसुवननायवसुधानायच वेतुपिवतु ।

मधुशाखःसुपिप्पलोदेवमिन्द्रमवर्द्धयत् ॥ दिवमग्रेणास्पृक्षदान्तरिक्षम्पृथिवीमदृंहीद्वसुवनेवसुधेयस्यवेतुयजं ॥ २० ॥ देवम्बर्हिः॥ देवम्बर्हिर्वारितीनान्देवमिन्द्रमवर्द्धयत् ॥ स्वासस्थमिन्द्रेणासंनमु

त्वमपिहेहोतर्यज ॥ २० ॥ देवंबर्हिः । यद्देवंबर्हिः वारितीनाम् । वाःउदकम्दृणगतौ वारुदकमितिःस्थानंयस्यतावारितय ओषधयः तासांमध्येदेवंबरिष्टम् । यद्वाबार्यइतिदर्भरूपेणावस्थानं येषांतेवारितयःदर्भाः । अत्रश्रुतिः । तदेताभ्यामृत्युना तीत्युपक्रम्य । तस्मादुहैकाआपोवीभस्याश्चक्रिरेइति अभिधीयते । तद्यमेदर्भाइत्याह । वारितीनान्दर्भाणांसंघातभूतम् देवमिन्द्रम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वर्द्धयत्। यच्चस्वासस्थम् साधुआस्थेयंदेवमनुष्यैः। यवच इन्द्रेणआसन्नम् आस्थितम् यच्च अन्याअन्यानिहवींषिअभ्यभूत् अभिभवतीतिकालव्यत्ययः। तत्वसुवननाय वसुधानायच वेतु-
पिवतु त्वमपिहेहोतः यज ॥ २१ ॥ देवोअग्निः। स्विष्टकृत् शोभनमिष्टंकर्तव्यमिति यस्या-

न्याबर्हीꣳष्यभ्यभूद्वसुवनेव्वसुधेयंस्यव्वेतुयजं ॥ २१ ॥ देवोऽअ
ग्निः ॥ देवोऽअग्निःस्विष्टकृद्देवमिन्द्रमवर्द्धयत् ॥ स्विष्टकृद्भूर्व
न्स्विष्टकृतिस्वष्टमद्यकरोतुनोव्वसुवनेव्वसुधेयंस्यव्वेतुयजं ॥ २२॥
अग्निमद्यहोतारमवृणीतायंयजमानः पचन्नपक्तीः पचन्नपुरो
डाशंम्बद्ध्वन्निन्द्रायुक्षागम् ॥ सूपस्थाऽअद्यदेवोव्वनस्पतिरभवदि

यमधिकारः देवंच इन्द्रमवर्द्धयत्। यश्चस्विष्टंकुर्वन् स्विष्टकृतनामभूतःसः। स्विष्टंसाध्विष्टम् अद्य अस्मिन्कर्मणिकरोतु नोस्माकम् अपिच वसुवननाय सुधानायच वेतुपितु त्वमपिहेहोतर्यज ॥ २२॥

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अग्निमद्य । व्याख्यातः प्रैषः ऐन्द्रएकः पशुरितिविशेषः ॥ २३ ॥ होतायक्षत् । इन्द्रायवयो-धसे । पशुसंस्कारश्चैन्द्रः । तत्रैतेप्रैषाः अतः प्रयाजदेवताऽ विरोधेनयथैन्द्राः संपद्यन्तेतथा-व्याख्यायन्ते । दैव्योहोतायजतु । समिधानमग्निम् । महद्वयशः अग्निसम्बन्धि । सुसमिद्धं

न्द्रायुच्छागेन ॥ अघुत्तम्मेदस्तः प्रतिपचताग्रभीदवीद्वधत्पुरोडा शेन ॥ त्वामद्याऽऋषे ॥ २३ ॥ [१२] होतायक्षत् ॥ होतायक्षत्स मिधानम्महद्यशः सुसमिद्धंवरेण्यमग्निमिन्द्रंवयोधसम् ॥ गायत्री च्छन्दऽइन्द्रियन्त्रविष्टुभंवयोदधद्वेत्वाज्यस्यहोतर्यज ॥ २४ ॥

चाग्निमेव । वरेण्यंवरणीयंचाग्निम् । इन्द्रंचवयोधसम् वयः अधातव्यमस्मिन्नितिवयोधा स्तंव-योधसम् वयसः आयुषोवाधारयितारम् । किंकुर्वन् दैव्योहोतायजतु । गायत्रीवच्छन्दः इन्द्रि-यम्वीर्यंच चाविंचगांवयश्चआयुः दधत्धारयन् इन्द्रेइत्यध्याहारः प्रकरणात् । प्रयाजदेवताव इन्द्रसहितावेतुपिबतु आज्यस्यस्वमंशंत्वमपिहेमनुष्यहोतर्यज ॥ २४ ॥ होतायक्षत्तनूनपातम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दैव्योहोतायजतु तनूनपातम् उक्षिदम् उक्षेत्तारं यज्ञफलानाम्। यंचगर्भमदितिः दधेधारि-
तवती। शुचिंपविवम्। इन्द्रंचयजतु वयोधसम् वयआयुर्धीयतेयस्मिन् तंवावयसोधारयि-
तारंवा। किङ्कुर्वन्दैव्योहोतायजतु। उषाहंचछन्दः इन्द्रियंवीर्यंचदित्यवाहंचगांवयआयुश्च इन्द्रे-

होतायक्षत्तनूनपातमुक्षिदम्॥ होतायक्षत्तनूनपातमुक्षिदंयङ्गर्भ्मं
मदितिर्दधेशुचिमिन्द्रंव्वयोधसम्॥ उषाणाहुच्छन्दऽइन्द्रियन्दित्यु
वाहुङ्गांव्वयोदधद्धेत्वाज्यस्यहोतर्य्यज॥ २५॥ होतायक्षदीडेन्न्यं
मीडितम्॥ होतायक्षदीडेन्न्यंमीडितंबर्हिर्यक्षहन्तंमिडाभिरीड्यं॰

दधत् धारयन्। प्रयाजदेवताच इन्द्रसहितावेतुपिवतु आज्यस्यस्वमग्नं त्वमपिहेमनुष्यहोत-
र्यज॥ २५॥ होतायक्षदीडेन्यम्। दैव्योहोतायजतु। ईडेन्यंस्तुत्यम् ईडतेरेन्यप्रत्ययः। ईडितम्
ऋषिभिः स्तुतम। बर्हिर्हन्तमम् अतिशयेनहविषोहन्तारम्। इडाभिः प्रयाजदेवताभिः ईड्यंस्तु-
त्यम्। इन्द्रविशेषणान्येतानि। सहः सोमंचयजतु। सहः सोमश्चौ नैघंटुकौइन्द्रसम्बन्धा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्पठ्यते। इन्द्रं चवयोधसं वयसश्चायुषोधारयितारम्। किंकुर्वन्यजतु। अनुष्टुभंचछन्दः इन्द्रि-
यम्वीर्यंच पञ्चाविंचगांवयश्चायुश्च इन्द्रे दधत्धारयन्। प्रयाजदेवताच इन्द्रसहितावेतुपिवतु
आज्यस्यस्वमंशं त्वमपिहेमनुष्यहोतर्यज ॥ २६ ॥ होतायक्षत्। दैव्योहोतायजतु। सुवर्हिषंशो-

सहꣳसोमुमिन्द्रंव्वयोधसंम्॥ अनुष्टुभ्च्छन्दंऽइन्द्रियम्पञ्चांविङ्गाँव्व
योदधुद्वेत्वाज्यंस्युहोतुर्य्यजं ॥ २६ ॥ होतांयक्षत्सुबर्हिषंम्पूषणव
न्तंम्॥ होतांयक्षत्सुबर्हिषंम्पूषणवन्तुममर्त्यंꣳ सीदन्तम्बर्हिषिप्रि
येमृतेन्द्रंव्वयोधसंम्॥ बृहतीच्छन्दंऽइन्द्रियत्त्रिंवत्सङ्गाँव्वयोदधुद्वे

नवर्हिष्कम्। पूषणवन्तंपूष्णासंयुक्तम् अमर्त्यममरणधर्माणम्। सीदन्तंवर्हिषिप्रियेअवस्थानंकुर्वन्तं
वर्हिष्यभिरुचिते अमृतेइन्द्रंवयोधसम्। किंकुर्वन्यजतु। बृहतीचछन्दः इन्द्रियंवीर्यंच त्रिव-
त्संचगांवय आयुश्च इन्द्रे दधत्धारयन्। प्रयाजदेवताचेज्यमाना इन्द्रेणसह वेतुपिवतु आज्य-
स्यस्वमंशंत्वमपि हेमनुष्यहोतर्यज। ननुप्रयाजदेवताया आत्वधिकरणभावः केवलमुपलभ्यते-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नतु देवतात्वमिति यश्चोद्येत् तम्प्रत्याह। इत्थंभूतमेव वर्हिषोदेवतात्वमित्यदोषः। तथाहा-
रामपिदेवतात्वम् ॥ २७ ॥ होतायक्षद्यचस्वतीः। दैव्योहोतायजतु व्यचस्वतीर्व्यश्वनवतीर्गमन-
वतीः। सुप्रायणाः साधुप्रगमनाः ऋताबृधः सत्यवृधोवा यज्ञवृधोवा। द्वारः यज्ञगृहद्वारः

त्वाज्ज्यंस्युहोतुर्य्यजं ॥ २७ ॥ होतांयक्षद्व्यचंस्वतीः सुप्प्रायुणाः ॥ होतांयक्षद्व्य चंस्वतीः सुप्प्रायुणाऽऋंतावृधोद्वारोंदेवीर्हिरण्ययीर्व्रह्माणमिन्द्रंव्वयोधसंम् ॥ पुङ्क्तिश्छन्दंऽइहेन्द्रियन्तुर्य्यवाहुङ्गाँव्व योदधद्वान्त्वाज्ज्यंस्युहोतुर्य्यजं ॥ २८ ॥ होतांयक्षत्सुपेशंसासुशि

द्वितीयबहुवचनान्तान्येतानिपदानि। देवीर्यज्ञफलदात्रीः हिरण्मयी अविनाशिनीः। तथा। ब्रह्मा-
णंपरिवृढम् इन्द्रंवयोधसम् आयुषोधारयितारम्चयजतु। पङ्क्तिंचछन्दः। इहेत्यभिनयदर्शनम्। इहास्मिन्निन्द्रे इन्द्रियंवीर्यंच तुर्य्यवाहंगांच आयुश्चदधत् धारयन् सेन्द्राद्वारश्चेज्यमानाव्यन्तु पिवन्तु आज्यस्यस्वमंशंत्वमपि हेमनुष्यहोतर्यज ॥ २८ ॥ होतायक्षत्सुपेशसा। दैव्योहोताय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जतु सुपेशसासुपेशसौपेशइतिरूपनाम। सुरूपे। सुशिल्पे। यद्वैप्रतिरूपं तच्छिल्पम् अन्यो-न्यंप्रतिरूपे। बृहतीमहत्यौ उभेनक्तोषासान। समुच्चयार्थीयोनकारः उभेअपिनक्तोषसौ। नक्ताचरात्रिः उषाश्चरात्रेरपरकालः। दर्शतेद र्शनीये। विश्वंसर्वात्मकमिन्द्रं वयोधसम् आयु-

लप्पे ॥ बृहतीऽउभेनक्तोषासानदर्शतेविश्वंविश्वमिन्द्रंव्वयोधसम् ॥ त्रिष्टुभुञ्छन्दऽइन्द्रियम्पष्ठवाहङ्गाँव्वयोदधद्धीतामाज्यंस्यहो तुर्ज्जजं ॥ २९ ॥ होतायक्षत्प्रचेतसादेवानांमुत्तमंव्यशोहोतारादैव्यां कवीसुयजेन्द्रंव्वयोधसम् ॥ जगतीञ्छन्दऽइन्द्रियमनड्वाहङ्गांव्वयो

षोधारयितारञ्च यजतु। किंकुर्वत्यजतु। त्रिष्टुभंचछन्दः इन्द्रइंद्रियंच वीर्यंपष्ठवाहं गांच-वय आयुश्चदधत् धारयन्। नक्तोषासौसेंद्रेचेज्यमाने वीतांपिवतामाजास्य स्वमंशंत्वमपि हेमनुष्यहोतर्यज ॥ २९ ॥ होतायक्षत्प्रचेतसा। दैवोहोतायजतु प्रचेतसाप्रकृष्टज्ञानौ। यौच-देवानामुत्तमं यशः पश्चौ। पुञ्जीकृतय होतारौदैव्यौ अयंचाग्निरसौचमध्यमः। कवीक्रान्त-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दर्शनौ। सयुजासह योगिनौ इंद्रश्चवयोधसम् आयुषोधारयितारम्। किङ्कुर्वन्दैव्योहो-
तायजतु। जगतीञ्छन्दः इंद्रियं वीर्यं च। अनड्वाहंच गांवयः आयुश्चइंद्रे दधत् धारयन्। तौच-
दैव्यौ होतारौसेंद्रा वीजग्रमानौ वीतांपिवता माज्यस्यस्वमंशं त्वमपिहेमनुष्यहोतर्यज ॥ ३० ॥
होतायक्षत्पेशस्वतीः। दैव्योहोतायजतु पेशस्वतीःरूपसमृद्धाः तिस्रोदेवीःहिरण्ययीः हिरण्या-

दधद्घृतामाज्यंस्यहोतुर्यजं ॥ ३० ॥ होतायक्षत्पेशंस्वतीस्तिस्रः ॥
होतायक्षत्पेशंस्वतीस्तिस्रोदेवीर्हिरण्ययीर्भारतीर्बृहतीर्मह्योऽपति
मिन्द्रंवयोधसम्॥विराजञ्छन्दऽइहेन्द्रियन्धेनुङ्कान्नवयोदधद्यान्त्वा

लङ्कृतशरीराः। भारती.भरतआदित्यः तस्यभारतीःबहुवचनमिडासरस्वत्युपलक्षणार्थम्। बृहतीः
प्रभावतःमहत्यःआदित्येन्द्राग्निसंबन्धात्। पतिम्पालयितारम् इन्द्रञ्चवयोधसम् आयुषोधारयितारम्।
यजतु। किंकुर्वन्यजतु विराजञ्छन्दः इहास्मिन्निन्द्रे इंद्रियंवीर्यञ्च। धेनुङ्कांन नकारःसमुच्चयार्थीयः।
धेनुञ्चगांवयआयुश्च दधत्धारयन्। तिस्रोदेव्यश्च सेन्द्राईज्यमानाः व्यन्तुपिवन्तु आज्यस्य स्वमंशंत्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मपि हेमनुष्यहोतर्यज ॥ ३१ ॥ होतायक्षत्सुरेतसम् । दैव्यो होतायजतु सुरेतसंत्वष्टारम् । शोभनंहि रेतस्त्वष्टुर्जगदुत्पत्तिवीजत्वात् । पुष्टिंवर्द्धयितारम् । रूपाणिविभ्रतंपृथक्पुष्टिम् । जाति-षुरूपाणि पुष्टिञ्चपृथक्धारयन्तम् । इंद्रञ्चवयोधसम आयुषोधारयितारंयजतु । किंकुर्वन्यजतु द्विपदञ्चक्रन्दः इंद्रियंवीर्यम् उक्षाणङ्कांन नकारःसमुच्चयार्थीयोभिन्नक्रमः । उक्षाणञ्चगाम् वय-

उज्यंस्युहोतुर्य्यजं ॥ ३१ ॥ होतायक्षत्सुरेतंसुत्वष्टारम् ॥ होतायक्ष त्सुरेतंसुत्वष्टारम्पुष्टिंवर्द्धनꣳरूपाणिबिभ्रंतुम्पृथुक्पुष्टिंत्रिन्द्रंव्व योधसंम् ॥ द्विपंदुक्रन्दंऽइन्द्रियमुक्षाणङ्कान्नव्वयोदधद्वेत्वाज्य'स्यु हो तुर्य्यजं ॥ ३२ ॥ होतायक्षद्वनस्पतिंꣳशमितारंम् ॥ होतायक्षद्वनस्प

आयुश्च इंद्रेदधत्धरयन् । त्वष्टाचसेन्द्रःईज्यमानः वेतुपिवतु आज्यस्यस्वमंशंत्वमपि हेमनुष्य-होतर्यज ॥ ३२ ॥ होतायक्षद्वनस्पतिम् । दैव्योहोतायजतु वनस्पतिंशमितारं हविषःसंस्कर्तारम् शतक्रतुंबहुकर्माणम् । हिरण्यपर्णम् सुवर्णमयपत्रम् । उक्थिनम् । वचपरिभाषणे अस्यउक्थम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वचनवन्तंयज्ञवन्तंवा। रशनांविभ्रतम् स्वरूपानुवादः। यूपेहिपशुवन्धनार्थंरज्जुर्वध्यते। वशिं-
कान्तम्भगम्भजनीयम्। इंद्रञ्चवयोधसमायुषोधारयितारंयजतु। किंकुर्वन् दैव्योहोतायजतु।
ककुभञ्छन्दः इहेंद्रेइंद्रियंवीर्यञ्च वशांवन्ध्यांवेहतङ्गर्भघातिनीञ्चगांवयआयुश्च दधत्धारयन्। वन- २८
स्पतिश्च सेंद्रईज्यमानः वेतुपिवतुआज्यस्य स्वमंशंत्वमपिहेमनुष्यहोतर्यज ॥ ३३ ॥ होतायच-

तिंऽशमितारंऽशुतक्रंतुंऽहिरंण्यपर्णमुक्थिनंऽरशनाम्बिभ्रंतंव्वशि
म्भगमिन्द्रंव्वयोधसंम् ॥ ककुभुछन्दंऽइहेंद्रियंव्वशांव्वेहतङ्गांव्वयो
दधद्वेत्वाज्यस्यु होतर्य्यज ॥ ३३ ॥ होतायचुत्स्वाहांकृतीरग्निम् ॥
होतायचुत्स्वाहांकृतीरग्निङ्गृहपतिम्पृथुग्गवरुंणम्भेषजङ्गविङ्क्षुत्त्र

त्स्वाहाकृतीः। दैव्योहोतायजतुस्वाहाकृतीःप्रयाजदेवताः। अग्निञ्चगृहपतिं पृथक्यजतु।
वरुणञ्चभेषजम्। तथा कविंक्रान्तदर्शनं क्षत्रस्यधारादृत्तिंतारम् इंद्रञ्चवयोधसमायुषोधारयि- शिव०
तारम् यजतु। किंकुर्वन्यजतु यतिछन्दसञ्चछन्दः इंद्रियञ्चवीर्यं वृहत्महत् ऋषभञ्चगांवय- ५८६

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आयुश्च इंद्रेदधत्धारयन्। सेंद्रश्चप्रयाजदेवता ईजामाना व्यंतुपिवन्तुआजास्य स्वमंशंत्वमपि हैमनुष्यहोतर्यज ॥ ३४ ॥ अथवयोधसोनुयाजप्रैषाः। देवंबर्हिः यत्देवंद्योतनंबर्हिः। वयोधसमायुषोधारयितारं देवंदानादिगुणयुक्तम् इंद्रम् अवर्द्धयत्किंकुर्वन्। गायत्याछन्दसाइंद्रियवी-

मिन्द्रंव्वयोधसंम् ॥ अतिंच्छन्दसुच्छन्दंऽइन्द्रियम्बृहद्यंषुभङ्गांव्वयोद धन्त्वाज्ज्यंस्यहोतुर्य्यजं ॥ ३४ ॥ [११] देवम्बर्हिः ॥ देवम्बर्हिर्व्वं योधसन्देवमिन्द्रंमवर्द्धयत् ॥ गायुच्याच्छन्दंसेन्द्रियञ्चक्षुरिन्द्रेव्वयोद धंद्दसुवनेंव्वसुधेयंस्यव्वेतुयजं ॥ ३५ ॥ देवीर्द्वारंः ॥ देवीर्द्वारोंव्वयोध

र्यञ्चक्षुश्च इंद्रेवयआयुश्चदधत्धारयत्। तत्वसुवनायवसुधानायच वेतुपिवतुआजास्यस्वमंशं त्वमपिहेहोतर्यज ॥ ३५ ॥ देवीद्वारः। यादेव्यःद्वारः वयोधसमायुषोधारयितारम् शुचिंपवित्वम् इंद्रम्अवर्द्धयन् किंकुर्वयः। उष्णिहाछन्दसा इंद्रियंवीर्यंप्राणञ्च इंद्रेवयआयुश्चदधत्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दधत्यद्भृतिलिङ्गवचनव्यत्ययः धारयन्त्यद्भृत्यर्थान्तरम्। ताःवसुवननायवसुधानायच व्यन्तुपिवन्तु त्वमपिहेहोतर्यज ॥ ३६ ॥ देवीउषासानक्ता। येदेव्यौउषासानक्ता उषाश्चरात्रेरपरकालः नक्तं-तिरात्रिनाम। देवमिंद्रंवयोधसमायुषोधारयितारम्। देवीदेव्यौदेवम् एकोदेवीशब्दोदीप्तिवचनो-

सुशुचिमिन्द्रंमवर्द्धयन् ॥ उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रेव्वयो दधद्वसुवनेव्वसुधेयंस्यव्यन्तुयजं ॥ ३६ ॥ देवीऽउषासानक्ता ॥ देवमिन्द्रंव्वयोधसंन्देवीदेवमंवर्द्धताम् ॥ अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयंस्यव्वीतांयजं ॥ ३७ ॥ देवीजोष्ट्रीं ॥

परोदानादिगुणयुक्तवचनः देवशब्दोप्येवमेव। अवर्द्धताम् किंकुर्वन्त्यौ। अनुष्टुभाछन्दसा इंद्रियंबलंच इंद्रेवयआयुश्च दधत्धारयन्त्यौ। तेवसुवननाय वसुधानायच वीतांपिबतामाजाघ्र स्वमंशन्त्व-मपिहेहोतर्यज ॥ ३७ ॥ देवीजोष्ट्री। येदेव्यौजोष्ट्रौ जोषयित्र्यौ। वसुधिती वसुधात्र्यौ देवं-दीतंवयोधसमायुषोधारयितारमिंद्रम् देव्यौदेवम् अवर्द्धताम्। तेदृहत्याछन्दसा इंद्रियंवीर्यं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

थोवंचइन्द्रेवयआयुश्च दधत्धारयन्त्यौ सत्यौवसुवननाय वसुधानायच वीतांपिवतामाज्यस्य ऽऽमंशं-
त्वमपि हेहोतर्यज ॥ ३८ ॥ देवीऊर्जाहुतो । येदेवीदाक्ष्यौ ऊर्जाहुतीऊर्जाह्वान्यो दुघेदोग्ध्र्यो
सुदुघेसुदोहनेपयसा इन्द्रंवयोधसं देवीदेव्यौद्वारस्थानेदेवंद्वारस्थानम् श्रवर्द्धताम् । तेपंक्त्याऽऽ-

देवीजोष्ट्रीव्वसुंधितीदेवमिन्द्रंव्वयोधसंन्देवीदेवमंवर्द्धताम् ॥ बृहत्त्या
च्छन्दसेन्द्रियꣳश्रोत्रमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयंस्यव्वीतांस्यजं ॥
॥ ३८ ॥ देवीऽऊर्ज्जाहुंती ॥ देवीऽऊर्ज्जाहुंतीदघेंसुदुघेपयसेन्द्रँव्वयो
धसंन्देवीदेवमंवर्द्धताम् ॥ पङ्क्त्याच्छन्दसेन्द्रियꣳशुक्रमिन्द्रेव्वयोदधद्वसु
वनेव्वसुधेयंस्यव्वीतांस्यजं ॥ ३९ ॥ देवादैव्या ॥ देवादैव्याहोतारा
न्द्रसा इन्द्रियंवीर्यंशुक्रं च इन्द्रेवयआयुश्च दधत्धारयन्त्यौ वसुवननायवसुधानायच वीतांपिवता
माज्यस्यत्वमंशंत्वमपिहेहोतर्यज ॥ ३९ ॥ देवादैव्या । यौदेवौ दातारौदैव्यौहोतारौ । अयंचा-
ग्निरसौचमध्यमः । देवंदातारमिन्द्रंवयोधसमायुषोधारयितारम देवीद्वारस्थानौ देवंद्वारस्थानम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अवर्द्धताम् । तौत्रिष्टुभाकुन्दसा इन्द्रियंवीर्यन्त्विषिर्दीक्षिन्द्वन्द्रे वयश्चायुः दधत् धारयन्तौ वसुव- ननायवसुधानायच वीतांपिबता माज्यस्यस्वमंशं हेहोतर्यज ॥ ४० ॥ देवीस्तिस्रः । याः तिस्रो- देव्यः सरस्वतीडाभारत्यः । आदरार्थमभ्यासः । वयोधसमायुषोधारयितारम् पतिंपालयितव्यम् इन्द्रमवर्द्धयन् । ताजगत्याकुन्दसा इंद्रियवीर्यम् । शुष्मम् शुष्मशब्दोबलवचनः । बलम् इंद्रे-

देवमिन्द्रंव्वयोधसंन्देवीदेवमंवर्द्धताम् ॥ त्रिष्टुभाच्छन्दसेन्द्रियन्त्वि षुमिन्द्रेव्वयोदधंद्वसुवनेव्वसुधेयंस्यव्वीतांप्यजं ॥ ४० ॥ देवीस्तिस्रः ॥ देवीरतीस्रस्तिस्रोदेवीर्व्वयोधसम्पतिमिन्द्रंमवर्द्धयन्॥जगत्याच्छन्दसे न्द्रियंशूषमिन्द्रेव्वयोदधंद्वसुवनेव्वसुधेयंस्यव्व्यन्तुयजं॥४१॥ देवोनरा

वयश्चायुश्च दधत् दधत्यः वसुवननाय वसुधानायच वान्तुपिबन्तु आजस्यस्वमंशं हेहोतर्यज ॥ ४१ ॥ देवोनराशंसः । योदेवोदुरस्यानो नराशंसोयज्ञः देवंदुरस्यानम् इंद्रम वयोधसमायुषोधारयिता- रम् । देवोदेवम् दानादिगुणयुक्तंद्युभवत्र । अवर्द्धयत् । सदृदानींविराजाकुन्दसा इंद्रियंवीर्यं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रूपञ्चेन्द्रे वयआयुश्च दधत् धारयन् वसुवननाय वसुधानायच वेतुपिवतु आजास्यस्वमंशं हेहोतर्यज ॥ ४२ ॥ देवोवनस्पतिः । योदेवोवनस्पतिर्यूपः देवंद्युस्थानम् इन्द्रंवयोधसमायुषोधारयितारम् देवोदेवम् दोषइत्युभयत्र । अवर्द्धयत् । सइदानीम् द्विपदाछन्दसा इन्द्रियंवीर्यं भगमैश्वर्यंच

शꣳसः ॥ देवीनराशꣳसोदेवमिन्द्रंव्वयोधसन्देवोदेवमवर्द्धयत् ॥ द्विरा जाच्छन्दसेन्द्रियꣳरूपमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वेतुयजं ॥४२॥ देवोव्वनस्पतिः ॥ देवोव्वनस्पतिर्हेवमिन्द्रंव्वयोधसन्देवोदेवमवर्द्धयत् ॥ द्विपदाच्छन्दसेन्द्रियम्भगमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वेतुयजं ॥ ४३ ॥ देवस्बर्हिः ॥ देवस्बर्हिर्व्वारितीनान्देवमिन्द्रंव्वयोध

इन्द्रेवयआयुश्च दधत् धारयन् वसुवननायच वसुधानाय वेतुपिवतु त्वमपिहेहोतर्यज ॥ ४३ ॥ देवंबर्हिः । यद्देवं अष्ठम् बर्हिः । वारितीनाम् वाभ्राः अद्भ्राः इतीनामुद्गतानाम् । ओष-धीनामित्यर्थः । देवंद्युस्थानम् इन्द्रंवयोधसमायुषोधारयितारम् देवन्देवम् दानादिगुणयु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कृदृत्यु भयत्र । अवर्द्धयत् । तत्कुकुभाछन्दसा इन्द्रियंवीर्यंयशश्च इन्द्रेवयआयुश्च दधत्धारयन् वसुवननाय वसुधानायच वेतुपिबतु आज्यस्यस्वमंशं त्वमपिहेहोतर्य्यज ॥ ४४ ॥ देवोअग्निः । यौदेवोद्युस्थानः अग्निःस्विष्टकृत्साधुइष्ट कर्तव्यमितियस्यायमधिकारः । देवंद्युस्थानम

सन्देवन्देवमंवर्द्धयत् ॥ कुकुभाच्छन्दसेन्द्रियंव्ययशऽइन्द्रेव्वयोदधद्ध सुवनेव्वसुधेयस्यव्वेतुयजं ॥ ४४ ॥ देवोऽअग्निः ॥ स्विष्टकृद्देवमिन्द्रँ व्वयोधसन्देवोदेवमंवर्द्धयत् ॥ अतिच्छन्दसाच्छन्दसेन्द्रियङ्चुच मिन्द्रेव्वयोदधद्ध सुवनेव्वसुधेयस्यव्वेतुयजं ॥ ४५ अग्निमुद्यहोतारम वृणीतायँय्यजमानः पचन्पक्तीः पचन्नपुरोडाशंम्बध्नन्निन्द्रायव्वयो

इन्द्रंवयोधसमायुषोधारयितारम् । देवोदेवम् दीप्तहृत्यु भयत्र । अवर्द्धयत् अतिछन्दसाछन्दसामहदानोम् इन्द्रियंवीर्यम् चवंचतोवाणम् इन्द्रेवयआयुश्च दधत् धारयन् वसुवननाय-वसुधानायच वेतुपिबतु आज्यस्यस्वमंशं त्वमपिहेहोतर्य्यज ॥ ४५ ॥ अग्निमद्योति व्याख्यातम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इन् द्रायवयोधसे इतिविशेषः ॥ ४६ ॥

इतिउव्वट कृतौमन्त्रभाष्येष्टाविंशतितमोध्यायः ॥ २८ ॥

धसेच्छागम् ॥ सुपुरस्थाऽग्नेद्यटेवोव्वनस्पतिरभवदिन्द्रायव्वयोध सेच्छागेन ॥ अघुत्तमोदुस्तः प्रतिपचुताग्र्यंभीदवीद्वधत्पुरोडाशेन ॥ त्वामुद्यऽऋंषे ॥ ४६ ॥ [१२] ॥ ४ ॥

इतिसंहितायांअष्टाविँशोऽध्यायः ॥ २८ ॥

* समिंद्धोऽअञ्जन् ॥ समिंद्धोऽअञ्जन्कृदंरम्मतीनाङ्घृतमंग्नेमधुंमु

(१) एकादशत्रिष्टुभः । आप्रीनराशंसाः दृहदुक्थोवामदेव्यः । अश्वोवासमुद्रिरपश्यत् । अश्वस्तुति. आश्वमेधिकं प्रागाग्नेयः कृष्णग्रीवदूत्येतस्मात् हेभगवन्नग्ने समिद्धःसंदीप्तः । अञ्जन्व्यक्तीकुर्वन्

(१) आश्वमेधिकोऽध्यायः ततोऽस्य प्रजापतिर्ऋषिः । आद्या एकादश त्रिष्टुभः आप्रीसञ्ज्ञाः अश्वस्तुतयो वामदेवपुत्रेण दृहदुक्थेन समुद्रपुत्रेणाश्वेन वा दृष्टाः समित्तनूनपादिडादिदेवताकाः

* समिद्धोअंजन्नेकादशयदक्रंदस्त्रयोदशसमिद्धोअद्यद्वादशकेतंकृण्वंश्चतुर्विंठंशतिश्चत्वारः षष्टिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आज्येहिसर्वासांदेवतानांमनांस्येतानिममेदंस्यान्ममेदंस्यादिति । घृतंमधुमत् मधुखा दु । अ० २६
पिबमानः आत्मानंप्रतिसिञ्चन् स्वेच्छयापिबन्नित्यर्थः । वाजीवेजनवान् चलनवान् वहन्वा
जिनंहविः । हेजातवेदः । देवानांवक्षिवहप्रापय । प्रियम्आसधस्थं सहस्थानम् ॥ १ ॥
घृतेनांजन् । प्रथमोर्ध्वचः परोक्षकृतः उत्तरःप्रत्यक्षकृतः । यतस्तयोरेकवाक्यतानोपपद्यते

त्पिबन्वमानꣳ ॥ वाजीवहंन्वाजिनंज्जातवेदोदेवानांव्वक्षिप्रियमा
सुधस्थंम् ॥ १ ॥ घृतेनाञ्जन् ॥ घृतेनाञ्जन्त्सम्पथोदेवयानान्प्रजा
नन्वाज्यप्येतुदेवान् ॥ अनुत्वामपतेप्रदिशꣳ सचन्ताꣳस्वधाम
स्मैयजमानायधेहि ॥ २ ॥ ईड्यश्च ॥ ईड्यश्चासिव्वन्द्यश्चवाजि

अतः पुरुषव्यत्ययः । घृतेनअंजन्समञ्जन् । पथः देवयानान् । हवींषिदेवयानाः पन्थानउ
च्यन्ते । तैर्हितेजीवन्ति। प्रजानन् अहंदेवानांहविरितिजानन् वाजीअपितु अभ्यागच्छतु देवान् ।
किञ्च । अनुसचन्ताम् अनुसेवन्ताम् त्वांहेसप्तेसरण । प्रदिशः दिगाश्रयाणिभूतानि । शिवम्
किञ्चस्वधामन्नम् अस्मैयजमानाय धेहिप्रयच्छ अत्रघृतशब्दस्तनूनपात्शब्दपर्यायः ॥ २ ॥ ५६०

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ईड्यश्चासि । यस्त्वम् ईड्यश्चासि स्तुत्यश्चासि । वंद्यश्च । हेवाजिन् आशुश्च शीघ्रश्च मेद्धाश्च यज्ञसंपादीचश्चसि हेसप्त । तंत्वाम् अग्निः देवैःवसुभिः सजोषाः समानजोषणः प्रीतम् आप्रीभिः प्रीतम् । निर्हंवोढारम् वहतुप्रापयतु जातवेदाः ॥ ३ ॥ स्तीर्णंबर्हिः । स्तीर्णमपि-वर्हिः सुष्टरीम् साधुस्तृणाम आजुषाणा विभक्तेर्डादेशः । सेवमानम् । ततस्तीर्यमाणम् उरुवहु

न्नाशुश्चासिमेद्धाश्चसप्ते ॥ अग्निष्ट्वादेवैर्व्वसुभिः सुजोषाः प्रीतं व्वह्न्निँव्वहतुजातवेदाः ॥ ३ ॥ स्तीर्णम्बर्हिःसुष्टरीमाजुषाणोरुपृथु प्रथमानम्पृथिव्याम् ॥ देवेभिर्युक्तमदितिः सुजोषाःस्योनङ्कृण्वा नासुवितेदधातु ॥ ४ ॥ एताऽउवः ॥ सुभगाविश्वरूपाविपक्षो

पृथु विस्तीर्णम् प्रथमानम् । पृथिव्यांवेद्याम् । देवेभिः देवैःयुक्तम् । अदितिः सजोषासमानजोष-णामह । प्रीयमानास्योनंसुखं कृण्वानाकुर्वाणा । सुवितेसुगतेस्वर्गेप्रजादांवा । दधातुस्थापयतु ॥४॥ एताउवः एतास्त्वग्गृहद्वारः हेऋत्विग्यजमानाः वः युष्माकं सुभगाःविश्वरूपाः अनेकरूप चित्रिताः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भिः अयमाणाऽउदातैः । पक्षोभिः उदातैः ऊर्ध्वमायातैः । सततमायातैः सततगमनैः विश्वय माणाविस्तीर्यमाणाः । पक्षस्शब्दःसान्तः कपाटवचनः । क्षट्वाः महत्यः सतीःसत्यः कवषः कुषिता मसुषिराः । शुंभमानाः आत्मानंशोभयन्त्यः । द्वारोदेवीः दीप्तिमत्यः । सुप्रायणाः सुप्रगमनाः भवन्तु ॥ ५॥ अन्तरामित्रावरुणा । ये अन्तरामधेयन मित्रावरुणाचरन्ती । अयम्वैलोकोमित्रोसौवरुण

भिꣳ श्रयंमाणाऽउदातैꣳ ॥ क्षट्ष्वाꣳ सतीꣳ कवषꣳ शुम्भंमानाद्वारो देवीꣳ सुंप्रायुणाभंवंतु ॥ ५ ॥ अन्तरामित्रावरुंणा ॥ अन्तरामित्रा वरुंणाचरंन्तोमुखंय्युज्ञानांमभिसंव्विदाने ॥ उषासांवाꣳसुहिरुण्ये

इतिश्रुतिः द्यावापृथिव्योर्मध्येन सञ्चरन्त्यौ । मुखंयज्ञानामभिसम्विदाने यज्ञानांमुखमग्निहोत्रं तस्यकालम् अभिसम्बिदाने प्रकथयन्त्यौ । उक्तिऽतामयमग्निहोत्रहोमकालःप्राग्नदृतीबलच्यते । तेउषासा द्विवचनोपदेशा त्सहचरितत्वाच्च द्वितीयारात्रिः । नक्तोषासौ बांयुबयोः हेदम्पति-यजमानौ सुहिरण्ये साधुहिरण्यालङ्कारभूषिते । सुशिल्पेसाध्वन्योन्यंप्रतिरूपे क्षतस्ययज्ञस्ययोनो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इहसादयामिस्थापयामि ॥ ६ ॥ प्रथमावाम् । यौप्रथमौहोतारौ अयञ्चाग्निरसौचमधाम: । वांयुवयो: हैदम्पतीयजमानौ । सरथिना एकरथारूढौ सुवर्णाशोभनवर्णौ । देवोदानादिगुणयुक्तौ पश्यन्तौभुवनानि भूतजातानि । विश्वानिसर्वाणि मधास्थतया । अपिप्रयम् प्रीणातेरेतद्रूपम् । प्रीणितवानहमस्मितौचोदनासुप्रमाणकंकर्म । वांयुवयो: हैदम्पतीयजमानौ

सुंश्रिल्पेऽऋतस्ययोनांविहसांदयामि ॥ ६ ॥ प्रथुमावांम् ॥ प्रथुमावांऽसरथिनांसुवर्णांदेवौपश्यंन्तौभुवंनानिविश्वा ॥ अपिंप्रयुञ्चोदंनावाम्मिमांनाहोतांराज्योतिंः प्रदिशांदिशन्तां ॥ ७ ॥ आदित्यैर्न्नंः ॥ आदित्यैर्न्नोभारंतीव्वष्टुयुज्ञ्चंसरंस्वतीसुहरुद्रैर्न्नंऽआ

मिमानानिर्मिमानौ होतारौ ज्योति:प्रदिशादिशन्ता । आहवनीयाख्यंज्योति: पृष्टव्यमिति प्रदिशाप्रदेशेनअभिनयेन दिशन्तादर्शयन्तौ । आशतेइतिवाच्यम् ॥ ७ ॥ आदित्यैर्न: । अचयय: पादा:परोचक्रता: चतुर्थ:पाद:प्रत्यचक्रत: । नचैवंसामजस्यम् अतश्चतुर्थस्य पादस्यसन्तति: ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आदित्यैःसहितानेअस्माकंभारतीवष्टुकामयतांयज्ञम्। सरस्वतीरुद्रैः सहितां नःअस्मान् आवीत्अवतु। इडाचउपहूता कृतपोद्धाना वसुभिः सजोषासमानप्रीतिः नःआवीदित्यनुवर्तते। एवमनेनप्रकारेण यज्ञंनोअस्माकं तिस्रोदेव्यः अमृतेषुदेवेषु धत्तदधत्वितिपुरुषव्यत्ययः परोक्षीकृत्यस्तुताः ताइदानींप्रत्यक्षकृताः स्तौति। यज्ञंनोदेवीरमृतेषुधत्तेति ॥ ८ ॥ त्वांष्टवी-

वीत् ॥ इडोपंहूतावसुंभिः सुजोषांयज्ञन्नोंदेवीरमृतेंषुधत्त ॥ ८ ॥ त्वष्टांवीरम् ॥ त्वष्टांवीरन्देवकांमञ्जजानुत्वष्टुरर्वांजायतऽआशुर श्वः॥त्वष्टेदंविश्वम्भुवनञ्जजानबृहोऽकृत्तारंमिहयंज्ञियंच्छतः॥९। अश्वोंघृतेनुत्मन्यासमंक्तऽउपंदेवाꣳ ॥ ऽऋतुशः पाथंऽएतु ॥

रम्। यःत्वष्टावीरंपुत्रम् देवकामम् देवगत्रयापाकरणसमर्थं जजानजनयति। यस्माच्चत्वष्टुः अर्वाअरणः आशुःशीघ्रः अश्वःजायते। यश्चत्वष्टा इदंविश्वंसर्वं भुवनंभूतजातं जजानजनयति। तंत्वष्टारं वहोःभूतग्रामस्यकर्तारम् इहयज्ञेयज्ञियज हेहोतः ॥ ९ ॥ अश्वोघृतेन। यःअश्वः पत्नीभिःघृतेनत्मन्या आत्मनास्वयमेवसमक्तः समुचितःसन्। उपएतु उपगच्छतु देवान्प्रति ऋतुशः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऋताव्रतौ कालेकाले पाथःअन्नं भूत्वा । कथंदेवलोकमजानन्नदेवान्प्रतियायादित्यतआह । वनस्पतिःदेवलोकंप्रजानन् अश्वस्यदर्शयत्वितिशेषः । अग्निनाच तन्मिश्रेण हव्याहवींषि स्वदितानिसृष्टीकृतानि वक्षत्वहतुदेवान्प्रति ॥ १० ॥ प्रजापतेस्तपसा । यस्त्वंप्रजास्तपसा वाव्रधानःवर्द्धमानः सद्योजातः अरण्योःशकासाद्दुत्पन्नःदधिषेधारयसि यज्ञं हेअग्ने । तंत्वांब्रवीमि

व्वनुस्पतिर्देवलोकम्प्रजानन्न्नग्निनाहुव्यास्वदितानिव्वक्षत् ॥१०॥ प्रजापतेस्तपसा ॥ व्वाव्रधानःस्द्योजातोदधिषेषुज्जभंग्ने ॥ स्वाहाकृतेनहुविषापुरोगायाहिसाध्याहुविरन्दन्तुदेवाः ॥ ११ ॥ [११] यदक्रन्दः ॥ प्रथमञ्जायमानऽउद्यन्त्समुद्राद्दुतवापुरीषात् ॥ श्येन

स्वाहाकृतेनहविषा । स्वाहाकारोपलक्षितेनहविषा पुरोगाःपुरोगामीसन् । याहिसाध्या साधुशब्दविभक्त्यर्थेड्यादेशेटिलोपः । साधुहविःअदन्तुदेवाः ॥ ११ ॥ यदक्रन्दः । त्रयोदशत्रिष्टुभोऽभिष्टवोहोतुः । यत्यदा अक्रन्दः क्रेषाशब्दमकार्षीः । प्रथमञ्जायमानः यज्ञउद्यन्उद्गच्छन् समुद्रात्अन्तरिक्षलोकात् पार्थिवाद्वासमुद्रात् । उतवाअपिच पुरीषात्अन्यस्माज्जलसंघात्यज्ञोवा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उद्यन्नक्रन्दः तदाश्ग्येनस्यपत्त्रौशीघ्रतयाऽजैषीः हरिणस्यवाहूशीघ्रतयाऽजैषीःइतिशेषः । उपस्तुत्य-
मुपसङ्गम्य स्तुत्यंस्तवनीयस्यऋषिभिः महिमहत् जातमुत्पन्नम् तेतव हेअर्वन्अरणअश्व ॥ १२ ॥
यमेनदत्तम् । अचचतुर्थःपादःप्रथमंव्याख्यायतेयोग्यत्वात् । सूरादश्वंवसवोनिरतष्ट हेवसवःयूयं-
सूरात् आदित्यमण्डलात् अश्वंनिरतष्ट । तक्षतिःकरोतिकर्मा निष्कृष्यकृतवन्तः । तंयमेन्दत्तम्

स्यंपत्त्राहंरिणस्यंबाहूऽउंपस्तुत्यम्महिंजातन्तेऽअर्व्वन् ॥ १२ ॥ युमे
नंदत्तम् ॥ युमेनंदत्तन्त्वितऽएंनमायुनगिन्द्रंऽएणम्प्रथमोऽअङ्गाति
ष्ठत्॥गन्धर्व्वोऽअस्यरशनामगृभ्णात्सूरादश्वंव्वसवोनिरंतष्ट ॥१३॥
असिंयुमऽ॥असिंयुमोऽअस्यादित्योऽअर्व्वन्नसित्वितोगुह्यैंहनव्व्रतेनं॥

त्वितःत्विस्थानोवायुः एनम्आयुनक्युक्तवान् । इन्द्रश्चएनंप्रथमःअधातिहत् । गन्धर्वश्चविश्वावसुः
अस्यरशनाम् अगृभ्णात् अगृह्णात् । यद्वृत्वंभूतोश्वःतंवयंस्तुमइतिवाक्यशेषः ॥ १३ ॥ असियमः ।
भवसिचआदित्यः हेअर्वन्अरणअश्व । भवसिचत्वित स्विस्थानइन्द्रः गुह्येनगुप्तव्रतेनकर्मणा ।
भवसिचसोमेनसमयामधातः विपृक्तःसंपृक्तः एकीभूतः । एतामिर्देवताभिस्त्वसायुजाञ्जातमि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्यभिप्रायः। किञ्च आहुःबुधाः तेतव। त्रीणिदिविद्युलोके आदित्यात्मनावस्थितस्य। वन्धनानिरश्मयः सामलक्षणानि। मण्डलान्तरपुरुषार्चींषि ॥ १४ ॥ त्रीणिते। त्रीणितआहुर्दिविवन्धनानि इतिव्याख्यातम्। त्रीणिअप्सुवन्धनानि कृषिर्वृष्टिर्बीजमिति। त्रीण्यन्तः समुद्रे समुद्रशब्देनान्तरिक्षमभिधीयते। अन्तरिक्षस्य मध्येतवत्रीणिवन्धनानि। मेघोविद्युत्

असि सोमेनस मयाव्विपृक्ताऽआहुस्ते त्रीणिदिविबन्धनानि॥ १४॥ त्रीणितऽआहुर्दिविबन्धनानित्रीण्यप्सुत्रीण्यन्तःसमुद्रे॥ उतेवमे व रुणश्छन्त्स्यर्व्वन्नात्रीतऽआहुःपरमज्रनित्रम्॥१५॥इमातेवाजिन्नव मार्ज्जनानीमाशुफ्रानांऽसनितुर्न्निधानां॥ अत्रीतभुद्वारंशुनाऽअप

अशनिरिति उतइवअपिच। मेममवरुणःक्रंत्सि क्रन्दतिरर्वतिकर्मा शंसतिकथयति हेअर्वन्अरणअश्व। यत्रतेतवआहुःपरमज्रनिवं जन्मवायुरूपेण ॥ १५ ॥ इमाते। इमानितेतव हेवाजिन्अश्व। अवमार्जनानियैस्तवावमार्जन क्रुतन्तान्येवमार्जनानि नूतनवेतसकटप्रभृतीनि अहमपश्यम्पश्यामि। इमानिचशफानांखुराणांसनितुःसम्भक्तुः पादवाससः निधानानिधानानि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यत्र पादवासः प्रभृतीनिधीयन्तेतानि अहमपश्यम् । अपिच अत्रतेतवभद्रा भन्दनीयास्तुत्याः रशनाअहमपश्यम् । ऋतसत्यञ्चसत्यारशना अभिरक्षन्तिगोपाः गोपायितव्यान्पशून् ॥ १६ ॥ एतैरधस्तनै रश्वचरित्रै रश्वमभिष्टुत्य अथेदानींभविष्यत्कर्मभिरभिष्टौति । अत्मानन्ते । पशुसंर्शनोत्तरकालम् आत्मानन्तेतवदिव्यसहंमनसा आरात्दूरात् अजानाम्जानामि । जानातेरे-

प्रयमृतस्यया३ऽअभिरक्षन्तिगोपा३ ॥ १६ ॥ आत्मानन्ते ॥ आत्मानन्ते मनसा रादंजानामुवोदिवापतयन्तम्पतङ्गम् ॥ शिरोऽअपश्यम्पथिभिः सुगेभिररेणुभिर्जेहमानम्पतत्रि च ॥ १७ ॥ अत्रन्ते ॥ रूपमुत्तममपश्युञ्जिगीषमाणमिषऽआपदेगो३॥ युदाते मर्त्तोऽअनुभोगुमा

तदनुदात्तत्वाद्रूपं लुङ्यकवचने । अवःअधस्तात् प्रदेशात् । दिवादिवंप्रतिपतयन्तम् उत्पतयन्तम् पतङ्गम् आदित्यरूपिणम । शिरश्चाहंतवअपश्यम् पथिभिःमार्गैः सुगेभिः सुगमनैः अरेणुभिःउपद्रवरहितैः जेहमानङ्क्षत् पतत्रिउत्पतनशीलम् ॥ १७ ॥ अत्रते । अत्रद्यलोकेतेतवरूपमुत्तमम् अहमपश्यम्पश्यामि कथंभूतम् । जिगीषमाणं जेतुमिच्छति इषःअन्नानिआत्मास्थि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तंपदे गोः गन्तुर्मण्डलस्य । एवंद्यु लोकावस्थितस्यतवाहं रूपमपश्यम् । अथपुनः पृथिवीस्थितस्य यदातेतवर्मोतामनुष्यः भोगम् वाहनादिकम् अनुआनट अनुव्याप्नोत् आत्इत् इतिपादपूरणार्थौ तदाग्रसिष्टः ग्रसुअदने । ग्रसिष्टतमः अतिशयेनभक्षयितासन् ओषधीः अजागः गृच्छासिगिरसिवा । अन्योहिवाहितश्चलितुमपिनशक्नोति त्वंवीर्यवत्तरोसीतिभावः ॥१८॥ अनुत्वा । अनुइतिपरभावमा-

नुडादिद्ग्रसि॑ष्ठ ऽओषधीरजीगः ॥ १८ ॥ अनु॑त्वा ॥ अनु॑त्वारथो ऽअनुमर्य्यो ऽअर्व्वन्ननुगावोनुभगः॑ कुनीनाम् ॥ अनु॒व्रातासस्तवस॒ वस्यमी॑युरनु॒ देवाम॑मिरेवी॒र्य॑न्ते ॥ १९ ॥ हिर॑ण्यशृङ्गोयः॑ ॥ हिर॑

चष्टे । हेअर्वन् यस्यसुक्रतिनोएहेत्वञ्चेष्टसेतस्यएहेत्वामनुरथः त्वामनुमर्योमनुष्यः त्वामनुभगः सौभाग्यकनीनांकन्यकानाम् । तवैतेपदार्थाभवन्तीत्यर्थः किंच । व्रातासः पुरुषसंघा अपितवस-स्यसख्यिभावमन्वीयुः । किमन्यद्बहुवदामः । अनुदेवाममिरेवीर्यन्ते अनुममिरेअनुमितवन्तः देवावी-र्यंवीरकर्म तेतव । अचिन्त्यशक्तिस्त्वमसीत्यभिप्रायः ॥ १९ ॥ हिरण्यशृङ्गः । हिरण्यशृङ्गस्थानीयम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्येति हिरण्यशृङ्गः । अयोअस्यपादाः यस्यचासावयः अयइतिसर्वेषांरजतादीनामुपलक्षणम पादादित्यवयवानाम् । रजतादिविशिष्टावयवाः । मनोजवाःमनोवेगयुक्ताः । यस्माच्चावरःकनिष्टःइन्द्रः आसीत्अभवत् । वायुरूपेणाश्वस्यावस्थानात् । देवाइत्देवाअपि यस्यास्याश्वस्याहविरद्यंहविर्लक्षणमदनीयमागच्छन् । यश्चअर्वन्तम्प्रथमःअध्यतिष्ठत् सचइन्द्रः यस्याहविरद्यमागतम तंवयंस्तुमहे-

रायशृङ्गोयोऽअस्यपादामनोजवाऽअवरऽइन्द्रऽआसीत्॥ देवाऽइदस्यहविरद्यमायन्योऽअर्वन्तम्प्रथमोऽअध्यतिष्ठत् ॥ २० ॥ ईर्म्मान्तासꣳसिलिकमध्यमासꣳ ॥ ईर्म्मान्तासꣳसिलिकमध्यमासꣳ सꣳशूरणासोदिव्यासोऽअत्याः ॥ हꣳसाऽइवश्रेणिशोयतन्ते यदाक्षिप्तुर्दिवि

तिशेषः ॥ २० ॥ ईमान्तासः आदित्यस्यरथेयेश्वायुक्ता स्तद्वारेणायमश्वस्तूयते । ईर्मईरितः अन्तोयेषान्ते ईर्मान्ताईर्मान्ताएव ईर्मान्तासः तेषांहिसप्तानामश्वानांसमीरितान्ताःविक्षिप्ताः प्रान्ताःविक्षिप्ताविरलाइत्यर्थः । हृष्टान्तावा तेहिपृथूरस्काः पृथुजघनाश्चेत्यर्थः । सिलिकमध्यमासः संलग्नमध्यमाकृशोदराइत्यर्थः । सप्तानामपिसंश्लिष्टा उदरप्रदेशानिरुदरास्तेश्वाइत्यर्थः । तथापिहिस्तुतिरूप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पयतेएव संशूरणासः। संहिताःशूरणेनभगवतादित्येन दिव्यासःदिविजाः। अत्याःसततगमनाः तेहिसकृद्युक्ताब्राह्मंअहस्त्रयुगपर्यन्तमहर्वहन्ति। यद्वत्थंभूताअश्वाः तेहंसाइवश्रेणिशोयतन्ते। यथा-हंसाःश्रेणीभूता एकयारीत्याप्रथमगमनाद्यान् कुर्वंतिएवमश्वाअपीत्युपमार्थः। कदाइत्याह यदाय-स्मिन्काले अक्षिषुःअशूङ्व्याप्तावित्यस्यैतद्रूपम व्याप्नुवन्ति दिव्यंदिविभवम् अज्मम्अजनम आजिम्

व्यमज्मुमप्रुवाः ॥ २१ ॥ तवशरीरम् ॥ तवशरीरम्पतयिष्णवर्व्व न्तवंचित्तंव्वातंऽइवध्रजीमान् ॥ तवशृङ्गाणिव्विष्ठिठंतापुरुत्रारण्ये षुजर्भुराणाचरन्ति ॥२२॥ उपप्र ॥ उपप्रागाच्छसनँव्वाज्यर्व्वांदेव द्रीचामनंसादीङ्खानः ॥ अजः पुरोनीयतेनाभिरस्यानुपश्चात्कवयो

अश्वाः ॥ २१ ॥ तवशरीरम्। हेअर्वन्तवशरीरंपतयिष्णुउत्पतनशीलम्। तवचित्तञ्चवातइवध्रजी-मान्गतिमान् वेगवत्सूक्ष्मानर्थान्प्रति गच्छेदित्यर्थः। तवशृङ्गाणि शृङ्गाणीतिज्वलान्नामसुपठितम्। तवार्चींषि विष्ठिताविविधंस्थितानि पुरुत्रावहुधाविद्युच्चन्द्रार्काग्न्यादिषु। अरण्येषु वनेषु जर्भुरा-णाजर्भुराणानि देदीप्यमानानिदावाग्निरूपेणचरन्ति ॥ २२ ॥ उपप्रागात्। उपप्रअगात्शसनं विश-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सनम्। वाजीवेजनवान् अर्वाञ्चरणोश्वः देवद्रीचादेवान्प्रत्यञ्चितेन मनसादीध्यानः ध्यायन् हिरण्यगर्भपदम्। किञ्च अजःपुरोनीयते। तदुक्तम् कृष्णग्रीवआग्नेयोरराटेपुरस्तादिति। नाभिरस्य अश्वस्य। तदुक्तम्सौमापौष्णः श्यामोनाभ्यामिति। किञ्च अनुलग्नाःपश्चात् कवयःक्रान्तदर्शनाः यन्तिगच्छन्तिरेभाः स्तोतारः ॥ २३ ॥ उपप्रागात्। एवमश्वमभिष्टुत्य अथेदानींयजमानं कृतकृत्यतयासंबोधयन्नाह। उपप्रागात्प्राप्तवान् परममुत्कृष्टम् यत्यस्मात्सधस्थंसह स्थानन्दे-

यन्तिरेभाः ॥ २३ ॥ उपप्र ॥ उपप्रागात्परमँयत्सधस्थमर्वाँ२ँ ॥ अच्छापितरंम्मातरञ्च ॥ अद्यादेवाञ्जुष्टंतमोहिगम्याऽअथाशास्तेदाशुषेव्वार्य्याणि ॥ २४ ॥ [१३] समिद्धोऽअद्य ॥ मनुषोदुरोणे

वमनुष्याणाम्। अर्वान्अर्वाअश्वः नकारउपजनः। अच्छापितरंमातरञ्च अच्छाभेरानुमिति शाकपूणिः। अभ्यगाच्चयस्मात् पितरंमातरञ्च द्यावापृथिव्यौअश्वः। तस्माद्ब्रवीमि हेयजमान-अद्याअद्यकृतकृत्यःसन् देवान्गम्याःगच्छेः जुष्टतमःसन् हिर्निश्चये। अथैवंगतायभवते दाशुषे-दत्तवतेहवींषि यजमानाय। आशास्तेअश्वएववार्याणि वरणीयानि ॥ २४ ॥ समिद्धोअद्य। द्वाद-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शाम्नास्विष्टुभः भार्गवोजमदग्निरपश्यत्। यस्त्वंसमिद्वः अद्यास्मिन्यजनीयेहनि। मनुषः मनुष्यस्ययजमानस्य। दुरोणेयज्ञगृहे देवोदानादियुक्तः। देवान्दानादियुक्तान् यजसि हेजातवेदः जातप्रज्ञान। तंत्वांप्रार्थयामि आचवह देवान्यजच। हेमित्रमहः मित्राणांपूजयितः। यस्त्वं-चिकित्त्वान् चेतनावान्परिदृष्टकारी। अपिचैतदेवचित्रंयत्वमस्माकमस्मिन्कर्मणिवर्तेथाः। किंकारणंयतोब्रवीमि। त्वंदूतःदेवानां कविःक्रान्तदर्शनश्चासिप्रचेताः प्रहृद्वचेताश्च ॥२५॥ तनूनपात्पथः।

देवोदेवान्यंजसिजातवेदः ॥ आचुव्वहंमित्त्रमहश्चिकित्वान्त्वन्दूतः कविरसिप्रचेताः ॥ २५॥ तनूनपात्पथः ॥ तनूनपात्पथऽऋतस्ययानान्मद्ध्वासमञ्जन्त्स्वदयासुजिह्व ॥ मन्मानिधीभिरुतयु

तननपाच्छब्देनाज्यमभिधेयमग्निर्वा। हेतनूनपात् गवामपांवापीत्र। पथःऋतस्ययानान् ऋतस्ययज्ञस्य गमनान्पथःहवींषि। हविर्भिर्हियज्ञोयातिप्रवर्ततेतोयज्ञमार्गाहवींष्युच्यते। मद्वामधुरसेनसमञ्जन्भक्षयन्स्वदयदेवेभ्यःरोचय। हेसुजिह्वकल्याणजिह्व। कल्याज्वाग्नेर्जिह्वायानानादेवत्यानिहवींषि व्यभ्यवहरतेनकिञ्चनोच्छेषयति। किञ्चमन्मानिमननानिधीभिःबुद्धिभिःसहि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तानि उतअपिच यज्ञम् ऋत्वन्समर्द्धयन्। देवत्राचकृणुहि देवान्प्रतिगमय। करोतिर्गमनार्थः अङ्गिरं नःअस्माकम् ॥ २६ ॥ नराशंसस्य। नसअस्मिन्नासीनाःशंसन्तीति नराशंसोयज्ञः। प्रजापतिर्वाग्निर्वा। नरैःप्रशस्योभवतीतिनराशंसः तस्यमहिमानंमहाभाग्यम् एषांदेवगणानांमध्ये उपस्तोषाम उपस्तुमः कथंभूतस्यनराशंसस्य। यजतस्ययष्टव्यस्य यज्ञैराहुतिभिः। तस्यचमहि-

उन्नमुन्धन्देवव्रात्चक्षणुह्यद्ध्वरन्नः ॥ २६ ॥ नराशंसंस्यमहिमानम् ॥ नराशंसंस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैः ॥ येसुक्रतवः शुचयोधियन्धाः स्वदन्तिदेवाऽउभयानिहव्या ॥ २७ ॥ आजुह्वान ईड्यः॥आजुह्वान ईड्योवन्द्यश्चायाह्यग्नेवसुभिः

मानमासाद्य येदेवाःसुक्रतवः सुकर्माणः। शुचयःनिषिक्तपापमानः अणिमाद्यैश्वर्ययुक्ताः धियन्धाःप्रज्ञायाः कर्मणोवाधारयितारः स्वदन्तिभक्षयन्ति उभयानिहव्याहवींषि। सोमञ्चइतराणिचहवींषि तान्त्वाणिप्रयाज्यभागस्विष्टकृत्प्रभृतीनि आवापिकानिप्रधानान्तुभयानीति ॥ २७ ॥ आजुह्वानः। यस्त्वम् आजुह्वानः आह्वयमानः सन् ईड्यःस्तुत्यः वन्द्यःनम्यश्चभवसि तंत्वांया-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ह्यागच्छ हेअग्नेवसुभिः सजोषाः सहप्रीतिः । यश्चत्वांदेवानां होतासि हेयज्ञ महन्सएतान्देवानाह्वय यक्षियज । इषितः प्रेषितः अधीष्टोवा । यजीयान्यष्टृतरःसन् ॥ २८ ॥ प्राचीनंवर्हिः प्राचीम्प्रागग्रं दृज्यतेप्रस्तीर्यते । किंस्वमनीषयानेत्याह । प्रदिशा । प्रदिक्शब्देन श्रुतिवाक्यमभिधीयते । प्रागग्रंवर्हिस्तृणातीति । पृथिव्यावस्तोरस्याः । अस्याः पृथिव्याः । देवेः

सुजोषाः ॥ त्वन्देवानामसियह्व्होतासऽएंतान्यक्षीषितोयजीयान् ॥ २८ ॥ प्राचीनंम्बर्हिः प्प्रदिशांपृथिव्याव्वस्तोरस्याव्वृज्यतेऽअग्रेऽअह्न्नांम्॥ व्व्युंप्रथतेव्वितरंव्वरीयोदेवेभ्योऽअदितयेस्योनम् ॥ २९ ॥ व्व्यचंस्वतीरुर्व्विया व्विश्श्रयन्तांम्पतिंभ्योनजनंयुः

वस्तोः वसनायाच्छादनाय । अग्रेअन्हाम् पूर्वाह्णेदिवसानाम् । सहियागकालः प्रशस्तः । तत् ह्रज्यमानंवर्हिः विउप्रथतिविप्रथतिविविधमाच्छादयति । उकारःपादपूरणः । वितरमतितराम् वरीयः वरतरमुरुतरंवा । किंकारणमपेक्ष्य व्युप्रथतेइत्यतआह । देवेभ्यश्च अदितयेचसद्योनं सुखमकर्तुमितिशेषः ॥ २९ ॥ व्यचस्वतीः । यद्गृहद्वारोभिधेयाः । अत्रचप्रथमोर्ङ्चः परोक्षकृ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तो द्वितीयः प्रत्यक्षकृतः नचतयोरेकवाक्यतासंपद्यतेअतः प्रथमस्यसन्नतिः । व्यचस्वतीः व्यञ्च नवत्यः गमनवत्यः । उर्विंयाउरुत्वेनविश्रयन्ताम् विहृत्ताभवत । कथमिव । पतिभ्योनजनयः शुंभमानाः यथामैथुन्यधर्मेपति भ्योर्याय जनयः जायाआत्मानंशोभयन्त्यः । उरूविश्रयेयुः विहृतौकुर्वंति यथाहिविहृताजायाउपसर्पन्तिपतिन्न तथाइति इतीदमुक्तंपतिभ्योनजनयःएवंविहृताश्चभूत्वा हेदेव्यः द्वारः बृहत्यः महत्यः । विश्वमिन्वाः विश्वमाभिरेताभिःविश्वामिन्वाः । यूयंदेवेभ्यः कृत्वि

शुम्भमानाः ॥ देवीर्द्वारोबृहतीर्विश्वमिन्वादेवेभ्योभवतसुप्रायणाः ॥ ३० ॥ आसुष्वयन्ती ॥ यजुतेऽउपाकेऽउषासानक्तासदतान्नियोनौ ॥ दिव्येयोषणेबृहतीसुरुक्मेऽअधिश्रियंदधुःशुक्रपिशन्द

ग्यजमानेभ्यः भवतसुप्रायणाः सुप्रगमनाः ॥ ३० ॥ आसुष्वयन्ती । स्वयतेर्वानिरुपसर्गात्स्वपतेर्वासूपसर्गात् । सेस्मीयमानेपरस्परं हसन्त्यौसाधुस्वपन्त्यौवा । यजतेयज्ञेसये उपाकेउपाक्रान्ते परस्परमेकदेशसवलीभूते । उषासानक्ता उषाश्चनक्ताराचिश्च । सदतान्नियोनौ । आसीदताम्निरनर्थकउपसर्गः । यद्वा निरितिसदतामित्याख्यातेनयुज्यते । निषीदताम् । योनौयज्ञगृहे कथंभूते ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दिव्येदिविभवे योषणेप्रीतिमत्यौ स्त्रीरूपिण्यौवा । बृहतीबृहत्यौ महत्यौ । मुरुक्मेसुरोचने । अधिश्रियंशुक्रपिशंदधाने । शुक्रपिशंशुक्ररूपंश्रियन् अधिदधानेस्थापयन्त्यौ ॥ ३१ ॥ दैव्याहोतारा । यौदैव्यौहोतारौ अयंचाग्निरसौचमध्यमः प्रथमाद्यौसुवाचा । सुवाचौनहि तौपाठंबिनाशयतः । मिमाना । निर्मिमाणौ यज्ञम्मनुष्योमनुष्यस्य यजत्रैर्यजनाय प्रचोदयन्तौच विदथे-

धाने ॥ ३१ ॥ दैव्याहोतारा ॥ प्रथमासुवाचामिमांनायज्ञम्मनुषोयजध्यै ॥ प्रचोदयन्ताविदथेषुकारूप्राचीनज्योतिः प्रदिशादिशन्ता ॥ ३२ ॥ आनः ॥ आनोयज्ञम्भारतीतूयमेत्विडामनुष्वदिहचेतयन्ती ॥ तिस्रोदेवीर्बर्हिरेदंस्योनंसरस्वतीस्वपसः सदन्

षुयज्ञेषु अन्यानृत्विजः स्वयंचकारूकर्तारौ । प्राचीनंपूर्वस्यान्दिशिभवंआहवनीयाख्यंज्योतिः यष्टव्यमितिप्रदिशंअभिनयेनश्रुतिवाक्येनवा । दिशन्ता । कथयन्तौ । आशास्तावस्मदीयंप्रसाधयेतामितिशेषः ॥ ३२ ॥ आनोयज्ञम् । आङ्उपसर्गः सदन्त्वित्याख्यातेनसम्बध्यते । आएतुआगच्छतुनः अस्माकंयज्ञम् भारतीभरतआदित्यस्तस्यभारती । तूयमित्शिघ्रम् इडाचआगच्छतु । मनुष्वत्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मनुष्यवत् इहचेतयन्तीपरिदृष्टकारिणी । सरस्वतीच । यइत्थंभूतास्तिस्रोदेव्यः ता.वर्हिःआङ्- उपसर्गः सदन्त्वित्याख्याते नसंवध्यते आसदन्तुआसीदन्तु इदंस्रोनंसुखरूपम् स्वपमः अपइतिकर्म- नाम । साधुकर्मणः ॥ ६६ ॥ यइमे । यस्त्वष्टाइमेद्यावापृथिव्योजनित्री जनयि त्रीसर्वभूता नाम् । रूपैः अपिंशत्सुचिचितेअकरोत् । भुवनानिविश्वा । भूतजातानिचसर्वाणिरूपैरपिं-

न्तु ॥ ३३ ॥ यऽइमे ॥ द्यावांपृथिवीजनित्रीरूपैरपिंशद्भुवनानि विश्वा ॥ तमुद्यहोतरिषितोयजीयान्देवन्त्वष्टारमिहयक्षिविद्वान् ॥ ३४ ॥ उपावसृजत्मन्यां ॥ समञ्जन्देवानाम्पाथऽऋतुथाहवीऽषिं ॥ वनस्पतिः शमितादेवोऽअग्निः स्वदन्तुहु

शत् । आहुतान्यकरोत् तम् अद्यास्मिन्नहनि । हेहोतः इषितः प्रेषितइतिवाअधीष्टइतिवा । यजीयान्यष्टतरः । देवंदानादिगुणयुक्तम् त्वष्टारम् इहयक्षेयक्षियज । विद्वान्स्वमधिकारंजा- नानः ॥ ३४ ॥ उपावसृज । द्वितीयोर्ङचेः प्रथमंव्याख्यायते सामर्थ्यात् । यजमानआह । वन- स्पतिः यूपःशमितादेवः अग्निःशामित्रः स्वदन्तु मधीकुर्वन्तु । हव्यंहविः मधुनामधुरसेनघृतेन त्व-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मपिहेअध्वर्योपावसृज उत्पिष्टांयासुकमवदानम् अवसृजनिच्चिय । त्मन्याआत्मना । आदरार्थंवचनम्मवेष्वाङ्गादेरात्मनइत्याकारलोपः ॥ समञ्जन्संरुचयन् देवानाम्पाथः अन्नम् ऋतुथाऋतावृतौचहवींषिअवसृज ॥ ३५ ॥ सद्योजातः । योग्निः सद्योजातः जायमानः सन् व्यमिमीतनिरमिमीतयज्ञम् । यश्चदेवानाम् अभवत् पुरोगाः अग्रतोगामी । तस्यास्यहोतुः प्रदिशिप्राच्यांदिशि ऋतुथाऋतावृतौआचहवनीयात्मनाव्यवस्थितस्य । वाचिआस्येमुखेवाग्ग्रहणेनलक्ष-

व्यव्म्मघुनाघृतेन ॥ ३५ ॥ सुद्योजातः ॥ सुद्योजातोव्यंमिमीतयु ज्ञ्ञमग्निर्देवानांमभवत्पुरोगाः ॥ अस्यहोतुः प्रदिश्यृतस्यंव्वाचि स्वाहांकृतंहविरंदन्तुदेवाः ॥ ३६ ॥ [१२] केतुङ्कृण्वन् ॥

णया मुखमभिधीयते तदुक्तं वार्तिककारेण । "अभिधेयाविनीभाव प्रतीतिर्लक्षणेष्यते । लक्ष्यमाणगुणयोर्योगा दृत्तिरिष्टातुगौणतेति" । स्वाहाकृतम् स्वाहाकृत्युपलक्षितं हविः अदन्तुदेवाः ॥ ३६ ॥ दूतउत्तर मश्वरच्चिणायोद्वारः युद्योपकरणानिच स्तूयन्तेप्रागाग्नेय इतिश्रुतेः ॥ केतुंकृण्वन् । अग्नेर्योगायत्रीअनिरुक्ता केतुंप्रज्ञानं कृण्वन्कुर्वन् । अकेतवेनविद्यते केतुप्रज्ञानंतस्य तच्चैक-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

केतवे पेशःसुवर्णंरूपंवा मर्याःमर्यायेतिविभक्तिव्यत्ययः । मर्यायमनुष्याय अपेशसेनविद्यते पेशःयस्यतस्मै अविद्यमानसुवर्णाय अविद्यमानरूपायवा पेशःकुर्वन् । समुषद्भिरजायथाः हेअग्नेउषद्भिः । उषदाहेअग्निहोत्रादीनिकर्माणि कुर्वद्भिः । जायमानःसन् जन्मनाजातेर्वा । वसतेर्वाऽतसंप्रसारणंचैतद्रूपम् उषद्भिःअग्निंप्रतिनिवसद्भिः जायमानःसन् समजायथाःउत्पद्यसे ॥ ३७ ॥ जीमूतमेघ । वर्मस्तूयते जीमूतोमेघः तमेवभवतिप्रतीकम् अनीकम्

केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥ ३७ ॥ जीमूतस्येवभवति ॥ जीमूतस्येवभवतिप्रतीकंय्यद्वर्म्मीयातिरुमदांमुपस्थे ॥ अनाविद्धयातन्वाजयत्वꣳसत्वाव्वर्म्मणीमहिमापि

सुखमितिपर्यायः । यथामेघमायमुखंविद्युत्स्फुरित स्तनयित्नुधारानिकरैरसह्यंभवन्तः सरणैःएवं हस्त्यश्वपदातिमुखंनिशितास्त्र गम्भीरतूर्यनिनादशरधारा भिरसह्यम्भवति एवंकस्मिन्कालेकसंग्रबेत्यतआह । यद्वर्मी यदावर्मीसन्नद्धोविद्यतेइतिवर्मी । यातिगच्छति समदाम । संमादयन्ति सहवामादयन्ते आमुद्वाऽइतिसमदः समदशब्दःसंग्रामवचनः । समदांसंग्रामाणाम्उपस्थे उत्कण्ठेयतएवमतोब्रवीमि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अनाविद्वयातन्वाजयत्वम् हेवर्मिन् अनाविद्वयाअक्षतया अरिष्टयातन्वात्वंजयेम । विज्ञ सत्त्वावर्म-णोमहिमा पिपर्त्तपालयतु ॥ २८ ॥ धन्वनागाः । धनुःस्तुयतेविष्टुभा धन्वनाधनुषागाःजयेम । धनुषाचआजिंमार्गंजयेम । धनुषाचतीव्राःपटवः उद्गूर्णायुधासःमदः संग्रामाञ्जयेम । धनुश्चशक्नोः अपक्रामंङ्कृणोति अपनयतिकाम । कर्तृत्वविवक्षात्रधनुषः । धनुषाचसर्वाः प्रदिशःजयेम ॥ २९॥

पर्त्त ॥ २८ ॥ धन्व्वंनागाः ॥ धन्व्वंनागाधन्व्वंनाजिञ्जयेमध न्व्वंनातीव्राः सुमदोंजयेम ॥ धनुः शत्चोरपक्रामङ्कृणोतिध न्व्वंनासर्व्वाः प्रदिशोंजयेम ॥ २९ ॥ व्वक्ष्यन्तीवेदागंनीगन्तिक र्णंम्प्रियः सखायम्परिषस्वजाना ॥ योषेवशिङ्क्तेव्वितुताधिध

वक्ष्यन्तोवेत् । ज्याअभिधेया । विष्टुप् । याज्यावक्ष्यन्तीइव वचनोत्मुकेव । योषित् इच्छ-व्दः पादपूरणार्थः । आगनीगन्ति आगच्छन्ति अत्यर्थनागच्छतिवा कर्णंधानुष्कर्णं मूलम् याचप्रियमि-वसखायमिषुम् परिषस्वजानाआलिङ्गयन्ती । योषेवशिंक्ते । शिंजिअव्यक्तेशब्दे । यथामुग्धायो-षित्कामुकरञ्जनार्थमव्यक्तं कूजितङ्करोति एवमियमव्यक्तंशब्दंकरोति । प्रसारिताच अधिउप-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रिषवनुषिनिवद्धा । सेयञ्ज्यासमनेसंग्रामे पारयन्तो विजयंकुर्वंतो संग्रामान् तारयन्तो स्तूयतेसा-
मिरितिशेषः ॥ ४० ॥ तेआचरन्तो । धनुषः कोटीस्तूयेते । त्रिष्टुप् । येदूमे आत्नी आत्नौ
धनुषः कोटी । समनाइवसमनेदूतिवचनव्यत्ययः । समानभर्तृगतमनस्के योषेइव यथासमान-
भर्तृगतमनस्केयोषेपतिमागच्छत्यौ तेआचरन्तो आगच्छत्यौधानुष्कम् । मातेवपुत्रंबिभृतामुपस्थे ।
यथामाता उपस्थउत्सङ्गे पुत्रंधारयति एवबिभृतांधारयतांशरम् । अपशत्रून् विध्यताम व्यध-

न्वज्याऽइयर्त्समनेपारयन्ती ॥ ४० ॥ तेऽआचरन्ती ॥ तेऽआ
चरन्तीसमनेवयोषांमातेवपुत्रम्बिभृतामुपस्थे ॥ अपशत्रून्वि
द्धाताꣳसंविदानेऽआत्नीऽइमेविष्फुरन्तीऽअमित्रान् ॥ ४१ ॥
वह्व्रीनाम्पिता ॥ वहुरस्यपुत्रश्चिच्चाकशीतिसमनावगत्यं ॥ इषु

ताडने । अपविध्यताचशत्रून् संविदाने । सुखमनुभवन्त्यौ । विष्फुरन्तीअनिष्टान् । अमि-
त्रान्शत्रून्विष्फुरन्त्यौ ॥ ४१ ॥ वह्वीना मपिताम् इषुधिरभिधेयः । त्रिषुप् । यः वह्वीनामि-
षूणां पितापालयिता । तेनसहिताः पाल्यन्तेसहिताः सन्निदधाति । यस्यचास्यबहुः इषुकला-
पः पुत्रः पुत्रस्थानीयः । सहितेनइषुकलापेनवाधते । बहुवातदर्थं हितंकुर्वन्ति । चिच्चाकशीति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शब्दानुकरणमेतत् इषोर्निष्क्राम्यमाणः चिश्चेत्येवंशब्दंकरोति । समनोवगत्य । समनासंग्रामान् अवगत्यज्ञात्वा । सदूषुधिः संकाः संकासंधत्ते अस्मिन्योधा इतिसंकाः संकीर्यंतेअस्मिन्नरय-इतिसंकाः शत्रुसंकटंवा । पतनाश्चसर्वाः पृतनाः स्पर्द्धनीयतमाः संग्रामभूमीः सर्वाः । पृष्ठेनिनद्धः धानुष्कस्यपृष्ठेबद्धः प्रमतः धानुष्केणाध्यनुज्ञातः सन् जयति अवदूषुधेः कर्तृत्वम् । विवक्षातः कारकाणिभवन्तीतिवैयाकरणाः ॥ ४२ ॥ रथेतिष्ठन् । जगत्याअर्द्धनसारथिः रूपतेर्द्धनरश्मयः ।

धिꣳ सङ्गाꣳ पृतंनाश्चसर्व्वाꣳ पृष्ठेनिनद्धोजयतिप्रसूतꣳ ॥ ४२ ॥
रथेतिष्ठन्॥ रथेतिष्ठन्नयतिवाजिनꣳ पुरोयचंयचकामयंतेसु
षारथिꣳ ॥ अभीषूंनाम्महिमानंम्पनायतमनꣳप्रश्चादनुयच्छन्तिर
श्मयꣳ ॥ ४३ ॥ तीव्रान्घोषान् ॥ तीव्रान्घोषान्कृणवतेवृ

सुसारथिः रथेतिष्ठन्नयतिवाजिनः । प्रापयत्यश्वान् पुरः पुरतोवस्थितान् । यंयंकामयते । तंवयंसुमइतिशेषः । अभीषूनाम्हाप्रग्रहाणां मानंमहिमानंपनायतपूजयत हेजनाः । येमनः अश्वसंवन्धिचित्तम् पश्चात्सन्तः अनुयच्छन्त्यनुगच्छन्ति रश्मयः यन्तारः ॥ ४३ ॥ तीव्रान्घोषान् । अश्वास्तुयन्तेविष्टुभा । तीव्रान् जयजयेत्युग्रान्घोषान्शब्दान्कृण्वतेकुर्वन्ति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वृषपाणयः । वृषा अश्वाः पाणौयेषांसंगृहीतप्रभृतीनां योक्तृणांतेतथोक्ताः । युक्ताः प्लवन्तः अश्वाः रथेभिः रथैः । सहवाजयन्तः पूजयन्तः राधनः ॥ तीव्रानेवघोषान् क्रोषितादीन्कृण्वन्ते । अवक्रामन्तः प्रपदैः खुरैः अमित्रान्शत्रून क्षिणन्तिक्षिण्वन्तिहिंसन्ति । अनपव्ययन्तः । व्ययच्छये । अपपूर्वादस्माच्छत्रृप्रत्ययः । अपव्ययन्तः नश्यन्तःनअपव्ययान्तोनपव्ययन्तः ननश्यन्तः । अपरित्यजन्तोवास्वामिनम् ॥ ४४ ॥ रथवाहणम् । रथस्तुतिः त्रिष्टुप् । यस्यास्यनसः रथवाहणंरथ-

षंपाणयोश्श्वारथेभिः सहव्वाजयन्तः ॥ अवक्रामन्तुः प्रपदै रमित्रान्क्षिणन्तिशत्रूँ ॥ १ रनपव्ययन्तः ॥ ४४ ॥ रथवाहं णंह्वविः ॥ रथवाहंणंह्वविरंस्यनामयत्रायुधन्निहितमस्यव्वर्म्म॥त त्तारथमुपशुग्मः सदेमव्विश्वाहांव्वयः सुमनस्यमानाः ॥ ४५ ॥

वोढृस्तुतिनाम । ह्वविरितिनाम्नोर्ङ्लोपः । ह्वविर्ह्वानमितिचाह्वतौयंनाम । विमुच्यसयंत्रंरथवाहणं करोतिअनस्तत्कर्मेतिकात्या यनः । तस्मादनसएवपौरोडाशेषु यजूंष्यिस्मृतिः । यत्रयस्मिन् आयुधंनिहितंस्थापितम् : अस्ययोद्धुः वर्मचसंनहनम् । तत्रानसिरथम् शग्मंसुखम् उपसदेम उपसादयाम विश्वाहासर्वदावयम् सुमनस्यमानाः अनुकूलचित्ताः ॥ ४५ ॥ स्वादुसंसदः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रथगोपान् स्तौतिविष्टुप् । स्वादुसुखकरं संसदःसंसदनंयेषान्ते स्वादुसंसदः रथगोप्तारःपितरः पातारः ॥ वयोधाः अन्नस्यायुषोवाधारयितारः । क्रक्षेश्रितः क्लेशाश्रयिणः शक्तीवन्तः बलवन्तआयुधवन्तोवा । गभीराः गंभीरप्रज्ञानावागंभीरबलावा । चित्रसेनाः विचित्रसेनाः इषुबलाः इषुषुविशेषतोबलंयेषान्तेतथोक्ताः । अमृदृध्राः अमृदवः उग्रशासनःसतोवीराः । मतः विद्य

स्वादुषꣳसदः पितरः ॥ स्वादुषꣳसदः पितरोव्वयोधाः क्रक्षेश्रितꣳशक्तीवन्तोगभीराः ॥ चित्रसेनाऽइषुबलाऽअमृदृध्राꣳसतोवीराऽउरवो व्रातसाहाः ॥ ४६ ॥ ब्राह्मणासꣳपितरꣳ ॥ सोम्यासꣳशिवेनोद्यावा

मानस्यबलस्यविविधभीरयितारोवा । इषुजवनोरक्षावा । उरुमनसोवा व्रातसाहाः । व्राताः गणास्तेषामभिभवितारः । यद्यंभूताः पुरुषास्तेस्माकंरथगोप्तारोभवन्त्वितिशेषः ॥ ४६ ॥ ब्राह्मणासः । जगतीछन्दोक्तदेवता । ऋतावृधइत्यादिः प्रत्यक्षभूतोमंत्रः ब्राह्मणास इत्यादिः परोक्षकृत । अतएवंव्याख्यायते । ऋतावृधः सत्यवृधोवा यज्ञवृधोवा । देवाइत्यध्याहारः सामर्थ्यात्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रक्ष । रक्षतदूतिवचनव्यत्ययः । माकिः । माचक्रच्चनन:अस्माकम् । अघशंसः अघानिपापानिय: शंसतिप्रकाशयतिसोघशंस ईशतईष्टेदूतिवचनव्यत्ययः । भवत्प्रसादाच्च । ब्राह्मणासः ब्राह्मणाः पित रःसोम्यासःसोमसम्पादिनः । पान्त्वित्यत्रान्वयः शिवेकल्याणकारिण्यौ द्यावापृथिवीच अनेहसा- अनुपहिंसिन्यौ अनपराधिन्यौवापाताम् । पूषाचन:अस्मान् पातु दुरितात्अशुभात् ॥ ४७ ॥

पृथिवीऽअनेहसा ॥ पूषानः÷पातुदुरिताद्दृतावृधोरक्षामाकिर्न्नोऽअघ शंꣳसऽईशत ॥४७॥ सपर्णंव्वस्ते ॥ मृगोऽअस्यादन्तोगोभिꣳसन्नद्धा पतत्तिप्रसूता॥ *यत्रानरꣳसञ्चविचृद्वन्तित्तत्रास्मभ्यमिषंवꣳशर्म्मी

सुपर्णंवस्ते । द्वाभ्यांविष्टुवनुष्टुभ्यामिषंस्तौति । यासुपर्णंवस्तेसुपर्णः पक्षीतद्विकारःसौपर्णमिति- भवति । तत्कृत्स्नवन्निगमः राजानमिप्रेत्य । मृगोअस्यादन्तः यस्यास्यासन्या दृषोःमृगोदन्तः फलम् मृगयतेर्मृगः । सहिवेध्यंमृगयते याच गोभिःसन्नद्धा । गोविकारैःश्लेष्मस्नायुभिःसंनद्धा । पततिशत्रु- बलंप्रति । प्रसूताप्रेरिताधनुष्मता साइषुःयत्रनरःसञ्चविचृद्वन्ति । सङ्गच्छन्तिच । विगृह्णन्तिचतत्रास्य

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्मभ्यन्दूषवः दूषुरितिसन्ततिः । शर्मशरणम् यंमन् यच्छत्विति रुन्नतिः ॥ ४८ ॥ ऋजीतेपरि । हेऋजीते ऋजुगामिनि । परिष्टङ्घिनःपरिवर्जयास्मान् । अस्मभ्यंवतुनस्तनूः अस्मभ्यंचभवतुनःअस्माकंतनूःशरीरम् । सोमश्चअधिब्रवीतु आधिक्येनवदतु नोस्माञ्जीवनाय । अदितिश्चशर्मशरणम् यच्छतुददातु ॥ ४९ ॥ आजङ्घन्ति । कक्षास्तुतिः । अनुष्टुप् येषामश्वानाम् अजङ्घन्ति-

यꣳसन् ॥ ४८ ॥ ऋजीतेपरि ॥ वृङ्घिनोऽस्मभ्यंवतुनस्तनूः ॥ सो मोऽअधिब्रवीतुनोदितिꣳशर्मयच्छतु ॥ ४९ ॥ आजङ्घन्ति ॥ आजङ्घन्तिसान्देवाञ्जघनाꣳ ॥ ऽउपजिघ्नते ॥ अश्वाजनिप्रचेतसोऽश्वान्त्समत्सुचोदय ॥ ५० ॥ अहिरिवभोगैः पर्य्येतिबाहुञ्जायाहेतिम्परि

अश्वारोहाःस्वानुसानूनिमांसोपचितान्यङ्गानि । येषामेषाञ्च जघनान्जघनानि उपजिघ्नति उपनिघ्नन्ति । अश्वाजनि अश्वाञ्जनयतीत्यश्वाजनी तस्याःसंबोधनंहेअश्वाजनि । प्रचेतसः परिदृष्टकारिणः प्रकृष्टज्ञानान्वा । अश्वान् समत्सुसंग्रामेषु चोदयप्रेरय ॥ ५० ॥ अहिरिव । हस्तघ्नः स्तूयते त्रिष्टुप् । हस्तेएवास्यितोहन्तियः सहस्तघ्नः खेटकः प्रकोष्टादि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चाणंवा । यः हस्तघ्नः अहिरिवसर्पद्रवभोगैः । शरीराक्षयवैः । पर्येतिपरिवेष्टयतिवाहुम् । ज्यायाहेतिंपरिवाधमानः । ज्यामायुधात्परिचायमाणः । महस्तघ्नः विश्वाविश्वानिसर्वाणि वयुनानि विद्वान्प्रजानन् परिहृष्टकारीवा । पुमान्शुरोक्लीवोवा । पुमांसमक्लीवं परिपातुविश्वतः सर्वतः ॥ ५१ ॥ वनस्पतेवीड्वङ्गः । रथदुन्दुभिरेवत्याहचौविष्टुभौ । ऐन्द्रावान्त्योर्ष्चः । हेव-

बाधंमानः ॥ हुस्तुग्घोविश्वांव्वयुनांनिविद्वान्पुमान्पुमांꣳसुम्परिं पातुविश्वतंः ॥५१॥ व्वनंस्प्पतेव्वीड्वङ्गोः ॥ व्वनंस्प्पतेव्वीड्वङ्गोहिभू याऽअस्म्मत्संखाप्प्रतरंणःसुवीरंः ॥ गोभिꣳसन्नद्धोऽअसिव्वीडयंस्वा स्थ्यातातेंजयतुजेत्वांनि ॥ ५२ ॥ द्दिवःपृंथिव्याः ॥ द्दिवःपृंथिव्याः

नस्पतेत्रानस्पत्यरथ । क्रत्स्नवन्निगमः । वीड्वंगोहिभूयाः । वीडुशब्दोदृढवचनः । दृढाङ्गोभव । अस्मत्सखासन् । प्रतरणः प्रतरन्त्यनेनसंग्रामानितिप्रतरणः सुवीरः साधुवीरः । यतश्चत्वम् गोभिः । श्लेष्मचर्मभिः सन्नद्धोसि अतस्त्वांब्रवीमि । वीडयस्वसंस्तंभयस्वात्मानम् आस्थाताते । संस्थाताच तेतवजयतु जेत्वानिजेतव्यानि ॥ ५२ ॥ दिवः पृथिव्याः दिवः द्युलोकात् यत्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ओजः परिसर्वतः उद्भृतम् । उद्धृतम । यच्चपृथिव्याः पृथिवीलोकात्परिउद्धृतम् । यच्चवनस्पतिभ्यः । वनस्पतिशकासात् परिसर्वतः आभृतम आहृतम् सहः बलम् यच्चअपांसंबन्धि ओजमानम् ओजः परिमाणम । तदेतच्चतुष्टयं रथभावमुपनीतम् । परिगोभिराबृतम् । परिसन्नात् गोभिः गोविकारैः स्नायुश्लेष्मचर्मभिः आवृतमुपनिबद्धम् इन्द्रस्यवज्रम । इन्द्रोहयबबृ-

पर्य्योजऽउद्भृतंव्वनस्पतिंभ्यःपर्य्याभृतꣳसहः ॥ अपामोज्मानम्प

रिगोभिराबृतमिन्द्रस्यव्वज्रꣳहविषारथंय्यज ॥५३॥ इन्द्रस्यव्वज्रः ॥

इन्द्रस्यव्वज्रोमरुतामनीकंमित्रस्यगर्भोव्वरुणस्यनाभिः ॥ सेमान्नो

बाय वज्रंप्रजहारेत्युपक्रम्य रथस्तृतीयंचेत्यभिधाय । रथेनचशरेणच राजन्यवन्धबद्धतिश्रुतिः । तदभिप्रायमेतत् हविषातमोदृशं रथंयज हेअध्वर्यो ॥ ५३ ॥ इन्द्रस्यवज्रः । यस्त्वम् इन्द्रस्यवज्रः असिमरुतांच अनीकंमुखमसि ॥ मित्रस्यचगर्भोसि । वरुणस्यचनाभिरसि । सः त्वमद्यमाम् नः अस्माकम् हव्यदातिंहविषोदानम् जुषाणः सेवमानः । हेदेवरथ प्रतिहव्यायभाय प्रतिहभाय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रतिगृहाण हव्याहवींषि ॥ ५४ ॥ उपश्वासय । उपशव्दयपृथिवीम् उतद्याम् अपिचउपशब्द-यद्याम् । पुरुत्रातेवहुधाच तेतव एकस्यसतः घोषंमनुतांमन्यन्ताम् । विष्ठितम्विविधंस्थितंखा-बरम् जगत्जङ्गमञ्च । यस्त्वंसेवास्माभिः प्रार्थितः सत्वम् हेदुन्दुभे । सजूः समानप्रीतिः सन् इन्द्रेणसह देवैश्च । दूराद्दूरतरम् अपसेधअपगमयशत्रून् ॥ ५५ ॥ आक्रन्दय । हेदुन्दुभेआ-

हुव्यदांतिञ्जुषाणोदेवंरथुप्प्रतिंहुव्याग्रंभाय ॥ ५४ ॥ उपंश्वासय ॥ पृथिवीमुतद्याम्पुंरुत्त्रातेंमनुतांव्विष्ठिंतुञ्जगंत् ॥ सदुंन्दुभेसुजूरिन्द्रेंणदेवैंर्दूराद्दवींयोऽअपंसेधशत्त्रूंन् ॥ ५५ ॥ आक्रं॑न्दय ॥ आक्रं॑

क्रन्दयदीनान् शब्दान्कारय अहोपलायद्वंपितामेहतोभ्रातामेहतइति । वलंशत्रुसेनाम् ओजो-नआधाः ओजस्तेजः नः अस्माकम् आधाः आधेहि । किञ्चनिष्टजिहि । निश्चितंशब्दंजयाय कुरू । दुरितावाधमानः दुरितानिअपगमयन् । किंच । अपप्रोथ प्रोथतिर्नाशनार्थः । अप-कृत्यापकृत्य प्रोथनाशय । दुच्छुनाः दुष्टशुनः दुवयाः सेनःसुखवचनोवाशुनाशब्दः दुःसुखाः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विसर्जनीयस्यदत्वम् । इतः सेनायाः । यतश्चत्वम् इन्द्रस्यमुष्टिरसिअतोव्रवीमि । वीडयस्वइ-
ढीकुरुआत्मान ॥ ५६ ॥ आमूः । ऐन्द्री आअज । अजगतिक्षेपणयोः । आक्षिप । अमूः शत्रुसेनाः ।
प्रत्यावर्तयइमा । प्रत्यावर्तयजितंजितमिति । इमाः अस्मदीयसेनाः किञ्च ॥ केतुमत्प्रज्ञात-

न्द्यबलमोजोनऽआधानिष्ट्वनिहिदुरितावाधमानꣳ ॥ अपप्प्रोथदु
न्दुभेदुच्छुनाऽइतऽइन्द्रस्यमुष्टिरसिवीडयस्व ॥ ५६ ॥ आमूः ॥
आमूरजप्प्रत्यावर्त्तयेमाः केतुमद्दुन्दुभिर्वावदीति ॥ समश्वपर्णा
श्चरन्तिनोनरोस्माकमिन्द्ररथिनोजयन्तु ॥ ५७ ॥ आग्नेयः कृष्ण
ग्रीवः ॥ सारस्वतीमेषोबुब्भ्रुः सौम्यः पौष्णः श्यामः शितिपु

वान् दुन्दुभिः वावदीति । लोडर्थेलट् अत्यर्थंवदतु । जयप्रकाशकम् ॥ किञ्चसमश्वपर्णाश्च-
रन्तिनोनरः । अत्रापिलोडर्थेलट । संचरन्तुअश्वपर्णाः अश्वपतनाः नोनरः अस्मदीयामनुष्या-
संग्रामेन । हेइन्द्रअस्माकंरथिनः जयन्तुत्वत्प्रसादादितिशेषः ॥ ५७ ॥ आग्नेयः कृष्णग्रीव-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इतिश्रुतिः । आत्मध्यायपरिसमाप्तेः । द्वयोरेकादशिन्योः पशुदेवतासबन्धविधानी परतोद्वादश-

ष्ठोबार्हस्प्रत्यꣳ शिल्पोव्वैश्वदेवऽऐन्द्रोरुणोमारुतꣳ कुल्म्माषऽ ऐन्द्राग्नꣳ सꣳहितोधोरामꣳ सावित्रोबारुणꣳ कृष्णऽएकाशिति प्रात्पेत्त्वꣳ ॥ ५८ ॥ अग्नयेनीकवते ॥ अग्नयेनीकवतेरोहिता झिरनड्वानुधोरामौ सावित्त्रौपौष्णौरजुतनाभीव्वैश्वदेवौपिशङ्गौ तूपरौमारुतꣳ कुल्म्माषऽआग्नेयꣳ कृष्णोजꣳ सारस्वतीमेषीव्वा रुणꣳ पेत्त्वꣳ ॥ ५९ ॥ अग्नयेगायत्रायं ॥ त्रिवृतेराथन्तरायाष्टा कपाल ऽइन्द्रायत्वैष्टुभायपञ्चदशायबार्हतायैकादशकपालोव्विश्वभ्यवै

हविषोवेष्टेर्देवताः ॥ ५८ ॥ स्पष्टार्थः ॥ ५९ ॥ अग्नयेऽष्टाकपालः पुरोडाशः कार्यः कीदृशाया- ग्नये गायत्राय त्रिवृते सुताय राथन्तराय साम्ना सुताय इन्द्राय वैष्टुभाय त्रिष्टुभा सुतायपञ्च-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वनीयेजुहोति । देवसवितः । तत्सवितुर्वरेण्यम् । विश्वानिदेवसवितरिति । तत्रहे व्याख्याते ॥ १ ॥ २ । विश्वानिदेवसवितरिति द्वेगायत्र्यौ विश्वानिसर्वाणि हेदेवसवितः दुरितानिअसत्यानि । परासुवपरांचिगमय । यद्भद्रंभन्दनीयं तत् नःअस्माकम् आसुवआगमय ॥ ३ ॥ विभक्तारम् ।

व्यो॑गन्भुर्व्वः॑ के॑तुपू॑ः के॑तन्न॑ः पुनातुव्वा॒चस्प॑तिर्व्वा॒चंन्न॑ः स्वदतु ॥ १॥ तत्स॑वितु॑ः ॥ तत्स॑वितुर्व्वरे॑ण्यम्भर्गो॑देवस्य॑धीमहि ॥ धियो॒ यो॑नः॑ प्रचो॒दया॑त् ॥ २ ॥ विश्व॒ान्यदे॑व ॥ सवितर्दुरि॒तानि॒प रा॑सुव ॥ यद्भ॒द्रन्तन्नऽआ॑सुव ॥ ३ ॥ विभ॒क्तार॑ꣳहवामहे ॥ विभ॒क्तार॑ꣳहवामहेव॒सोश्चि॒त्रस्य॒राध॑सः॥ सवि॒तार॑न्नृचक्ष॑सम् ॥ ४ ॥

कर्मानुरूपेण विभक्तारम् । हवामहेआह्वयामः । वसोःवासयितुःचित्रस्य चायनीयस्य राधसःधनस्य आयुषश्च । सवितारम् नृचक्षसम् नृणांद्रष्टारम् । येनरोयथा द्रष्ट्यास्तांस्तथापश्यति । ४ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अत्रोव्वटभाष्या भावादक्षरारेणभाष्यान्तरादर्थं विलिखामि अतः परं पुरुषमेधकाः पशवः आश्वध्यायसमाप्तेः ततः प्रतियूपमेकैकमेकादशिनं नियुज्य ब्राह्मणादीनष्टाचत्वारिंशत्सङ्ख्याकान् पुरुषान् प्रकामोद्याय समित्यन्तानग्निष्टे यूपेनियुनक्ति इतरेषु यूपेष्वेकादशैकादश पुरुषान् वर्णायानुरुधमित्यादीन्नियुनक्ति । ब्रह्मणे ब्राह्मणम् तत्र ब्रह्मणे जुष्टं नियुनज्मीति अग्निष्टे ब्राह्मणं प्रथमं नियुनक्ति । एवमग्रे सर्वेषां यूपे एव बन्धनम् चतुर्थ्यन्तं देवतापदं द्वितीयान्तं पुरुषपदं बोद्धव्यम् । क्षत्राय राजन्यं क्षत्रियम् २. मरुद्भ्यो वैश्यम् ३. तपसे शूद्रम् ४. तमसे तस्करं स्तेनम् ५.

ब्रह्मणेब्राह्मणम् ॥ ब्रह्मणेब्राह्मणङ्क्षत्रायराजन्यम्मरुद्भ्यो वैश्यन्तपसेशुद्रन्तमसेतस्करन्नार कायवीरहणम्पाप्मनेक्लीबमाक्रयायायोगूङ्कामायपुँश्चलूमतिक्रुष्टायमागधम् ॥ ५ ॥ नृत्तायसूतम् ॥ नृत्तायसूतङ्गीतायशैलूषन्धर्म्मायसभाचरन्नरिष्ठायैभीमु

नारकाय वीरहणं नष्टाग्निं शूरं वा ६. पाप्मने क्लीबं नपुंसकम् ७. आक्रयायै अयो गूमयसो गन्तारम् ८. कामाय पुंश्चलूं व्यभिचारिणीम् ९. अतिक्रुष्टाय मागधं मगधदेशजं क्षत्रियायां वैश्यपुंसो जातं वा १० ॥ ५ ॥

नृत्ताय सूतं ब्राह्मण्यां क्षत्रियाज्जातः सूतः ११. गीताय शैलूषं नटम् १२. धर्माय सभाचरं सभायां चरतीति तम् १३. नरिष्ठायैभीमलं भयङ्करम् १४. नर्माय रैभं शब्दकर्तारं वाचाटम् १५. हसाय कारिं करणविशिष्टम् १६ आनन्दाय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दशाय पञ्चदशस्तोमस्तुताय बार्हताय बृहत्सामस्तुताय विश्वेभ्यो देवेभ्यः द्वादशकपालः पुरोडाशः कीदृशेभ्यः जागतेभ्यः जगत्या छन्दसा स्तुतेभ्यः सप्तदशेभ्यः सप्तदशस्तोमस्तुतेभ्यः वैरूपेभ्यः वैरूपसामस्तुतेभ्यः मित्रावरुणाभ्यां पयस्या पयसि श्रितः चरुः कीदृशाभ्यामानुष्टुभाभ्याम् अनुष्टुभा स्तुताभ्याम् एकविंशाभ्यामेकविं शस्तोमस्तुताभ्याम् वैराजाभ्यां वैराज-

ब्भ्योट्टेवेब्भ्योजागंतेब्भ्यः सप्तदशेब्भ्योंव्वैरुपेब्भ्योद्वादंशकपालो मित्रावरुंणाब्भ्यामानुंष्टटभाब्भ्यामेकविं शाब्भ्यांव्वैराजाब्भ्यांम्य युस्याबृहस्पतंयेपाङ्क्तायक्तिणवायंशाक्कुरायंचुरुः संवित्त्वऽऔष्णिणं हायत्तयस्त्रिं शायंरैवतायद्वादंशकपालः प्राजापत्यश्चुरुरदिंत्यैव्वि

सामस्तुताभ्याम् बृहस्पतये चरुः कीदृशाय पाङ्क्ताय पङ्क्तिच्छन्दसा स्तुताय क्षिणवाय क्षिणवस्तोमस्तुतायशाक्कराय शाक्कर सामस्तुताय सवित्रे द्वादशकपालः पुरोडाशः कीदृशाय सवित्रे औष्णिहायऽउष्णिक् छन्दसास्तुताय त्रयस्त्रिंशा यत्रयस्त्रिंशस्तोमस्तुताय रैवताय रैवतसामस्तुताय एवं छन्दः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तोमसामसहितान् षट् देवा नभिधाय चतुरः केवलानाह प्रजापत्यश्वरुः प्रजापतिर्दे-वत्यश्वरुः कार्यः विष्णुपत्न्यै अदित्यै चरुरेव वैश्वानराय वैश्वानर गुणविशिष्टायाग्नये द्वादशकपालः पुरोडाशः अनुमत्यै देवतायै अष्टाकपालः पुरोडाशः कार्यः ॥ ६० ॥

इति उव्वटकृतौ मंत्रभाष्ये एकोनत्रिंशोऽध्यायः ॥ २९ ॥

षण्णांपत्न्यै चरुरग्नयेवैश्वानरायद्वा दशकपालोनुमत्याऽअष्टा कपालः ॥ ६० ॥ [२४] ॥ ४ ॥

इतिसंहितापाठेएकोनत्रिंशोऽध्यायः ॥ २९ ॥

* देवंसवितः ॥ देवंसवितः प्रसुवयुज्ञम्प्रसुवयुज्ञपंतिम्भगाय ॥ दि

(१) इतउत्तरम् पुरुषमेधः द्वाविंश्यायोनारायणः पुरुषोपश्यत् । देवसवितः । तिस्रःसावित्रीराह-

(१) चैत्रशुक्लदशम्यामारम्भः । ब्राह्मणराजन्ययोरतिष्ठाकामयोः पुरुषमेधसङ्ग्रकोयज्ञोभवति । सर्वभूतान्यतिक्रम्य स्थान-मतिष्ठा । अत्र चयोविंशतिर्दीक्षा भवन्ति द्वादशोपसदः पञ्च शूल्याइति चत्वारिंशद्दिनैः सिध्यति । अत्र यूपैकादशिनो भवति एकादशाग्नीषोमीयाः पशवो भवन्ति तेषां चप्रतियूपं मध्यमे वा यूपे यथेच्छा नियोजनम् । आज्येन सकृदुत्पूतेन देव सवितरिति

शि० ६।८

* देवसवितः षट्तपसेकौलाल ठं० षोडशद्वीद्वावि ठं० श्रुतिः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्त्रीषखं स्त्रियाः सखायम् १७. प्रमदे कुमारीपुत्रं कानोनम् १८. मेधायै रथकारं माहित्येण करिष्यां जातम् १९. धैर्याय तक्षाणं सूत्रधारम् २०. ॥ ६ ॥ तपसे कौलालं कुलालापत्यम् २१. मायायै कर्मारं लोहकारम् २२. रूपाय मणिकारं रत्नकर्तारम् २३. शुभे शुभाय वपं वोजवप्तारम् २४. शरव्यायै इषुकारं वाणकर्तारम २५. हेत्यै धनुःकारं चाप

लन्नुर्म्मायंरुभ६हसायुकारिंमानुन्दायंस्त्रीषुखम्प्रमदें कुमारीपुचम्मे धायैंरथकारन्धैर्य्यायुतक्षांणम् ॥ ६ ॥ [६] तपंसेकौलालम् ॥ तपं सेकौलालम्मायायैंकुम्मारं६ रूपायंमणिकार६ शुभेव्वप६ शंरव्व्या याऽइषुकार६ हेत्यैधंनुष्कारङ्कर्म्मणेज्ज्याकारन्दिष्टायंरज्जुसुर्ज्ज म्मृत्यवेंमृगयुमन्तंकायश्वनिनंम् ॥ ७ ॥ नदीभ्यंः पौञ्जिु षठठम् ॥ नदीभ्यंः पौञ्जिुष्टमृक्षीकाभ्योनैषादम्पुरुषव्व्याग्घा

कारिणम् २६ कर्मणे ज्याकारं प्रत्यञ्चनकर्तारम २७. दिष्टाय रज्जुसर्जं रज्जोः स्रष्टारं निर्मातारम २८. मृत्यवे मृगयुं मृगग्राहम्२९. अन्तकाय श्वनिनं शुनो नेतारम ३०. ॥ ७ ॥ नद्योः पौञ्जिष्ठं पुञ्जिष्ठान् त्यजः पुलकसस्तदपत्यम् ३१. ऋक्षीकाभ्यो नैषादं निषादपुत्रम् ३२. पुरुषव्याघ्राय दुर्मदःडन्मत्तम् ३३. गन्धर्वाप्सरोभ्यो व्रातं सावित्रीपतितम् ३४. प्रयुग्भ्यः उन्मत्तम् ३५. सर्प-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देवजनेभ्यः अप्रतिपदं प्रतिपद्यते जानातीति प्रतिपत् अतथाविधं विकलमित्यर्थः ३६. अयेभ्यः कितवं द्यूतकारम ३७. ईर्यतायै अकितवमद्यूतकृतम ३८. पिशाचेभ्यः बिदलकारीं वंशविदारिणीं वंशपात्रकारिणीम् ३९. यातुधानेभ्यः कण्टकीकारीं कण्टकी कर्म तत्कारिणीम् ४० ॥ ८ ॥ सन्धये जारसुपपतिम् ४१. गेहाय उपपतिं वाभि चारिणम् ४२. आर्त्यै परिवित्तम् ऊढे कनिष्ठेऽनू-

यंदुर्म्मदंङ्गन्धर्व्वाप्सरोभ्योव्रात्यंम्प्रयुग्भ्युऽउन्मत्तꣳ सर्प्पदेवजुने
व्भ्योप्प्रतिपदुमयेंब्भ्यꣳ कितुवमीर्य्यतायाऽअकितवम्पिशाचेब्भ्योंवि
दलकारींय्यातुधानेंब्भ्यꣳ कण्टकीकारीम् ॥ ८ ॥ सुन्धयेंजारम् ॥
सुन्धयेंजारङ्गेहायोंपपतिमार्त्त्यैं परिंवित्तुन्निर्ऋंत्यैपरिविविदानमरा
ध्याऽएदिधिषुꣳपतिन्निष्क्रंत्यैपेशस्कारीꣳसुंज्ज्ञानायस्मरकारीम्

ढम ४३. निर्ऋत्यै परिविविदानम् अनूढे ज्येष्ठे ऊढवन्तम् ४४. अराध्यैदेव्यै एदिधिषुःपतिम् ज्येष्ठायां पुत्रागमनूढायामूढा एदि-धिषुःतत्पतिम् ४५. निःक्रतये पेशस्कारीं रूपकर्त्रीम ४६. सज्ज्ञानाय सूरकारीं कामदीपिकरीम ४७. प्रकामोद्याय तत्सज्ज्ञाय देवाय उपसिटतीत्युपसत् समीपस्थितस्तम् ४८. एतानग्निष्टे नियूनक्ति ॥ अथ द्वितीये यूपे। वर्षाय अनुरुधम् अनुरुध्यतेऽनु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सरतीतानुरुत् तम् १. बलाय उपदाम् उपददातीत्युपदास्तमुपायनदातारम् ॥ ९ ॥ उत्सादेभ्यः कुब्जं वक्राङ्गम् २. प्रमुदे वामनं ह्रस्वाङ्गम् ४. ब्राह्मयः स्रामं सर्वदा जलक्लिन्ननेत्रम् ५. स्वप्नाय अन्धं नेत्रहीनम् ६. अधर्माय बधिरं कर्णेन्द्रिय-हीनम् ७. पवित्राय भिषजं वैद्यम् ८. प्रज्ञानाय नक्षत्राणि दर्शयति तम् गणकम् ९. आशिक्षायै प्रश्निनं प्रश्नवन्तम् शकुनादिप्रष्टारमित्यर्थः १०. उपशिक्षायै अभिप्रश्निनमभिप्रश्नवन्तम् ११. ॥ अथ तृतीये यूपे । मर्यादायै प्रश्नविवाकं कृताग्र-

कामोद्यायोप्रसदंव्वर्णायानुरुधम्बलायोपदाम् ॥ ९ ॥ उत्सादेब्भ्यः कुब्जम् ॥ उत्सादेब्भ्यः कुब्जम्प्रमदेव्वामनन्द्राब्भ्यै ँ स्रामस्वप्नायान्धम धर्म्मायबधिरम्पवित्त्रायभिषजम्प्रज्ञानायनक्षत्रदर्शमाशिक्षायैप्रश्नि नमुपशिक्षायाऽअभिप्रश्निन्नन्नम्मुर्य्यादायैप्रश्नविवाकम् ॥१०॥अर्म्मे हस्तिपम् ॥ अर्म्मेब्भ्योहस्तिपञ्जवायाश्वपम्पुष्टैगोपालंव्विर्य्या

श्नान्यो विविनक्ति व्रूते स प्रश्नविवाकस्तम् ॥ १. १० ॥ अर्मेभ्यो हस्तिपं गजपालकम् २. जवाय अश्वपं तुरगपालकम् ३ पुष्टै गोपालं धेनुपालकम ४. वीर्याय अविपालम् ५. तेजसे अजपालम् ६. इरायै कोनाशं कर्षुकः कोनाशः कर्षुके यमे ७ कीलालाय सुराकारं मद्यकृतम् ८. भद्राय गृहपं गेहपालकम् ९. रेयसे वित्तधं वित्तं दधातीति वित्तधस्तम् धनकर्तारम् १०. आध्यक्ष्याय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अनुच्चत्तारं सारथ्यनुसारिणम् ११. ॥ ११ ॥ अथ चतुर्थे यूपे । भायै दार्वाहारं काष्ठानामाहर्तारम् १. प्रभायै अग्न्येधम अग्निमेधमतोति मग्नेर्वर्धकम २. वृष्नस्य विष्टपाय सूर्यलोकाय अभिषेक्तारम् ६. वर्षिष्ठाय नाकाय उत्कृष्टस्वर्गाय परिवेष्टारम् ४. देवलोकाय पेशितारम पिश अवयवे पिंशतोति पेशिता तम् प्रतिमाद्यवयवकर्तारम् ५. मनुष्यलोकाय प्रकरिताम् कृ विक्षेपे विक्षे

यावि॒पाल॑न्तेज॑सेजपाल॒मिरा॑यैकोना॒शङ्कोला॑लाय॒सुरा॑कार॒म्भद्रा॑य॒गृ
हु॒पꣳ श्रेय॑सेवित्तु॒धमाङ्ग्या॑यान॒क्षत्ता॑रम् ॥ ११॥ भायै॒दार्वा॑हा
रम् ॥ भायै॒दार्वा॑हार॒म्प्रभाया॑ऽअग्न्ये॒धम॒व्रध्न॒स्य॑विष्टपा॑याभिषे॒क्ता
र॑ञ्च॒षिं॒ष्ठाय॒नाका॑यपरिवे॒ष्टार॑न्दे॒वलो॑काय॑ पेशि॒तार॑म्म॒नुष्य॒लो
का॑य॒प्रकरि॒ता॒र॒ꣳ सर्वे॑भ्यो॒लोके॑भ्य॑ऽउपसे॒क्तार॒मव॑ऽऋ॒त्यै॒व्वधा॑यो॑
पमन्थि॒तार॒म्मेधा॑य॒व्वास॑ꣳ पल॒पू॒लीम्प्र॑का॒मायं॑रजयि॒त्त्रीम् ॥ १२ ॥

रम ६. सर्वेभ्यो लोकेभ्यः उपसेक्तारमुपसेचनकर्तारम् ७. अवऋतवे बधाय उपमन्थितारमुपमन्थनकर्तारम् ८. मेधाय वासःपल्यूलीम् वाससां प्रक्षालनकर्तारम् पल्यूल प्रक्षालनच्छेदनयोः ९. प्रकामाय रजयित्रीं वस्त्राणां रङ्गकारिणीं नारीम् १० ॥ १२॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऋतये स्तेनहृदय स्तेनस्येव हृदयं यस्य तम ११. ॥ अथ पञ्चमे यूपे। वैरहत्याय पिशुनम्यरहत्तमूचकम १. विविक्त्ये चत्तारं प्रतीहारम २. औपद्रष्ट्राय अनुचत्तारं प्रतिहार वकम ३. बलाय अनुचरं सेवकम् ४ भूम्ने परिष्कन्दम् परितः स्कन्दति रेतः सिञ्चतितम् ५. प्रियवादिनं मधुरभाषिणम् ६. अरिष्टै अश्वमादम अश्वारोहम ७. स्वर्गाय लोकाय भागदुग्धे भागदुघस्तम विभागप्रदम् ८. वार्षष्ठाय नाकाय परिवेष्टारम् ९. ॥ १३ ॥ मन्यवे अयस्तापमयस्तपं लोहतापकम् १०. क्रोधाय

ऋतयेस्तेनहृदयम् ॥ ऋतयेस्तेनहृदयंव्वैरहत्यायपिशुनंव्विविक्तये चत्तारमौपद्रष्ट्रायानुचत्तारम्बलायानुचरम्भू म्नेपरिष्कन्दम्प्रिया यंप्रियवादिनुमरिष्टय्याऽअश्श्वमाद ँ स्वर्गायलोकायभागदुघंव्व र्षिष्ठायनाकायपरिवेष्टारम् ॥ १३ ॥ मन्यवेयस्तापम् ॥ मन्य वेयस्तापक्रोधायनिमरंत्योगाययोक्तार ँ शोकायाभिमर्तार ँ क्षे

निमरं नितरां मर्तारम् ॥ ११. ॥ अथषष्ठे यूपे। योगाय योक्तारं योगकर्तारम् १. शोकाय अभिमर्तारं सन्मुखमागच्छन्तम् २. क्षेमाय विमोक्तारम् विमोचनकरम ३. उत्कूलनिकूलेभ्यः त्रिष्ठिनम् त्रिषु तिष्ठतीति त्रिष्ठीतम् विद्यादिषु स्थितं शीलवन्तमितार्थः ४. वपुषे मानस्कृतं पूजाया अभिमानस्य वा कर्तारम् सक् छान्दसः ५. शीलाय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अञ्जनीकारीम् अञ्जनविद्याकर्चीम् ६. निर्ऋतैा कोशकारीं खड्गादावरणं कोशस्तत्कारिणीं स्त्रियम् ७. यमाय असुम् न सूते सा असू ताम वन्ध्याम् ८. ॥ १४ ॥ यमाय मयमू युग्मप्रसविचोम् ९. अथर्वभ्योऽवतोकां निरप तयाम् १०. संवत्सराय पर्यायिणीम् पर्यायोऽनुक्रमस्तद्वतीमनुक्रमज्ञाम् ॥ ११. ॥ अथ सप्तमे यूपे। परिवत्सराय आविजाताम् अप्रसूतां १. इदावत्सराय

मांयव्विमोक्तारंमुत्कूलनिकूलेभ्यस्त्रिष्ठिनंव्वपुंषमानस्कृत ६ श्री लांबांजनीकारीन्निर्ऋत्यैकोशकारींय्युमायासूम् ॥ १४ ॥ युमायं यमसूम् ॥ युमायंयमसूमथर्वभ्योवंतोकाꣳसंव्वत्सरायंपर्य्यायिणीं म्परिवत्सरायाविंजातामिदावत्सरायातीत्वंरीमिद्वत्सरायांतिष्कद्वंरीं व्वत्सरायुव्विजंर्ज्जराꣳसँव्वत्सरायपलिक्नीमृभुभ्योंजिनसन्धꣳसाध्या दभ्यंश्चर्म्मुम्नम् ॥ १५ ॥ सरोंभ्योधैवरम् ॥ सरोंभ्योधैवरमुपस्था

अतिस्कन्दम्भवति अतीत्वरीमत्यन्तं कुलटाम् पुंश्चली कुलटेत्वरी २. इद्वत्सराय अतिष्कद्वरीम् अतिस्कद्वरी स्कन्देर्वन्नन्तात् ङीत्रेफौ ३. वत्सराय विजर्जरां शिथिलशरीराम् ४. संवत्सराय पलिक्नीं श्वेतकेशाम् ५. ऋभुभ्यः अजिनसन्धं चर्मसन्धातारम् ६. साध्यभ्यः चर्मघ्नं चर्माभ्यासकरम् ७ ॥ १५ ॥ सरोभ्यो धैवरं कैवर्तापत्यम् ८. उपस्थावरा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दाशम् दाशृ दाने दातारम् दाशो धीवरो वा ९. वैशन्ताभ्यो वैन्दं विन्दो निषादापत्यम् १०. नड्वलाभ्यः शौष्कलं मत्स्याजीवनम् शुष्कला मत्स्यास्तर्जीवति तम् ११ ॥ अथाष्टमे यूपे । पाराय मार्गारम् मृगादेरपत्यं मार्गारस्तम् १. अवराय कैवर्तम् २. तीर्थेभ्यः आन्दम् अदि बन्धने अदति आन्दस्तं बन्धनकर्तारम् ३. विषमेभ्यो मैनालम् अल् वारणे मीनानलति वारयति जालैरसौ मीनालस्तदपत्यम् ४ स्वनेभ्यः पर्णकं भिल्लम् ५. गुहाभ्यः किरातम् ६ सानुभ्यः जम्भकं

वराभ्योदाशंवैशन्ताभ्योबैन्दन्नड्वलाभ्यःशौष्कलम्पारायमार्गारं मवारायकैवर्त्तन्तीर्थेभ्यऽआन्दंविषमेभ्योमैनालꣳस्वनेभ्यः पर्णं कुहाभ्यः किरातं ६ सानुभ्योजम्भंकम्पर्व्वतेभ्यः किम्पूरुषम् ॥ १६ बीभत्सायैपौल्कसम् ॥ बीभत्सायैपौल्कसंवर्णायहिरण्यकारन्तुलायैवाणिं जम्पश्चादोषायग्लाविनंविप्रवेभ्योभूते

जभि नाशने जम्भयतीति तम् ७ पर्वतेभ्यः किम्पूरुषं कुत्सितनरम् ८ ॥ १६ ॥ बीभत्साये पौल्कसम् पुल्कसापत्यम् ९. वर्णाय हिरण्यकारं स्वर्णनिष्पादकम् १० । तुलायै वाणिजं वणिगपत्यम् ११. ॥ अथ नवमे यूपे । पश्चादोषाय ग्लाविनं ग्लो हर्षक्षये अङ्घ्टम् १. विप्रवेभ्यो भूतेभ्यः सिध्मलं सिध्माख्यरोगवन्तम् २. भूतै जागरणं जागरूकम् ३. अभूतै

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वपनं शयालुम् ४. आर्तेा जनवादिनं जनान्वदति तम् ५. व्यृद्धै अपगल्भम् ६. संशराय प्रच्छिदं प्रच्छिदंगकर्तारम् ७. ॥ १७ ॥ अक्षराजाय कितवं धूर्तम ८ क्षताया आदिनवदर्शम. आदिनवो दोषस्तं पश्यति तथाभूतम् ९. क्षेताय कल्पिनं कल्पकम् । १० । द्वापराय अधिकल्पिनम् अधिकल्पनाकर्तारम् ११. अथ दशमे यूपे । आस्कन्दाय सभा-

ब्भ्य॑ः सि॒ध्मल॒म्भूत्यै॑जागर॒णम॒भूत्यै॒स्वप॒नमा॑त्त्यै॑ज॒नवा॒दिन॑व्यृ॒द्धा
ऽअप॑गल्भ॒ꣳसं॑शि॒रायं॑प्रच्छि॒दम् ॥ १७ ॥ अक्ष॒रा॒जायं॑कित॒वम् ॥
अक्ष॒रा॒जायं॑कि॒कित॒वꣳक्ष॑ता॒यां॑दिनवदर्शन्क्षे॒तायै॒ कल्पि॑न॒न्द्वाप॒रायां॑
धिकल्पि॑न॒मास्क॒न्दायं॑स॒भास्थ्या॒णुम्मृ॒त्यवे॑गोव्यच्छ॒मन्तं॑कायगोघा॒त
ङ्क्षु॒धेयोगाँ॑वि॒कृ॒न्त॒न्त॒मिच्छ॑माणऽउपतिष्ठ॑ति दुष्कृ॒तायु॒चर॑कांचा
र्य॒म्प्राप्म॒नेसै॒लगम् ॥ १८ ॥ प्रति॒श्रुत्कां॑याऽअर्त्त॒नम् ॥ प्रति॒श्रु

स्थाणुं सभायां स्थिरम. १. मृत्यवे गोव्यच्छं गाः प्रति गमनशीलम. २. अन्तकाय गोघातम् गवां हन्तारम् ३. क्षुधे योगां विकृन्तन्तं भिक्षमाण उपतिष्ठतियः पुमान् गां विकृन्तन्तं क्षिन्दन्त भिक्षमाणो याचितारं क्षुधे दैव्यै आलभेत ४. दुःकृताय चरकाचार्यं चरकाणां गुरुम ५. प्राप्मनेसैलगं सीलगो दुष्टस्तदपत्यम् ६. ॥ १८ ॥ प्रतिश्रुत्कायं अर्तनं दुःखि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नम् ७. घोषाय भषं कल्पकम् ८. अन्ताय बहुवादिनम् ९. अनन्ताय मूकं वाग्विकलम् १०. शब्दाय आडम्बरमाहन्ति तम् कोलाहलकर्तारम् ११. ॥ अथैकादशे यूपे । महसे वीणावादं वीणावादनकर्त्तारम १. क्रोशायतूणवध्मम् तूणवं वाद्यविशेषं धमति तथाभूतम् २. अवरस्पराय शङ्खध्मं [शङ्खवादकम ३. वनाय वनपं वनपालकम ४. अन्यतो ऽरण्याय दावपं वनवह्निपं ५ ॥ १९ ॥ नर्माय पुंश्चलूं दुष्टां नारीम् हसाय कारिं करणशीलं यादसे शाबल्याम् शबलः

ल्कायाऽऋर्त्तनङ्क्रोषांयभुषमन्तांयबहुवादिनंमनन्तायमूकु ६ शब्दाया डम्बराघातम्महंसेव्वीणावादङ्क्रोशांयतूणबुध्ध्मंवर स्परायंशङ्ख ध्मंवनांयव्वनुपमन्व्यतोरण्यायदावुपम् ॥ १९ ॥ नुर्म्मायंपुँ श्चुलूम् ॥ नुर्म्मायंपुँश्चुलू ७ हसांयुकारिँव्यादंसेशावल्ल्याङ्गां

कर्बुरवर्णः तदपत्यभूतां स्त्रियं ग्रामख्यं ग्रामनेतारं गणकं ज्योतिर्विदं अभिक्रोशकं निन्दकं तान्महसे जुष्टं नियुनज्मोति एकादशे यूपे आलभते ॥ एवं प्रतियूपमेकादशस्वेकादशसु नियुक्तेषु येऽधिका अवशिष्टास्तान् समाप्तिपर्यन्तान्द्वितीयोच्छ्रिते यूपे नियुनक्ति तांश्च वीणावादं पाणिघ्नमित्यादीन् रात्रैक्षण पिङ्गाक्षमित्यन्तांश्चतुर्दश ततोऽथैतानष्टौ विरूपानिताष्टौ च मागधादींश्चतुरः एवं षड्विंशतिं द्वितीये यूपे पूर्वोक्ता एकादश एवंसप्तत्रिंशत् । तानेवाह । वीणा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वादं पाणिघ्नं हस्तालवादकं तूणवध्नं तान् स्त्रीन् नृत्ताय आलभते ३. अनन्दाय तलवं वागतिगन्धनयोः गन्धनं हिंसा तलं हस्तादितलं वाति वाद्यमुखं हन्ति स तलवस्तं वाद्यवादकं ४. ॥ २० ॥ अग्नये पोवानं स्थूलं ५. पृथिव्यै पोठसर्पिणं पोठेनासनेन सर्पति गच्छति पोठसर्पीतं पङ्गुं ६. वायवे चाण्डालं चण्डालकर्म्माणं ७. अन्तरिक्षाय वंश-

मुगयुङ्गणंकर्मभिक्रोशंकुन्तान्न्मर्हसे व्वीणावादम्पाणिघ्नन्तूणवध्वम न्तान्नृत्तायानुन्दायतलुवम् ॥ २० ॥ अग्नयेपीवानम् ॥ अग्न येपीवानम्पृथिव्यैपीठसर्प्पिणंव्वायवेंचाण्डालमन्तरिक्षायव्वंशनर्ति न्नदिवेखंलुतिंसूर्य्यायहर्य्यक्षन्नक्षंत्रेभ्यः किर्म्मिरञ्चन्द्रमसेकिला समहन्नेंशुक्लम्पिङ्गाक्षंरात्रैकृष्णम्पिङ्गाक्षम् ॥ २१ ॥ अथैता न् ॥ अथैतानष्टौविरूपानालंभतेतिंदीर्घ्घञ्चातिंक्रस्वञ्चातिंस्थू

नर्तिनं वंशेन नर्तनशीलं ८. दिवे खलतिमलोमशिरस्कं खल्वाटमित्यर्थः ९. सूर्याय हर्यक्षंहरितनेत्रं १०. नक्षत्रेभ्यः क्लिम्मिरं कर्व्वुरवर्णं ११. चन्द्रमसे किलासं सिधमंरोगवन्तं १२. अङ्गे शुक्लवर्णं पिङ्गाक्षं १३. रात्रै कृष्णवर्णं पिङ्गाक्षं १४. ॥ २१ ॥ एतान् विरूपान् आलभते अतिदीर्घं अतिह्रस्वं अतिस्थूलं अतिकृशं अतिशुक्लं अतिकृष्णं अतिकुत्वं रोमरहितं अतिलो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मश्वं सर्वाङ्ग्व्यापिरोमाणं । ते अष्टौ अशूद्राः अ०ब्राह्मणाः शूद्रब्राह्मण्यतिरिक्ताः पशवो भवन्ति तेऽष्टावपि प्राजापत्याः मागधः पुंश्चलीकितवः क्लीवः एतेऽपिप्राजापत्याः

इति महीधरादि भाष्येविंशोध्यायः ।

लुश्वातिंक्लशुश्वातिंशुक्लुश्वातिंक्लष्णुश्वातिंकुल्वुञ्चातिंलोमशञ्च ॥ अशूंद्राऽअब्रांह्मणास्तेप्प्राजापुत्याः ॥ मागुधः पुंश्चुलीकिंतवः क्लीबोशूंद्राऽअब्रांह्म्मणास्तेप्प्राजापुत्त्याः ॥ २२ ॥ [१६]

इतिसंहितापाठेचिंशत्तमोऽध्यायः ॥ ३० ॥

* सहस्रंशीर्षापुरुंषः ॥ सहस्राक्षः सुहस्रंपात् ॥ सभूमिंः

ॐ (१) परमात्मविज्ञानानन्दादि गुणाधारात्मनि प्रभूतःपुरुषमेधोयज्ञः प्रजापति.लोककालाग्न्यादिवपुः पुरुषोत्पत्तिस्थितिसंहृतीनां हेतुः स्वर्गापवर्गैश्वर्यमोक्षदो ज्ञानकर्मसमुच्चयकारि-

(१) कात्य०नियुक्तान् ब्रह्माभिष्टौति होत्रवदनुवाकेन सहस्रशीर्षेति ।

---

* सहस्रशीर्षाषोडशाङ्गाःसम्भृतःषटत्रींद्वाविंठ०शतिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णम् शरीरंयस्योवाअस्यात्माभवतीतिश्रुतिः। सहस्रशीर्षापुरुषइत्यनुवाकेन षोडशर्चेनानुष्टुभेन त्रिष्टुवन्त्येन ब्रह्मणेब्राह्मणमित्याद्यवयवभूत पुरुषद्वारेणावयवी स्तूयते। इदानींस्तुत्यर्थं निर्वचनद्वारेण दृढयितुमाह। अथयस्मात्पुरुषमेधो नानेमेवैलोकाःपूरयमेव पुरुषोयोयंपवते सोस्यांपुरिशेते तस्मात्पुरुषः। तस्ययदेषु लोकेष्वन्नं तदस्यान्नंमेध स्तदस्यैतदन्नं मेधस्तस्मात्पुरुषमेधः। पुरुषसूक्तस्यनारायणऋषिः पुरुषोदेवतानुष्टुप्छन्दः अन्त्यात्रिष्टुप्मोक्षे विनियोगः अस्यभाष्यं शौनकोनामऋषि रकारोत्। प्रथमंविच्छेदः क्रियाकारकसंबन्धःसमासः प्रमेयार्थश्चाख्येति सर्वमेतज्जनकाय मोक्षार्थंकथयामासेति सहस्रशीर्षापुरुषः। सहस्राक्षःसहस्रपात् सःभूमिम्

सुर्व्वतस्पृत्वात्त्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएव ॥ पुरुषएवे

सर्वतःस्पृत्वा अतिअतिष्ठत् दशाङ्गुलम्। सःपुरुषः नारायणाख्यःसर्वतः भुवनकोशस्यभूमिंस्पृत्वा व्याप्यदशाङ्गुलम् अत्यतिष्ठत्। दशचतानि अङ्गुलानिदशाङ्गुलानीन्द्रियाणि। केचिदन्यथारोचयन्ति दशाङ्गुलप्रमाणं हृदयास्थानम्। अपरेतु नासिकागन्दशाङ्गुलमिति किम्भूतोसौ सहस्रशीर्षा। अनेकपर्यायःसहस्रशब्दः अनेकानिशिरांसि यस्यससहस्रशीर्षा पुरुषः। सहस्राक्षः। सहस्राण्यक्षीणिनेत्राणि तस्यासौसहस्राक्षः सहस्रपात् पादानामङ्गानांसहस्राणियस्य ससहस्रयात्। एतद्गुणःपुरुषः तद्व्याप्यअतिक्रम्यस्थितइति ॥ १ ॥ पुरुषएव। पुरुषःएव इदम्सर्वम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यत्भूतम् यत्चभाव्यम् । उतअमृतत्त्वस्य ईशानः यत्अन्नेनअतिरोहति । सएवपुरुषः पूर्वप-
र्यायविशेषितएव शब्दोनान्यः । इदंवर्तमानकंसर्वम् यच्चभूतमतीतम् यद्भाव्यम्अविष्यत् तस्य-
कालत्रयस्यईशानः । नकेवलङ्कालत्रयस्य ईशानः । उतअमृतत्त्वस्यापिमोक्षस्यापि । उतशब्दोपि-
शब्दार्थे कस्मात्कारणात् । यत्अन्नेनअमृतेन अतिरोहति अतिरोधंकरोति । सर्वस्येश्वरइति ॥२॥
एतावानस्य । एतावान्अस्यमहिमा अतःज्यायांश्च पुरुषः । पाद.अस्यविश्वाभूतानित्रिपात्अस्य

दꣳसर्व्वँय्यइ꣡तंय्यच्चंभाव्यꣳम् ॥ उतामृ꣡तत्त्वस्येशा꣡नोयदन्ने꣡नातिरो
हꣳति ॥ २ ॥ एतावा꣡नस्य ॥ महिमातो꣡ज्ज्यायाँꣳश्चꣳपूरु꣡षः ॥ पादो꣡
स्यविश्वाभूतानि꣡त्रिपादꣳस्यामृतन्दि꣡वि ॥ ३ ॥ त्रि꣡पादू꣡र्ध्वꣳ ॥

अमृतन्दिवि । अस्यपुरुषस्य पूर्वोक्तविशेषणविशेषितस्य एतावान्महिमा । एतदेवमहत्वमस्य अतः
कारणात् ज्यायांश्चपुरुषः महानित्यर्थः । कस्माद्महत्वमायातम् यस्मात्पादःएकांशः अस्यपुरुषस्य ।
विश्वाभूतानिविश्वानि चतुर्दशभुवनसमूहेयानिचतुर्ब्रह्मभूतानि तान्येकांशः । त्रिपात्पुनः त्रयोंशाः
अस्यपुरुषस्यामृतम् ऋग्यजुःसामलक्षणम् आदित्यलक्षणंवादिव्योतलेइति ॥ ३ ॥ त्रिपादूर्ध्वः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्रिपात्ऊर्ङ्ः उत्ऐत्पुरुषःपादः असग्रङ्हअभवत्पुनः । ततःविष्वङ्व्यक्रामत्साशनानशने-
अभि । यस्मादयंपुरुषः त्रिपात्त्र्यंशभूतः ऊर्ङ्ः उपरिष्टात्उदैत्देदीप्यमानस्तिष्ठति । असग्च
पुरुषसग्भावः एकोंशःइहत्रैलोक्ये वीजभूतश्चतुर्षुभूतेषु अभूत्भूतम् । ततःतस्मात्कारणात् विष्व-
ङ्भुवनकोशंव्यक्रामत् उत्पन्नमित्यर्थः तस्मादेवपुरुषात् । साशनानशनेअभि साशनंस्वर्गम्
अनशनं मोक्षम् सर्वंजगत्स्वर्गंप्रतिमोक्षम्प्रतिच तस्मादेवोत्पन्नमित्यर्थः ॥ ४ ॥ ततोविराट् ।

त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ ततोविष्वङ्व्यु
क्रामत्साशनानशनेऽअभि ॥ ४ ॥ ततोविराट् ॥ ततोविराडजा
यतविराजोऽअधिपूरुषः ॥ सजातोऽअत्यरिच्यतपश्चाद्भूमिमथो

ततःविराट्अजायत विराजःअधिपूरुषः । सःजातः अतिअरिच्यत पश्चात्भूमिम् अथोपुरः ।
तस्मादेवपुरुषात् विश्वोत्पत्तिः । तत्रपूर्वंविराट् अजायत विराजःअधिपूरुषः प्रधानन्तेजः ।
सत्तेवत्तः ब्रह्मासृष्टिकृत् जातःसन्अतिरिच्यते सोभितः । पश्चात्अस्मात् त्तेवत्तात्ब्रह्मणः भूमिः
पृथिव्यादीजाता उत्पन्नाइति अथोनन्तरम् पुरःशरीराणि पुराणिचतुर्विधानिभूतानि अजायन्त ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुत्रादीनितेनैवोत्पादितानि एवमेकोंशः तेनैवसर्वंविश्वमुत्पादितमिति ॥ ५ ॥ तस्माद्यज्ञात् । तस्मात् यज्ञात् सर्वहुतःसंभृतम् पृषदाज्यम् पशूंस्ताश्चक्रे वायव्यान्आरण्याःचये । यथाअग्निष्टोमाख्यात् तस्मायज्ञात्सर्वहुतः । संभृतंपृषदाज्यम् तेनवायव्यान्पशून् आरण्यागाम्याश्च येतान्कृतवन्तः । एवमात्मयज्ञात् । सर्वहुतात्पूरितात् उत्पन्नेनयोगिनः सर्वान्पशून् सर्वाणिभूतजातानि करतल-

पुरः ॥ ५ ॥ तस्म्माद्य ज्ज्ञात् ॥ तस्मांद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चक्रेव्वायव्यानारण्यागग्राम्याश्चये ॥६॥ तस्म्माद्य ज्ज्ञात् ॥ तस्मांद्य ज्ञात्सर्व्वहुतऽऋचः सामानिजज्ञिरे ॥ छन्दांऽसिजज्ञिरे तस्म्माद्यजुस्तस्म्मादजायत ॥ ७ ॥ तस्म्माद

वत्पश्यन्ति । पश्यन्तिकिलज्ञान तेजसाभूतजातानि ॥ ६ ॥ तस्माद्यज्ञात् । तस्मात् यज्ञात्सर्वहुतः ऋचःसामानिजज्ञिरे । छन्दांसियज्ञिरे तस्मात्यजुःतस्मात् अजायत । तस्मादेवयज्ञात्सर्वहुतः प्रज्वालितात् यथाऋचःसामानि यजूंषिच देवाउत्पादयन्ति छन्दांसिच । एवमात्मयज्ञे प्रणवेनदीपिते स्वयमेवज्ञानादधिष्ठितानिभवन्ति । एवयेनपरमात्मनिज्ञायते सर्वोजग्धाः सर्वंवाङ्मयंज्ञानम्भवतीति ॥ ७ ॥ तस्माद्यज्ञात् अश्वाः अजायन्त उत्पन्ना तथा ये के चाश्वातिरिक्ता

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गर्दभादयोऽश्वतराश्च उभयादतः उभयोर्भागयोर्दन्ता येषां ते उभयदतः छान्दसं दीर्घम् ऊर्ध्वाधोभागयोर्दन्तयुक्ताः सन्ति तेऽप्यजायन्त । तथा ह स्फुटं तस्माद्यज्ञात् गावः च जज्ञिरे । किञ्च तस्माद्यज्ञात् अजावयः अजाः अवयश्च जाताः । न हि पशुभिर्विना यज्ञः सिध्येत् ॥ ८ ॥ तंयज्ञम् । तम्यज्ञम् वर्हिषि । प्रौक्षन्पुरुषम् जातम्अग्रतः । तेन । देवाः अयजन्त साध्याः

पृश्नवाः ॥ तस्म्माद्यज्ञात्सर्व्वाऽअजायन्तयेकेचोभयादतः ॥ गावोह जज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः ॥ ८ ॥ तंय्यज्ञम् ॥ तंय्यज्ञम्ब र्हिषिप्प्रौक्षन्पुरुषञ्जातमग्र्यतः ॥ तेनदेवाऽअयजन्तसाध्याऽऋषय

ऋषयश्च । ये ॥ यथेन्द्रेण तत्रयज्ञे अग्निष्टोमाख्ये वर्हिषाप्रोक्षितः पुरुषोजातः । तद्वदात्मयज्ञे वर्हिषाप्राणायामेन दीपितेन तस्मिन्पुरुषोजातः ज्ञानमुत्पद्यतेदिव्यम् । अग्रतः प्रथमतः । तेन देवाइन्द्रादयः साध्याश्चऋषयश्च यथाअयजन्त । तथादेवा योगिनः कपिलादयश्च साध्याश्चापरे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ऋषयः । ऋषयश्चान्येतेनैव प्रणवाधिष्ठितेन पुरुषेणात्मयज्ञं कृतवन्तइति ॥ ९ ॥ यत्पुरुषम् । यत्पुरुषम् व्यदधुः कतिधा व्यकल्पयन् । मुखम्किम् अस्यआसीत् किंवाहू किम्ऊरू पादौउच्येते ॥ यत्पुरुषम् देवाइन्द्रादयः तस्मिन् यज्ञे व्यदधुः कृतवन्तोयथा । तद्वत्योगिनः आत्मयज्ञे पुरुषंज्ञानम् यत्ज्ञानान्तं तत्कृतवन्तः । कतिप्रकारंविकल्पितवन्तः । तस्यैवंवि-

प्रुच्चुये ॥ ९ ॥ यत्पुरुषम् ॥ यत्पुरुषंव्यदधुः कतिधाव्यकल्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्येते ॥ १० ॥ ब्राह्मणोस्य ॥ ब्राह्मणोस्यमुखंमासीद्बाहूराजन्यः कृतः ॥

धस्यकिंमुखम् कौवाहूकौऊरूपादौउच्येतेउच्यंतामित्यर्थः । ब्राह्मणश्चक्षत्रियवैश्यशूद्राः स्थिताइत्यर्थः ॥ १० ॥ ब्राह्मणोस्य । ब्राह्मणः अस्य मुखम्असीत् वाहू राजन्यः कृतः ऊरूतत् अस्ययत्वैश्यः पद्भ्याम्शूद्रः अजायत । अस्ययज्ञोत्पन्नस्यपुरुषस्य येकेचिद्ब्राह्मणाः तेमुखम्आसीत् । येक्षत्रियाः तेवाहूकृताः । येवैश्याः तेअस्यऊरूकृताः । येशूद्राः तेपद्भ्याम्अजायत इतिक-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ल्पन्ते । तदस्योत्पन्नत्वादिति । एवमेतेवयवा: शिर: प्रभृतय: पुरुषस्यविद्यन्तेनान्येइति ॥ ११ ॥ चन्द्रमामनस: । चन्द्रमा:मनस:जात: चक्षो: सूर्य:अजायत । श्रोत्रात्वायु:चप्राण:चमुखात् अग्नि:अजायत । तस्यैवंविधस्य यज्ञोत्पन्नस्यपुरुषस्य । चन्द्रमा:मनस: चेतस:जात:अजायते तिकल्पना । मनएवचन्द्रमा: । चक्षो: नेत्राभ्यांसूर्य: । नेत्रे एवसूर्य: । य:प्राणोजीव: सए-

ऊरूतदस्ययद्वैश्यः पद्भ्याꣳशूद्रोऽअजायत ॥ ११ ॥ चन्द्रमा मनसः ॥ चन्द्रमामनसोजातश्चक्षोः सूर्य्योऽअजायत ॥ श्रोत्रा द्वायुश्च्चप्राणश्चमुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसीत् ॥ नाभ्याऽआसीदन्तरिक्षꣳशीर्ष्णोद्यौः समवर्त्तत ॥ पद्भ्याम्भूमि

ववायु:श्रोत्रात् अजायतेतिकल्प्यतेश्रोत्रमेववायु: । योयमग्नि:समुखात् अजायतेतिकल्प्यते मुख-मेवाग्नि: अंशोत्पन्नत्वादिति ॥ १२ ॥ नाभ्याआसीत् । नाभ्या:आसीत् अन्तरिक्षम् शिर्ष्णा: द्यौ.सम्अवर्त्तत । पद्भ्याम्भूमि:दिश:श्रोत्रात् तथालोकान् अकल्पयन् । तस्यैवंविधस्यपुरुषस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यानाभिःतदेवान्तरिक्षन्नभः। याद्यौःतत्शीर्षंशिरः। समवर्ततेतिकल्पितम्। पादौभूमिरेव। श्रोत्रेश्रवणोदिशः। श्रोत्रवयवाःयस्माद्दिशः ब्रह्मणोजाताः तथैवसर्वान् लोकान् पुरुषस्यावयवभूतान् अकल्पयदिति ॥ १३ ॥ यत्पुरुषेण। यत्पुरुषेण हविषाःदेवाः यज्ञम्अतन्वत। वसन्तः अस्यआसीत् आज्यम् ग्रीष्मःइध्मः शरत्हविः। कथमन्नेनाधिरोहति। यत्यस्मात्कारणात्

दिशः श्रोत्रात्तथालोकाꣳ ॥ऽअकल्पयन् ॥ १३ ॥ यत्पुरुषेण ॥ हविषादेवायज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यंग्रीष्मऽइध्मः शरद्धविः ॥१४॥ सप्तास्यासन्॥ सप्तास्सांसन्परिधयस्त्रिꣳसप्तसमि

पुरुषेणहविषा हविर्भूतेन देवाइन्द्रादयः यथायज्ञम् अतन्वत विस्तारितवन्तः। तथायोगिनोपिपुरुषेणैवामृतभूतेन दीपितेनात्मना आत्मयज्ञंसमधिकृतवन्तः। अत्रयज्ञेवसन्तः आज्यमासीत् ग्रीष्मःइध्मः शरद्धविरिति। इतरयागेवसन्तशब्देन सात्विकोगुणउच्यते ग्रीष्मशब्देनराजसः। शरच्छब्देनतामसः। त्रयोहिगुणा स्तत्रात्मयज्ञेयोगिनोजुह्वतीति ॥ १४ ॥ सप्तास्यासन्। सप्तअस्यआसन् परिधयः त्रिःसप्तसमिधःकृताः। देवाःयत्यज्ञम्। तन्वानाःअवध्नन्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुरुषम्पशुम् । देवाइन्द्रादयः यथायज्ञंपुरुषमेधाख्यं विस्तारयन्तः पुरुषंपशुम् अवध्नन्हतवन्तः । अस्यपुरुषमेधयज्ञस्य सप्तमुद्राःपरिधयःआसन् । भारतेहिवर्षेयागः प्रवर्तते । चितःसप्तछन्दांसि गायत्र्यादीनि समिधःकृताः । आप्रयागेपरिधिशब्देन पृथिव्याप स्तेजो वायु राकाशं मनो-बुद्धिरित्येते परिधयःकल्प्यन्ते चितःसप्तसमिधः । पञ्चमहाभूतानिपृथिव्यादीनि पञ्चतन्मात्रा-णिरूपादीनि । पञ्चबुद्धीन्द्रियाणि श्रोत्रादीनि । पञ्चकर्मेन्द्रियाणिपाय्वादीनिमनश्च एताः चितःस-प्तसमिधःकल्प्यन्ति । तथादेवादीयमानाज्ञानेनयोगिनः समाध्याख्यंयज्ञ न्तन्वानाविस्तायन्तः ।

धꣳ कृताः ॥ देवायज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥१५॥ युज्ञेनयुज्ञम् ॥ युज्ञेनयुज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्न्यासन्

पुरुषंज्ञानं पुरुष मेधपशुरूपेणावस्थितम् अव ध्नन्अगृह्णन् ॥ १५ ॥ यज्ञेनयज्ञम् । यज्ञेन-यज्ञमयजन्त । देवाः । तानिधर्माणिप्रथमानिआसन् । तेहनाकम् । महिमानःसचन्तयचनः पूर्वेसाध्याःसन्तिदेवाः । यथाइन्द्रादयोदेवाः यज्ञेनज्योतिष्टामाख्येन यज्ञपुरुषंवासुदेवम् विधि-नायजन्त । यतःतानियजनरूपाणिधर्माणि प्रथमानिआसन् । तेहमहाभाग्ययुक्ताःनाकंस-चन्त स्वर्गंसेवन्ते । यत्रपूर्वेसाध्याः प्रथमेसुराःसन्तिविद्यन्तेदेवाः तेजसादेदीप्यमानाः । एवंयो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गिनोपिदीपनाद्देवायज्ञेन समाधिनानारायणाख्यं ज्ञानरूपम् अयजन्तयतः तानिसमाधिरूपाणि धर्माणि प्रथमान्यासन । तेतुनाकं सनकादीनांस्थानंगच्छन्ति । येतुयोगिनोमहिमानः जन्मान्तरैर्निर्धूतगुणाःशुद्धाः तेनारायणाख्यं पुरुषमाविशन्ति मुक्तिंगच्छन्तीत्यर्थः ॥ १६ ॥ अद्भ्यःसंभृतः । अद्भ्यःसंभृतः पृथिव्यैरसात् चविश्वकर्मणः सम्अवर्ततअग्रे । तस्यत्वष्टा विद-

सन् ॥ तेहुनाकंम्महिमानः सचन्तुयचपूर्व्वेसाध्याः सन्तिदेवाः ॥ १६ ॥ [१६] अद्भ्याः सम्भृतः ॥ पृथिव्यैरसाच्चविश्वकर्म्मणः समवर्त्तताग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतित्तन्मर्त्यस्यदेवत्वमाजानमग्रे ॥ १७ ॥ वेदाहम् ॥ वेदाहमेतम्पुरुषम्महान्तादित्यवर्णन्तमसःपरस्तात् ॥ १८ ॥ तमेवविदित्वा

धत्रूपम एतितन्मर्त्यस्य देवत्वम आजानमग्रे । त्वष्टाप्रजापतिब्रह्मा यद्रूपमेकांशभूतं विदधत्कृतवान् तदेवमर्त्यस्य मर्त्यभूलोकेदेवत्वंप्रभुत्वम् आजानमाप्तमित्यर्थः । किंभूतोस। अद्भ्यःसकाशात् संभृतःपिण्डीभूतः पृथिव्याःरसात्च । विश्वकर्मणः अग्रेप्रथमतः समवर्तत । संयोगरूपेणकृतः । तस्यैवनान्यस्य तदेवकारणान्मर्त्येप्राप्तवान् सतुपालनायदानवादि विनाशनायेति ॥ १७ ॥ वेदाहम् वेदअहम एतम्पुरुषम् महान्तम्आदित्यवर्णम् तमसःपरस्तात् । तमेवविदित्वा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अतिमृत्युम्एति नान्यः पन्थाविद्यतेऽयनाय । ऋषेःप्रतिवचनम् । अहमेनंपरुषंवेद महान्त-न्देशकालाद्यवच्छेदरहितम् आदित्यवर्णम् स्वप्रकाशम् तमसःपरस्तात् अविद्यायाःभेददर्शनम् । तमेवविदित्वा अतिमृत्युम् एतिअतिक्रम्य मृत्युंतंपुरुषमनुप्रविशति । नान्यः पन्थामार्गः तस्या-यनायगमनायविद्यते किंभूतंतं विशिष्यते ॥ १८ ॥ प्रजापतिश्चरति । प्रजापतिःचरति गर्भेअन्तः

त्यवर्णन्तमसः परस्तात् ॥ तमेवविंदित्वातिमृत्युमेंतिनान्यः पन्थांविद्यतेयंनाय ॥ १८ ॥ प्रजापंतिश्चरति ॥ प्रजापंतिश्चरति गर्भेंअन्तरजांयमानोबहुधाविजांयते ॥ तस्ययोनिम्परिंपश्यन्ति धीरास्तस्मिंन्हतस्थुर्भुवंनानिविश्वा ॥ १९ ॥ योदेवेभ्यंः ॥

अजायमानःबहुधाविजायते । तस्ययोनिम परिपश्यन्ति धीराः तस्मिन्हतस्थः भुवनानिविश्वा । सएवपुरुष एकांशभूतः प्रजापतिः अस्यगर्भस्यान्तः अजायमानः चरतिचतुर्विधेषु भूतेषु । सएवजायमानः बहुधानेकप्रकारंविजायते । येधीराः योगिनः तेतस्यैयोनिं परिपश्यन्ति । सर्वत्यागेनपरिहरन्ति विश्वेत्रैलोक्येभुवनानितस्मिन्नातस्थुः ॥ १९ ॥ योदेवेभ्यः । यःदेवेभ्यः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आतपति यःदेवानाम्पुरः हितः। पूर्वःयः देवेभ्यःजातः नमःरुचाय ब्राह्मये। अग्रेयोदेवेभ्यः योगिनस्तन्नमन्तिध्यायन्ति योदेवेभ्यः सर्वेभ्यःआतपति अतिशयेनतेजसा तपतिआदित्यरूपेणेत्यर्थः। यश्चदेवानां पुरोग्रे इन्द्रत्वेनास्थितः यश्चपूर्वः अग्रे ब्रह्मरूपेण देवेभ्योजातः तस्मैरुचायतेजसेब्राह्मये ब्रह्मपुरुषोपत्त्यायनमः ॥ २० ॥ रुचंब्राह्मम्। रुचमब्राह्मम् जनयन्तः देवाअग्रे तत्अब्रुवन्। यःत्वाएवम् ब्राह्मणःविद्यात् तस्यदेवाःअसनवशे। रुचन्देदीप्यमानं ब्राह्मंब्रह्मणउत्पन्नं जनयन्तःसृष्टयर्थम् देवायोगिनः तेजसादीप्यमानाः यत्तअब्रुवन् यद्दूयुःअग्रे प्रथमतः। किमूचुः अपरोपियोब्राह्मणः सब्रह्मविद्याज्ञानीयात् तस्यदेवाअसन्वशे सोपिसनकादीनां स्थानङ्गच्छतीत्यर्थः ॥ २१ ॥ श्रीश्चते। श्रीःचतेलक्ष्मीः चपत्न्यौ अहोरात्रे पार्श्वेनक्षत्राणिरूपम् अश्विनौव्यात्तम्। इष्णन्इषाण

यो देवेभ्यऽआतपति यो देवानाम्पुरोहितः ॥ पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥ २० ॥ रुचं ब्राह्मम् ॥ रुचं ब्राह्मं जनयन्तो देवाऽअग्रे तदब्रुवन् ॥ यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवाऽअसन्वशे ॥ २१ ॥ श्रीश्चं ॥ श्रीश्चं ते लक्ष्मीश्च पत्न्यावहोरात्रे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अमुम्मेदृषाण सर्वलोकम्मेदृषाण । असद्यपुरुषस्यैतेवयवाः । श्रीश्चलक्ष्मीश्च पत्न्यौभार्ये अहश्चरात्रिश्च तेपार्श्वेनक्षत्राणिरूपम् अश्विनौव्यात्तंमुखम् । दृषाण् दृषाण स्वर्गसद्यलोकसद्यईशानः । एतद्दृषणविशिष्टः नाममोक्षस्यईशानः सर्वलोकस्यच सएवदेवानामीशानइति ॥ २२ ॥

इतिशौनक प्रणीतं पुरुषसूक्तभाष्यं समाप्तम् ॥ ३१ ॥

प्राग्रुद्यर्वेनक्षत्राणिरूपमुश्विनौव्यात्तम् ॥ दृष्णण्न्निंषाणामुम्मंऽदृषाणसर्व्वलोकम्मंऽदृषाण ॥ २२ ॥ [६] ॥ २ ॥

इतिसंहितायांएकत्रिंशोऽध्यायः ॥ ३१ ॥

* तदेव । तदेवाग्निस्तदादित्यस्तद्वायुस्तदुचन्द्रमाः ॥ तदेवशु

(१) इदानींसर्वेमन्त्राः प्राक्प्रवायुमित्यस्मादनुवाकात्सर्वमेधसंबद्धाः । ब्रह्मणआर्षम् । तदेवाग्निः द्वेअनुष्टुभौ । विज्ञानात्मापरेणात्मना विशिष्टाग्न्यादिषु ओतप्रोतत्वेनोपास्योभिधीयते । तदेव-

(१) पुरुषमन्त्रा उक्ताः । अथ सर्वमेधामन्त्रा उच्यन्ते प्रवायुमच्छेत्यस्मात्प्राक स्वयम्भुवब्रह्मदृष्टाः आत्मदेवताः सप्तमेऽहनि आप्तोर्यामसंज्ञिके सर्वहोमे विनियुक्ताः आप्तोर्यामः सप्तममहर्भवतीत्युपक्रम्य सर्व जुहोति सर्वं स्वाय्यै सर्वस्यावरुद्ध्या इति, श्रुतेः।

* तदेव सप्तवेनस्तन्नवद्वीषोऽग्य ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कारणमग्निः तदादित्यः तद्वायुः तत्उचन्द्रमाः। उकारएवार्थे तदेवशुक्रन्त्वयीलक्षणम्। तद्ब्रह्मपरम् ताआपः सःप्रजापतिः ॥ १ ॥ सर्वेनिमेषाः। सर्वेनिमेषचुटिकाष्ठादयः कालविशेषाः जज्ञिरेजाताः। विद्युतः विद्युत्पर्जन्यस्तनयित्नवः। पुरुषादधिशकासात् नचएनं पुरुषंसर्वस्यापि जनकं सन्तम्। ऊर्ध्वंनचतिर्यञ्चं नचमध्येपरिजग्रभत्। नपरिगृह्णातिकश्चिदपि। नह्यसौप्रत्यक्षादी-

क्रन्तद्ब्रह्ममुताऽआपुःसप्प्रजापतिः ॥१॥ सर्वेनिमेषाः ॥ सर्वेनिमेषा जज्ञिरेविद्युतःपुरुषादधि॥ नैनमूर्ध्वन्नतिर्य्यञ्चुन्नमद्ध्यपरिजग्रभत् ॥ २ ॥ नतस्य ॥ प्रतिमाऽअस्तियस्यनाममहद्यशः ॥ हिर

नांविषयः। आगमोहि तत्रप्रवर्तते तदुक्तम्। एषनेतिनेत्यात्मना अगृह्योनहि गृह्यतइत्यादि ॥२॥ नतस्य। गायत्रीद्विपदा नतस्यपुरुषस्य प्रतिमाप्रतिमानभूतं किञ्चिद्विद्यते। यतोयस्यनाममहद्यश इत्येषवेदान्तविदःपठन्ति। हिरण्यगर्भ इत्येषचतुर्ऋचोनुवाको ऽदूरविप्रकर्षेण हिरण्यगर्भं प्रतिमाभूतमाह। मामाहिꣳसीदित्येषाचक्रक् यस्मान्नजातइत्येषाचद्विकण्डिकोनुवाकः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षोडशिदेवत्यो ऽटूरविप्रकर्षेणाभिवदति । आसांचकण्डिकानां ब्रह्मयज्ञेध्ययनं कर्तव्यं प्रतीकग्रहणत्वात् ॥ ३ ॥ एषोह । त्रिष्टुभः सर्वाःसदसस्पतिमद्भुत मित्यस्यागायत्र्याःप्राक् । इदानीञ्चरूपतः कथयति । एषएवदेवः प्रदिशः दिशश्चसर्वाः अनुज्याय्यवर्त्तते तिर्यगूर्ध्वमधश्चेति । पूर्वोहजातश्चनार्दिनिधनः संभूतः । सउगर्भश्चान्तः । सएवचमातुदरेऽन्तर्गर्भे व्यवतिगयुगर्भऽइत्येषमामाहिꣳसीदित्येषायस्मान्नजातऽइत्येषः ॥ ३ ॥ एषोहं ॥ देवः प्रदिशोनुसर्व्वाꣳ पूर्व्वोहजातः सऽउगर्भेऽअन्तः ॥ सऽएवजातः सजनिष्यमाणꣳ प्रत्यङ्जनास्तिष्ठतिसर्व्वतोमुखꣳ ॥ ४ ॥ यस्मान्नजातम् ॥ यस्मान्नजातन्नपुराकिञ्चनैवयऽआ० ३२ शिव० ६१२

ष्ठते । सएवचजातः सएवचजनिष्यमाणः तदुक्तम् । सर्वंखल्विदंब्रह्मतज्जानातिशान्तमुपासीतेति । प्रतिपदार्थमञ्चनः । हेजनाः तिष्ठतिसर्वतोमुखः । सर्वतोक्षिशिरोग्रीव पाणिपादः तिष्ठति अचिन्त्यशक्तिरित्यर्थः । जनाइत्याद्युदात स्वरमपिस्वरामन्त्रिताथस्यादावेववर्तते ॥ ४ ॥ यस्मान्नजातः । यस्मात्पुरुषात् जातंनपुराकिञ्चएव । यश्चआवभूव सम्भावयतिभुवनानिभूतजा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तानिविश्वाविश्वानिसर्वाणि। प्रजापतिरिति व्याख्यात्। अयंषोडशकलिङ्गयुक्तः ॥ ५ ॥ येनपुरुषेण द्यौः उग्रा उद्गूर्णादृष्टिदायिनी कृता। पृथिवीच दृढास्थिरा प्राणिधारणाय दृष्टिग्रहणायच अन्ननिष्पादनायच कृता। येनचस्वः आदित्यमण्डलं स्तभितं स्तंभितम्। येनच नाकः स्वर्गोलोकः। स्तंभितः। यश्चान्तरिक्षे रजसःउदकस्य दृष्टिलक्षणस्य विमानोनिर्माता।

आबभूवभुवनानिविश्वप्रवा ॥ प्रजापतिःप्रजयासꣳरराणस्त्रीणिज्योतींषिसचतेसषोडशी ॥ ५ ॥ येनद्यौः ॥ येनद्यौरुग्रापृथिवीचदृढायेनस्वस्तभितंयेननाकः ॥ योऽअन्तरिक्षेरजसोविमानः कस्मैदेवायहविषाविधेम ॥ ६ ॥ यङ्क्रन्दसी ॥ यङ्क्रन्दसीऽअवसातंयस्त्वियज्ञऽकस्मैअन्यस्मैदेवायहविषाविधेम हविर्दृढमदृतिसमञ्जसम ॥ ६ ॥ यंक्रन्दसी यंपरुषंक्रन्दसीद्यावापृथिव्यौ अवसा अन्नेनहविर्लक्षणेन दृष्टिधारणाद्युपकारजनितेन। तरुभानेसंरुंभयन्त्यौ सर्वंप्राणिजातम् अभिऐक्षेतांमनसा। साध्वेतत्कृतमनेनेति। रेजमानेकम्पमाने।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यत्वचाधि उपरिस्थितः यदाधारदृत्यभिप्रायः । सूरः सूर्यः उदितः सन् विभाति । तन्देवम् परित्यज्य कस्मैदेवाय हविषाविधेम इतिसमंजसम् । आपोहयद्बृहतीर्यश्चिदाप इतिद्वेप्रतीकग्रहीते अत्रापिस्वाध्यायेध्ययनं प्राप्तंप्रतीकस्योपलक्षणार्थत्वात् ॥ ७ ॥ वेनस्तत्पश्यत् । वेनः पण्डितः विदितवेदान्तरहस्यः सद्भावनया तद्रूपंवस्तु पश्यत्पश्यति । निहितंस्थापितम् ।

स्तभानेऽअभ्यैक्षेतामनसारेजमाने ॥ यचाधिसूरऽउदितोविभाति कस्मैदेवायहविषाविधेम ॥ आपोहयद्बृहतीर्यश्चिदापः ॥ ७ ॥

[७] वेनस्तत् ॥ वेनस्तत्पश्यन्निहितङ्गुहासद्यत्रविश्वम्भवत्येकनीडम् ॥ तस्मिन्निदꣳसञ्चविचैतिसर्वꣳसऽओतꣳप्रोतं

गुहागहायामिव । सन्नित्यम् । यत्रविश्वं सर्वमिदं विकारजातं भवति एकनीडम् एकानिलयमविभक्तम् । कारणमेवोपसंहृतं सर्वविशेषम् । तस्मिन्निदं सञ्चविचैति सर्वम् । तस्मिन्नेवपरमात्मनि इदंविकारजातं सर्वंसमेतिच उपसंहृतिकाले । समेत्यच । व्येतिसृष्टिकाले सर्वमेव । सचपरमेश्वरः ओतश्चशरीरभावेन प्रोतश्चजीवभावेन इतरथावा विभूः विभवति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चक्रार्यकारणभावेन । प्रजासु ॥ ८ ॥ प्रतत् प्रयोचेत् प्रब्रूयात्तत् अमृतंशाश्वतम् । नुचि-प्रम् विद्वान्पण्डितः गन्धर्वः । गन्धर्वलोकेहि ब्रह्मविद्यासुतरांज्ञायते । धामस्थानम् । विभृ-तंविच्छतंनानाभूते सर्गस्थितिप्रलयैः । गुहासत् गुहायामिवनिगूढम् अविदृतवेदान्तरहस्यम-ज्ञानाम् । किञ्च । त्रीणिपदानिनिहितानि गुहा । गुहायामिवअस्यअमृतस्य सर्गस्थति-

प्रज्ञविभूः प्रजासु ॥ ८ ॥ प्रतत् ॥ प्रतद्वोचेदमृतन्नुविद्वान्गन्धर्वो धामविभृतङ्गुहासत् ॥ त्रीणिपदानिनिहितागुहास्यय स्तानिवेदसपितुः पितासत् ॥ ९ ॥ सनः ॥ सनोबन्धुर्जनितासविधाता

प्रलयाः त्रयोवावेदाः त्रयोवाकालाः । भूयस्त्वोपलक्षणार्थंवा । भूयांसोहि तत्रगुणाश्रूयन्ते विज्ञानघनानन्दसत्यसंकल्पादयः । परब्रह्मान्तर्यामित्वव्याकृतानिवात्रयःपादाः । यश्चतानिवेदजा-नातिसपितुरपिपितामवति । परंब्रह्मभवतीत्यर्थः । तद्विब्रह्मरूपंश्रेष्ठम् ॥ ९ ॥ सनोबन्धुः । सनोस्माकंबन्धुः मत्वास्माकञ्जनिता । जनयितेतिप्राप्ते जनितामंत्र इतिणिचोलोपः । सचनो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विधाता धारयिता । यःधामानिब्रह्मणःस्थानानि वेद । भुवनानिभूतजातानिविश्वासर्वाणिवेद । नान्यात्मनोभिन्नानिवेद । किञ्च । यद्देवाअग्न्यादयः अमृतम्परब्रह्मलक्षणम् । आनशानाः व्याप्नुवन्तः तृतीयेधामनि स्थानेअधिउपरिस्थिताः ऐरयन्त स्वेच्छयाप्रवर्तन्ते तच्चयोवेद सनो-वन्धुरित्यादावनुवर्तते ॥ १० ॥ इदानींसर्वेषु भूतेष्वहमस्मिसर्वाणिचभूतानि मयिसन्तीत्येतद्दर्श-

धामानिव्वेट्भुवनानिव्विश्वा ॥ यद्देवाऽअमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥ १० ॥ परीत्यभूतानि ॥ परीत्यलोकान्परी त्यसर्व्वाः प्रदिशोदिशश्च ॥ उपस्थायप्रथमजामृतस्यात्क्म

नावगुण्ठितस्य सर्वमेधयाजिनो मुक्तिरुच्यते द्वाभ्यांकण्डिकाभ्याम् नचात्रसर्वमेधोगृह्यः कर्तव्यो-दर्शतस्यप्राधान्यात् । एवंहि पश्यतो यजमानस्याग्निहोत्रादयो यज्ञाः सर्वे सर्वमेधाएव । आलम्व-नमात्रंक्षितवयज्ञाः । परीत्यभूतानि । अनेन दर्शनेन परिक्षायसर्वाणिभूतानिएवमेतदित्यवधार्य । एवंपरिक्षायचसर्वान्लोकान् परिक्षायचसर्वाः दिशः परिक्षायच सर्वाःप्रदिशः । उपस्थायचप्रथम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जांवातं त्रयीलक्षणाम् । अपिहि तस्मात्पुरुषाद्ब्रह्मैव पूर्वमसृज्यतेतिश्रुतिः प्रथमजाऽऋक् । ऋतसत्यब्रह्मसत्र । आत्मना आत्मानम् परेणब्रह्म वा विशिष्टंब्रह्म अभिसंविशति अपुनरावृत्तये ॥ ११ ॥ परिद्यावा । परीत्यत्रसुपसर्गदृक्खेलनेन संबध्यते । परीत्यद्यावापृथिव्यौ अनेनदर्शनेन । परीत्यचलोकान् परीत्यचदिशः परीत्यच स्वःआदित्यम । ऋतसत्र यज्ञसत्र तन्तुंवितंतं विचृत्यविच्छिद्य

नात्क्मानंसुभिसंव्विवेश ॥ ११ ॥ परिद्यावांपृथिवी ॥ सद्यऽइत्त्वाप रिंलोकान्न्परिदिशः परिस्वः ॥ ऋतस्यतन्तुंवितंतंविचृत्यतदं पश्यत्तदंभवत्तदांसीत् ॥ १२ ॥ सदंसस्पतिम् ॥ सदंसस्पतिम

परिसमाप्य । सदाएवतत् तथाभूतमात्मनम अपश्यत्पश्यति । तदभवत् तथाभूतंब्रह्मभवति । तदासीत् तदेवास्ति । तदुक्तम् । तदेवसनत स्तदुतद्ब्रवामः । यथाह्येकस्माग्नेप्रदीपसहस्राणितल्यश्चतीनिनिर्गच्छन्ति । एवंपरमात्मन इमेजीवाव्यच्चरन्ति । आभ्याऽऋग्भिकाभ्यांगृहस्थानामेवमुक्तिर्दर्शिताभवति तेषांहिभूयांसउपायाःयज्ञादयः ॥ १२ ॥ इतउत्तरंऋतिसृभिः ऋग्भि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

काभि मेंधायाचते ओश्चचउर्ण्या । सदसस्पतिम् सदसस्पतिर्देवता सदोयज्ञगृहं तस्यपतिःतम् । अद्भुतंमहान्त मचिन्त्यशक्तिम् । प्रियमिन्द्रस्य । काम्यङ्कामसंपत्करम् कमनीयंवा धनमेधार्थिनः । सनिध्यनंमेधाम् अयासिषम् याचेःहिकर्मोचायंधातुः ॥ १३ ॥ याम्मेधाम् तिस्रोनुष्टुभ-आग्नेयौ । यांमेधां देवगणाःपितरश्च उपासतेपूजयन्ति । तयामाम् अद्यमेधया हेअग्ने मेधाङ्गुंतम्प्रियमिन्द्रंस्यकाम्यंम् ॥ सुनिम्मेधामंयासिषुंस्वाहां ॥ १३ ॥ याम्मेधाम् ॥ याम्मेधान्देवगुणाः पितरश्चोपासंते ॥ तयामामुद्य मेधयाग्नेंमेधाविंनङ्कुरुस्वाहां ॥ १४ ॥ मेधाम्मे ॥ मेधाम्मेव्वरुंणोद दातुमेधामुग्निःप्रुजापंतिः ॥ मेधामिन्द्रंश्चव्वायुश्चंमेधान्धातादंदा तुमेस्वाहां ॥ १५ ॥ इदम्मे ॥ इदम्मेव्ब्रह्मंचक्षुत्रञ्चोभेश्रियंमश्नु

विनंकुरु स्वाहासुङ्गतमस्तु ॥ १४ ॥ मेधांमे । लिङ्गोक्तदेवता । मेधाम् मेमह्यं वरुणोददातु । मेधांचाग्निः प्रजापतिश्च । मेधांच इन्द्रश्चवायुश्च । मेधांचधातादददातु मेमह्याम् स्वाहासुङ्गतमस्तु ॥ १५ ॥ इदंमे । ओक्तक् । इदंब्रह्मचक्षत्रञ्च उभेश्रोत्रञ्चत्रयियम्अश्नुताम् मदीयां-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रियमुपजीवताम् । मयिच देवाः दधतु त्वापयंतु श्रियम् उत्तमाम् यथाहं सर्वजनभोग्यो भवामि । तस्यैतेस्वाहा । यात्वमेवं सर्वजनैरभिलष्यसे तस्यैश्रियै तेतुभ्यं स्वाहासुहुतमस्तु । अप्राप्यच मेधांश्रियंच नयज्ञाःसिध्यन्तीत्येषसंबन्धः ॥ १६ ॥

इतिउव्वटकृतौमंत्रभाष्ये द्वात्रिंशत्तमोध्यायः ॥ ३२ ॥

ताम् ॥ मयिंदेवादधतुश्रियमुत्तमान्तस्यैतेस्वाहा ॥ १६॥[६]॥ २ ॥

इतिसंहितायांद्वात्रिंशोऽध्यायः ॥ ३२ ॥

* अस्याजरासः ॥ अस्याजरासोदुमामुरित्वांऽअर्चन्त्वंमासोऽ

(१) इतउत्तरं सप्तदशकाः पुरोरुग्गाना अग्निष्टुदग्नेरध्यायेपठ्यन्ते । तत्रसार्वमेधिकानां चतुर्णामृचांचत्वार आद्याःपुरोरुच इत्येवमेतेविदुः । यथास्याग्निष्टुदग्नि ष्टोमः प्रथममहर्भवति तस्याग्नेयाग्रहाभवन्ति आग्नेयाःपुरोरुचइति । एवमिन्द्रस्तुत्थो द्वितीयमहर्भवन्ति ऐन्द्र्यःपुरोरुचः । सूर्य-

(१ सर्वमेधेऽग्निष्टोमसंस्थेऽग्निष्टुत्संज्ञे प्रथमेऽहनि अस्याजरास इत्याद्या महो अग्ने इत्यन्ताःसप्तदश ऋचोऽग्निदेवताः पुरोरुचोभवन्ति । पुरोरुक्शब्देन ऋग्रूपा ग्रहणमन्त्रा उच्यन्ते न यजूरूपाः ऋगधि पुरोरुगिति श्रुतेः ।

* अस्याजरासः सप्तदशापश्चिन्नुद्वादशविभ्राट्चतुर्दशप्रवाहजएकादशप्रवायु प्रवोरयाषट्चदशकावानस्त्रयोदशसप्तसप्तनवतिः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तदुत्थ्यस्तृतीयमहर्भवति तस्यसौर्यागृहाभवन्ति सौर्य्यःपुरोरुचः । वैश्वदेवश्चतुर्थमहर्भवति तस्य वैश्वदेवागृहाभवन्तिविश्वदेव्यःपुरोरुचइति । यएतस्त्रयोनुवाका अनारभ्याधीताः । एताश्चपुरोरुचो यच्छन्दस्काः प्रकृतिदृष्टा स्तच्छन्दस्का इहापिप्राधेदृश्यन्तेऽन्त्यमनुवाकंवर्जयित्वा । अस्याजरासः । ऐन्द्रवायवस्य हेपुरोरुचौ । अस्ययजमानस्य अजरासःजरारहिताः । दमांग्रहाणाम् अरित्राःअरणाः । नावामिवकेनिपाताः । यद्वादमांदमनीयानां रज्ञसाम्अरणास्तारकाः

अग्नयः पावकाः ॥ श्वितीचयः श्वाचासोभुरण्यवोव्वनुर्षदोव्वा यवोनसोमाः ॥ १ ॥ हरयोधूमकेतवः ॥ हरयोधूमकेतवोव्वातंजू

अर्चद्धूमासः अर्चन्पूजनीयोधूमोयेषांतेअर्चद्धूमासः । पूज्यधूमाः पावकाःपावयितारश्च अग्नयोभवन्तु । अस्यचे श्वितीचयः श्वेतत्वप्रचयकारिणः । श्वाचासःश्वाचशब्दःक्षिप्रवचनः क्षिप्रकर्माणः । भुरण्यवःभर्तारः वनसदःरेफउपजनः । वनमुदकन्तत्रसन्नाउदकाभिषुताइत्यर्थः । वायवोन वायवइवोद्दीपयितारः गृहेरज्ञमाणाः सोमाःसन्तु । यद्वा सर्वाण्यरण्यग्निविशेषणानि । श्वितीचयः श्वेतत्वमंचनाः । वायवइवश्वाचासः क्षिप्रगमनाः । वनर्षदोवनसदः । * वनसदोवेटोरेफेणेतिप्रातिशाख्यसूत्रेणरेफागमः । सोमाइवयजमानेष्टदाः । समानमितरत् ॥ १ ॥ हरयोधूमकेतवः ।

* वनसदोऽवेटोरेफेण ॥ वनशब्दःसदशब्दे प्रत्ययेरेफेणव्यवधीयतेसचेद्वनशब्दोवेट शब्दास्परोनभवति प्रा०अ०३ । सू० ४९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

येऽग्नयः हरयोहरितवर्णाः । धूमकेतवः धूमप्रज्ञानाः । वातजूतावातगमनाः । उपद्यविद्यु-लोकेप्रति । यतन्तेयत्नमाचरन्ति । वृथक् । पृथगितिप्राप्ते वर्णव्याप्तिः । पृथक्नाना । ताम् स्तुमइतिशेषः ॥ २ ॥ यजानः । मैत्रावरुणीगायत्री । यजनःअस्माकम् मित्रावरुणामित्रावरुणौ । यजचदेवान् यजच ऋतंयज्ञम् बृहत्माहान्तम् । हेअग्ने यत्त्वियजच स्वन्दमंस्वकीयंगृहम् ॥३॥

ताऽउपद्यविं ॥ यतंन्तेव्वृथंगुग्नयंः ॥ २ ॥ यजांनः ॥ यजांनोमित्रा व्वरुंणायजांदेवाꣳ ॥ ऋतम्बृहत् ॥ अग्नेयत्त्वंस्वन्दमंम् ॥ ३ ॥ युक्त्वाहि ॥ देंवृहतंमाꣳ ॥ ऽअश्व्यवांꣳ ॥ ऽअग्नेरुथीरिंव ॥ निहोतांपुर्व्व्यः सदः ॥ ४ ॥ द्वेव्विरूपे ॥ चरतः स्वर्थेंऽअन्न्या

अथाश्विनस्य । युक्त्वाहीतिव्याख्यातम् ॥ ४ ॥ द्वे विरूपे । विष्टुप् शुक्रस्य । द्वे रात्र्यहनीविरूपे नानारूपे । कृष्णारात्रिशुक्लमहः चरतःआदित्येन सहाहश्चरति इतरत्वग्निनातुरात्रिः । स्वर्थे-शोभनार्थे । अन्न्यान्या वत्समुपधापयेते । अन्न्याएकारात्रिः एकमग्निरूपं वत्सम् अन्न्याएकमहः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एकमादित्यरूपं वत्सम्उपधापयेते । रात्रिरग्निदेवत्यमग्निहोत्रम् अहःसूर्यदेवत्यमग्निहोत्रं वत्स-
मित्याशयः । किञ्च हरिर्हरितवर्णोग्निः अन्यस्यांरात्रौ स्वधावान् अन्नवानुपभोग्यः तापपाक-
प्रकाशैर्भवति । शुक्रःशुक्लवर्णआदित्यः अन्यस्यामहनि दृदृशेदृश्यते सुवर्चाःसुतेजाः । यद्वा
द्यावापृथिव्यौ [illegible]रूपेनानारूपे परस्परापेक्षयाचरतः स्वर्थेकल्याणप्रयोजने अन्यापृथिवी अग्नि-

न्न्यांवत्समुपधापयेते ॥ हरिरन्न्यस्यांभवतिस्वधावांञ्छुक्रोऽअन्न्य
स्यांन्दृदृशेसुव्वर्चांः ॥ ५ ॥ शतम् ॥ १७०० ॥ अयमिह ॥ प्रथमोधा
यिधातृभिर्होतायजिष्ठोऽअद्ध्वरेष्वीड्यः ॥ यमप्नवानोभृगवोविरु
रुचुर्व्वनेषुचित्रंविभ्वंविशेविशे ॥ ६ ॥ चीणिशता ॥ त्रीसहस्रा

वत्सम अन्याद्यौरादित्यंवत्सम उपधापयेतेपोषयतः । किञ्चहरिरग्निः अन्यस्यांपृथिव्यांस्वधावान्
भवति । शुक्रआदित्यश्च अन्यस्यान्दविदृश्येसुवर्चाःदृश्यतेसुतेजः ॥ ५ ॥ मन्थिनः अयमिहेति
व्याख्यातम् ॥ ६ ॥ वैश्वदेवंगृह्णाति । चीणिशतानीति त्रीणिशतानि त्रीणिसहस्राणि । त्रिंशत्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नवच। देवाःअसपर्यन्। सपर्यतिःपरिचरणकर्मा परिचरितवन्तः कथमितिचेत्। औक्षन्घृ-
तैरसिञ्चन् अग्निमाज्यैः। अस्तृणन्बर्हिश्च अस्मैअग्नये। आत् इत् अथ एव अनन्तरमेव। होता-
रंवृत्वा न्यसादयन्त। नितरांविनियुक्तवन्तः ॥ ७ ॥ अथध्रुवस्य। मूर्द्धानन्दिव इतिव्याख्या-

ण्यग्निन्नि॒ꣳस्रक्षं॑देवानवं॑चासपर्य्यन् ॥ औक्षं॑न्घृ॒तैरस्तृ॑णन्ब॒र्हिर॑
स्मा॒ऽआदिद्धो॒तार॑न्न्यसादयन्त ॥ ७ ॥ मू॒र्द्धान॑न्दि॒वः ॥ मू॒र्द्धान॑
न्दि॒वोऽअ॑र॒तिम्पृ॑थि॒व्याव्वै॑श्वान॒रमृ॑त॒ऽआजा॒तम॒ग्निम् ॥ क॒विꣳस॒
म्राज॑मतिथि॒ञ्जना॑नामा॒सन्नापा॑त॒ञ्जन॑यन्त॒देवाः॑ ॥ ८ ॥ अ॒ग्निर्व्वृ॑

तम् ॥ ८ ॥ ऐन्द्राग्नस्य। अग्निर्वृत्राणि गायत्री। अग्निःवृत्राणि यजमानस्य व्रजिनानि।
जंहनत् अत्यर्थंहन्ति। किंभूतःवृविणस्युः धनंहविर्लक्षणमिच्छन्। केनहेतुनाजंहनत् विपन्यया।
विपनिरर्चतिकर्मा यजमानपूजया निमित्तभूतया। पुनःकिंभूतोग्निः समिद्धःदीप्तः शुक्रःशुक्लः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आहुत:अभिहुत: सन् ॥ ९ ॥ वैश्वदेवस्य । विश्वेभि:सोम्यम् गायत्री । विश्वेभि:देवै:सह । सोमसंबन्धिमधु हेअग्ने इन्द्रेणचसहवायुनाचसह पिव । मित्रस्यधामभिर्न्नामभि: स्तुत:सन् । तदुक्तम् त्वमग्ने वरुणोजायसे यस्त्वमित्रोभवसि दस्मईड्यइति ॥ १० ॥ आयत् । द्वाभ्यांम-रुत्वतीयाभ्याम् द्वे त्रिष्टुभौ । व्यवहितपदप्राय: आहुतिपरिणाम वादिन्यौ । आउपसर्ग:

त्त्राणिं ॥ जङ्घनद्भविणस्युर्व्विंपुन्न्यया ॥ समिंद्धःशुक्रऽआहुतः ॥ ९ ॥ व्विप्रश्रवेंभिः सोम्यम् ॥ व्विप्रश्रवेंभिः सोम्यम्मदृध्वग्नऽइन्द्रेणव्वा युना ॥ पिबांमित्वस्यधामंभिः ॥ १० ॥ आयत् ॥ आयदिषेनृपति न्तेजऽआनट्शुचिरेतोनिषिंक्तुन्द्यौरभीकें ॥ अग्निः शर्द्धमनवद्यं

आनट्इत्यनेनाख्यातेन संबध्यते । यत्यदा इषेअन्नाय निषिक्तंनितरांसिक्तंदेवतोद्देशेनचिप्तम् शुचिमंत्रै:संस्कृतम् तेज:जगदुत्पत्तिबीजम् । नृपतिमग्निम् आआनट् अश्नोतेरेतद्रूपम् व्याप्नोति । ततोपिरेतोमध्यस्थानंव्याप्नोति विद्युल्लक्षणंतेज: । द्यौरभीके । द्यौरपितस्या-हुतिपरिणामभूतस्यरसस्य अभीकेनिकटएववर्त्तते । तत्अग्नि:शर्द्धम् शर्द्धंबलंतस्यहेतुभूतम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अनवद्यं प्रशस्यम् युवानम्परिपक्वंरसम् स्वाध्यंसुष्ठुध्यानीयम् । सर्वोपिहृष्टिमभिलषति । जनयत्जनयति अष्टभिर्मासैः । सूदयच्च । षूदक्षरणे । निष्पन्नमुदकंचतुर्भिर्मासैः क्षरतिच दृष्टिद्वारेण ॥ ११ ॥ अग्नेशर्द्ध । हेभगवन्नग्ने शर्द्धउत्सहस्बलमाविष्कृधि । महतेसौभगाय । महत्सौभाग्यंलोकस्थितिः । एवंकुर्वतस्तवद्युम्नानि उत्तमानिसन्तु । द्युम्नंदीप्ततेर्यशोन्नंवा ।

युवानꣳस्वाद्मानꣳजनयत्सूदयꣳच ॥ ११ ॥ अग्नेशर्द्धं ॥ महतेसौभगा
युतवद्युम्मान्युत्तमानिसन्तु ॥ सञ्जास्पत्यꣳसुयममाकृणुष्वशत्रू
युतामभि * तिष्ठा महाꣳसि ॥ १२ ॥ त्वाꣳहि ॥ मन्द्रतममर्कशोकै

हविर्लक्षणानिधनानि सन्तुयशांसिवा । किञ्च एतच्चत्वंप्रार्थ्यसे । संजास्पत्यम् । जायापतिमितिप्राप्ते आकारयकारयोर्लोपः सुक्च । सुयमंसुनियमंअन्योन्यवद्वरागम् समाकृणुष्वकुरुष्व । शत्रुयतांशत्रुत्वमिच्छताम् । अभितिष्ठपद्भ्यामभिभव । महांसिमहत्वानि ॥ १२ ॥ त्वाꣳहि । माहेन्द्रस्य । त्रिष्टुप् । त्वांहित्वामेव मन्द्रतमंमन्दनीयतमं मृदुहृदयंवा । अर्कशोकैः मंत्रैर्दीप्तैः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यथोक्तस्थानकर्णानुप्रदानवह्निः । देवतादात्मवित्तन सन्तानगर्भगुरुसुश्रूषाधिगताविप्लावित ब्रह्म चर्यैः । एवंहि मंत्रादीप्ताःस्युः । वदृमहे वृतवन्तोवयम् । त्वंचवृतःसन् महिमहत्स्तोत्रम् नोस्माकम् श्रोषिश्रृणोषि । श्रुत्वाचप्रभावयसि कर्महेअग्ने । किञ्च इत्थंनामत्वं महतीदेवता । येनइन्द्रन्न । उपमार्थीयोनकारः । इन्द्रमिव त्वाशवसावलकृत्या पृणन्तिपूरयन्ति । वायुमिवचपूरयन्ति राधसाहविर्लक्षणेन धनेननृतमाः मनुष्यतमाः मनुष्यश्रेष्ठाः ।। १३ ।। त्वेअग्ने आदि

व्वँवृमहेमहिंनुꣳ श्रोष्य्यंग्ने ॥ इन्द्रन्नत्वाशवंसादेवतांव्वायुम्पृणन्ति राधंसान्नृतंमाꣳ ॥ १३ ॥ त्वेऽअग्ने ॥ स्वाहुतप्प्रियासꣳ सन्तुसूर्य्यꣳ ॥ येन्तारोयेमघवांनोजनांनामूर्व्वान्दयंन्तुगोनांम् ॥ १४ ॥ श्रुधिश्रुंत्कर्ण्ण ॥

त्वग्रहस्य । धृत्यौ । त्वेतव हेअग्ने । स्वाहुत । साधुनाप्रक्रारेणाभिहुत । प्रियासः । प्रियाः सन्तु सूरयःपण्डिताः । येचयन्तारः निगूहितसर्वविषयाः । येचमघवानः धनवन्तः । जनानांमध्ये । नकेवलं धनवन्तएव किन्तर्हि । ऊर्वान्अन्नप्रकारान् दयन्त । दयतिर्दानार्थः । ददति । गोनाम्गवामितिप्राप्ते गोःपादान्तइतिनुट । गवांसंबन्धिभिरुपसेचनैःसहितान् ।। १४ ।।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रुधिश्रुत्कर्ण । हेअग्ने श्रुधिशृणु । पृक्षतदृत्यादिनाधिभावः । सत्त्वरंयज्ञमाग्नेयम् । हेश्रुत्कर्ण । शृणुतःकर्णावर्थिनां वचांसि यस्यसतथोक्तः । त्वयिस्तुतवति । वह्निभिःवोढृभिर्देवैः । सयावभिः । याप्रापणेवनिप् । समानप्राप्तिभिः । सहिताः । आसीदन्तु बर्हिषि । मित्रःअर्यमाच । अन्येचप्रातर्यावाणः । प्रातरेव हविःप्राप्तिर्येषांतेतथोक्ताः ॥ १५ ॥ विश्वेषामदितिः ।

श्रुधिश्श्रुत्कर्णव्वह्निभिर्हवैरग्नेसयावभिः ॥ आसीदन्तुबर्हिषिं मित्रोऽअर्य्यमाप्प्रातर्य्यावाणोऽअद्ध्वरम् ॥ १५ ॥ व्विश्वेषामदितिः ॥ व्विश्वेषामदितिर्य्यज्ञियानांव्विश्वेषामतिथिर्म्मानुषा

आदित्यग्रहे दधिश्रयणमंत्रः । अयमपि पुरोरुचां मध्येगण्यते । तथाहि । कदाचनस्तरीरसि । कदाचनप्रयुच्छसि । यज्ञोदेवानामिति तिसृणामादित्येभ्यस्त्वेत्यनुषङ्गः । त्रिष्टुप् । योग्निःविश्वेषाम् अदितिःअदीनः । यज्ञियनाम् । यज्ञसंपादकानाम् । विश्वेषांचअतिथिः मानुषाणाम् अग्निहोत्रिणाम् । सोग्निःदेवानामवः अन्नंहविर्लक्षणम् आवृणानःसमर्पयन् । सुस-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ङीकोभवतुजातवेदाःजातप्रज्ञानः ॥ १६ ॥ महोअग्नेः । सावित्रस्य । त्रिष्टुप् । महःमहतः अग्नेःसमिधानस्यसंदीप्यमानस्य । शर्मणिशरणेआश्रयेवर्तमानाः अनागाःअनपराधाःस्याम । येनचमित्रेवरुणे अनपराधाएवस्याम । स्वस्तयेअविनाशाय । येनच श्रेष्ठेस्यामसवितुः । सवीमनि । प्रसवे । तत्देवानां संबन्धि अवःहविर्लक्षणमन्नम् । अद्य । आवृणीमहे । अभिसंस्कुर्मः ॥ १७ ॥

णाम् ॥ अग्निर्हि वानामवंऽआवृणान?ंसुसृङीकोभंवतुजातवेदाऽ॥१६॥ महोऽअग्नेः ॥ समिधानस्यशर्म्मण्यनागांमित्रेवरुणेस्वस्तये ॥ श्रेष्ठेस्यामसवितुः सवीमनितहेवानामवोऽअद्यावृणीमहे ॥१७॥ [१७] आपंप्रिच्चत्। आपंप्रिच्चत्पिप्युस्तुर्य्योनगावोनक्षंन्नृतञ्जरितारंस्त

इदानीमिन्द्रस्तुतिः । उथसंस्त्थे द्वितीयेहनि पुरोरुचऐन्द्र्योद्वादश ॥ आपश्चित् । त्रिष्टुप् । आपोपि । पिप्युःप्यायःपी आदेशः । प्याययेयुः निग्राह्यसोमे । स्तर्योनगावः । सुन्वन्ति-अभिषुण्वन्ति याभिर्वाग्भिः सोमन्तास्तर्य्यः । सोमाभिषवेहि त्रयीलक्षणावाचोव्याप्रियन्ते । तदे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तदुक्तम् । तर्यानगावः तर्यइवगावः नक्षन्नृतंजरितारस्तइन्द्र । नक्षम् नक्षतिर्व्याप्तिकर्मणएवमनेन-प्रकारेण नक्षन्व्याप्नुवन्ति ऋतंयज्ञम् । जरितारःस्तोतारः तेतव हेइन्द्र । एतच्चज्ञात्वा । वाहिवा-युर्ननियुतोनोअच्छ । अच्छअभियाहि । आयाहि नःअस्मान् वायुर्ननियुतः वायुर्यथानियुतः अश्वा-न्याति । त्वंहि । हियस्मात् । पुनस्त्वमेवमुच्यसे । यस्त्वंधीभिः स्वकीयाभिबुद्धिभिः दयसे-ददासि । विविधंवाजान्अन्नानि ॥ १८ ॥ गावउप । तिस्रोगायत्र्यः । दक्षिणालक्षणागावउच्यन्ते ।

ऽइन्द्र ॥ यावहिव्वायुर्न्ननियुतोनोऽअच्छात्वंहिधीभिर्दयसेव्विवा
जान्॥ १८॥ गावुऽउपा। गावुऽउपावतावतम्मुहीयुज्जस्यंरुप्सुदा॥
उभाकर्णाहिरण्ययां ॥ १९ ॥ यदद्य ॥ सूरुऽउदितेनागामित्रोऽ

हेगावः उपावतउपगच्छत दक्षिणामार्गेणअवतंप्रति । अवतमितिकूपनाम । सचात्रचत्वाल तदन्तरे-णहि गवांसंचारः। कोहेतुरागमन इतिचेत्। महीयज्ञस्यरुप्सुदा। महीमहत्यःयज्ञस्यरुप्सुदा दानंवर्तते। यतस्त्रभवतीनाम् उभौकर्णौहिरण्मयौक्रतौ । दानार्थमेव अतउपावतेतिसंबन्धः ॥ १९ ॥ यदद्य । यत्कर्मअद्यअस्मिन्द्यवि सूरेउदिते उद्गतेअनागाः अनपराधोमित्रः सुवातिप्रसौति तत्कर्मप्रयादिति-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शेषः। एवमर्यम्णः सवितुर्भगस्यच वाक्यानिअविशेषात् ॥ २० ॥ आसुते। तृतीयःपादः प्रथमंव्याख्यायते। यंसोमम् रसानदीरसतेः शब्दकर्मणः। दधीतधारयति नद्युपकण्ठेहि सोमोजायते। वृषभंवर्षितारम् आसुतेसिञ्चत आसिञ्चत ग्रहपात्रेषुचमसेषु सोमंहैऋत्विजः। सुतेअभिषुतेसति सोमे। कथंभूतम् श्रियम् श्रियोहेतुभूतम्। रोदस्योरभिश्रियम् द्यावापृथिव्योरधि-

अर्य्यमा ॥ सुवातिंसविताभगंः ॥ २० ॥ आसुतेसिंञ्चतुश्रियुं रोदस्योरभिश्रियंम् ॥ रसादंधीतव्वृषभम् ॥ तम्प्रत्क्रथायंव्वेनः ॥ २१ ॥ आतिष्ठंन्तम्परिं ॥ आतिष्ठंन्तम्परिविश्वेंऽअभूषञ्छ्रियोव्वसांन

गतश्रियम् ब्रह्माण्डव्यापिनीहिसोमश्रीः तम्प्रत्नथायंवेनः इतिद्वे प्रतीकेउक्ते ॥२१॥ आतिष्ठन्तम्। त्रिष्टुप्। इन्द्रस्यावहृष्टिकर्मोच्यते ग्रीष्मान्तेमध्यमस्थाने आतिष्ठन्तम् इन्द्रम्पर्य्यभूषन् परिरचितवन्तः विश्वेसर्वेदेवा मध्यमकादेवगणाः। श्रियोवसानश्चरतिस्वरोचिः सतुमध्यमस्थानः सर्वेषांदेवगणानांश्रियः आच्छादयन् स्वेच्छयाचरति। स्वरोचिःअपराधीनदीप्तिः तृतीयःपादश्चतुर्था-

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्तेव्याख्यायते तच्छब्दयोगात्। अविश्वरूपो अमृतानितस्थौ। यत् आतस्थौविश्वरूपः इन्द्रः अमृतानि उदकानि उदकेषु पातयितव्येषु। महत् ततृष्णःवर्षितुः असुरसाप्रज्ञानवतः नाम। नमनम्रीभावः॥ २२॥ प्रवः। त्रिष्टुप्। हैक्षत्विजः। प्रार्च। प्रार्चत। वःयूयम् स्तुतीः। महे इन्द्रविशेषणमेतत्। महते। अन्धसःअन्नस्य दात्रे इतिवाक्यशेषः। मन्दमानायस्तूयमानाय मोदमानाप्रच्चरतिस्वरोचिः॥ महत्ततृष्णोऽअसुरस्यनामाविश्वरूपोऽअमृतानितस्थौ॥ २२॥ प्रवः॥ प्रवोमहेमन्दमानायान्धसोर्चाविश्वानरायविश्वाभुवे॥ इन्द्रस्यायस्यसुमखꣳसहोमहिप्रयोनृम्णञ्च रोदसीसपर्य्यतः॥ २३॥ बृहन्नित्॥ बृहन्निदिध्मऽएषाम्भूरि

यवा। विश्वानरायसर्वभूताय। विश्वाभुवेसर्वव्यापिने किञ्च। इन्द्रस्यायस्य सुमखंसाधुयज्ञम्। सहःबलं च महिमहच्चश्रवः श्रवणीयञ्च यशः। नृम्णञ्चधनञ्च नृन्नमयतीतिनृम्णम्। रोदसीद्यावापृथिव्यौ सपर्यतः परिचर्यतः। तस्यचेन्द्रस्य प्रार्चतस्तुतीरित्यनुषङ्गः॥ २३॥ बृहन्नित्। द्वेगायत्र्यौ अन्त्यःपादः प्रथमंव्याख्यायते यच्छब्दयो गात्। येषामिन्द्रो युवा सर्वकर्मसुदक्षः सखा। तेषा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मेषां यजमानानाम् ब्रह्मन्नित् महानेवद्ध्मःभवति। महत्वञ्च साधनानां साधयोत्कर्षंकुर्वताम्भवति। भूरिशस्तम्भवति। पृथुश्चस्वरुः भवति। यज्ञानांवा भूयोभूयः करणमेवाभिप्रेतस्यात् ॥ २४ ॥ इन्द्रेहि। हेइन्द्र आद्रहिआगच्छ। एत्यच मत्सिलट्प्रिंकुरु अन्धसःअधग्रानीयस्य सोमलक्षणस्यान्नस्य स्वेनांशेन। ततोपिविश्वेभिः सर्वैःसोमपर्वभिः सोमयागकालैर्निमित्तभूतैः। आ-

शुस्तम्पृशुः स्वरुः ॥ येषामिन्द्रोयुवासखा ॥ २४ ॥ इन्द्रेहि ॥ इन्द्रेहिमत्स्यन्धसोविश्वेभिः सोमपर्व्वभिः ॥ महाँ ॥ ऽआभिष्टिठरो जंसा ॥ २५ ॥ इन्द्रोव्वृचम् ॥ इन्द्रोव्वृचमंवृणोच्छर्द्धनीतिःप्रमायिनाम

इहि यद्वा सर्वसवनगतैः सोमांशुभिःनिमित्तभूतैः। कस्मात्पुनस्त्वमेवमस्माभिः प्रार्थ्यसेइत्यत आह। यतोमहानसि अभिष्टिश्च। अभ्येषणशीलश्च शत्रूणामभियष्टव्योवा। ओजसास्वकीयेन बलेन ॥ २५ ॥ इन्द्रोव्वृचम्। विष्टुभौयइन्द्रः वृचंयुद्धायआवृणोत्शर्द्धनीतिः। शर्द्धइतिबलनाम। शर्द्धेचतुरङ्गबलेनीतिर्यस्यसतथोक्तः। प्रमायिनाममिनात्। यश्च मायिनांमायाविनां

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रममिनात् । मीङ्हिंसायाम् । हिनस्ति । यश्चवर्षणीतिः । वर्षदृतिरूपनाम । रूपसन्नद्धः स्वेच्छारूपविजृम्भकः । यश्च अहन् हन्ति । व्यसंनिरसंसंधिसंवन्धिनंमायिनम् । उशधक् । वशकान्तावस्यकृतसंप्रसारणस्यैतद्रूपम् । दहतेरुत्तरं कृतभष्भावस्य । अथकोर्थः शत्रुत्वंकामयमानान् दहतिवनेष्वपिवर्तमान् । आविर्धेनाअक्षणोद्राम्याणाम् । सद्रुन्द्रः अविःप्रकटम् । धेनाः

मिनाह्यर्पणीतिः ॥ अहन्व्यृ६समुशधुग्गवनेष्वाविर्ह्धेनाऽअक्षणोह्रा म्याणाम् ॥ २६ ॥ कुतस्त्वम् ॥ कुतस्त्वमिन्द्रमाहिनुः सन्नेकोया सिसत्पतेकिन्ताऽउत्था ॥ सम्पृच्छसेसमराणः शुभानैर्वोचेस्तन्नोहरि

स्तुतीः दृत्थंशत्रून्हन्ति दृत्थमपरिमितं धनंददातीति । अवश्यंचरमयितव्यानांयायजूकानाम् ॥ २६ ॥ कुतस्त्वम् । इन्द्रमरुत्संवादे मरुतामेतद्वाक्यम् । हेइन्द्र त्वम्कुतः कस्माद्धेतोः माहिनः महनीयः सर्वस्यपूज्यःसन् शत्रून् एकःअसहायः यासि । हेसत्पते । श्रुतिस्मृत्यनुष्ठानरतानां पालयितः । किन्तदुत्थाकिञ्च तेतवदुत्थंभूतम्प्रयोजनमस्ति येनैकाकीयासि ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

संपृच्छसेसमराणः संगच्छमानः शुभानैः शोभनैःवचोभिः संपृच्छसेकतमःपन्थाइति हेहरिवः हरिवन्तत्कारणं नःअस्माकं वोचेःब्रूयाः । यत्तेअस्मे । यत्त्र्याद्वत्तिकारणं तेतव अस्मे अस्मासुवर्त्ततइति ॥ महाँ २ इन्द्रोयओजसा । कदाचनस्तरीरसि । कदाचनप्रयुच्छसि । इतितिस्रः प्रकृताःप्रतीकोक्ताः ॥ २७ ॥ आतत् । त्रिष्टुप् । आङुपसर्गः पनन्तेत्याख्यातेनसंबध्यते । आपनन्त ।

रिवोयत्तेऽअस्मे ॥ महाꣳ२ ॥ ऽइन्द्रोयऽओजसाकदाचनस्तरीरसि कदाचनप्रयुंच्छसि ॥ २७ ॥ आतत्तेऽइन्द्रायवः पनन्ताभियऽऊर्व्वङ्गोमन्तन्तित्तृत्सान् ॥ सक्तत्स्वंय्येपुरुपुत्चाम्महीꣳसुहस्रंधाराम्बृह

पनतिःपूजाकर्मापूजयन्ति ह्वबधादिकम् तेतव संबन्धिकर्महेइन्द्र आयवः मनुष्याःयजमानाः । कथंभूताआयवः अभितित्रत्सान् । त्रत्सदतिर्हिंसाकर्मा । येअभितर्दितुंहिंसितुमिच्छन्ति । किमित्यतआह । ऊर्वम् अन्नंसोमलक्षणम् । गोमन्तम् उदकवन्तम् । निग्राभ्याभिः सोमोभिषूयते । येपिउदकवन्तं सोममभिषुण्वन्ति तेपिपूजयन्तीत्यर्थः । किंच । सक्तत्स्वम् । एकवारमे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वप्रसूयतेयागोहिरण्यधान्यादिभिः सासक्तत्सूस्तांसक्तत्स्वम् । येयजमानाः । पुरुपुत्रांवहुपुत्राम् । सर्वेएवपदार्थाः पृथिवीतउत्पद्यन्ते । महींभूमिम् । सहस्रधाराम् । अनन्तभोगप्रदायिनीम् । वहुधाप्राणिजातं धारयन्तींवा । वृहतीम्महतीम् । दुदुक्षन् दोग्धुमिच्छन्ति । भूमिदानंसर्वमेधयाजिनश्चोद्यते तदभिप्रायमेतत् । येच सोमाभिषवं कुर्वन्ति नेचपृथिवींददति तेत्वांपूजयन्ति नान्येदुर्मेधसइति ॥ २८ ॥ इमान्ते । हेइन्द्र इमांतेतवधियंस्तुतिंप्रभरेप्रहरामि

हुतीन्दुदुक्षन् ॥ २८ ॥ इमान्ते ॥ इमान्तेधियम्प्रभरेमहोमहीम्स्य

स्तोत्रेधिषणायत्तऽआनजे ॥ तमुत्सवेचप्रसवेचसासहिमिन्द्रन्देवा

शवसामदन्ननु । शवसावलेन अन्वमदन् अभिष्टु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वन्ति । पूर्वोर्द्वचःप्रत्यक्षकृतः उत्तरस्तुपरोक्षकृतः अतोवाक्यभेदेनव्याख्यानम् ॥ २९ ॥ विभ्राट्बृहत् । जगतीसूर्यस्तुतिः द्वितीयेहनिग्रहाणांपुरोरुचः । द्वितीयोर्द्वचः प्रथमंव्याख्यायते यच्छब्दयोगात् । यःवातजूतः वातप्रेरितः वातोयस्यवोढेत्यभिप्रायः । अभिरक्षतित्मनाआत्मनैवजगत् । मन्त्रे-ष्वादेरात्मन इत्याकारलोपः । यश्चप्रजाःपुपोषपोषयतिशीतोष्णवर्षैः । यश्चपुरुधाविराजति । बहु-

सुऽश्रवंसामदुन्नुं ॥ २९ ॥ [१२] विभ्राड्बृहत् ॥ विभ्राड्बृह
तिपिंबतुसोम्यम्मधुऽध्वायुर्दधद्यज्ञपंतावविंक्रुतम् ॥ व्वातंजूतोयोऽअ
भिरक्षंतित्मनांप्रजाः पुपोषपुरुधाविरांजति ॥ ३० ॥ उदुत्यम् ॥
उदुत्यञ्जातवेदसन्देवंव्वंहन्तिकेतवः ॥ दृशेव्विश्वायसूर्य्यम् ॥ ३१ ॥

धाचदीप्यति अग्निविद्युन्नक्षत्रादिरूपैः । सविभट् विविधंभ्राजतेऽतिविभ्राट्सूर्यः । बृहत्म-हत् पिबतुसोम्यंसोममयंमधु । किंकुर्वन् । आयुःजीवनम् दधत्स्थापयन् यज्ञपतौयजमाने । अविक्रुतमअनवखण्डितम् । ह्रृकौटिल्ये । क्रुहृश्छन्दसीतिक्रुआदेशः । ३० ॥ उदुत्यमितिव्या-ख्यातम् ॥ ३१ ॥ येनापावक । इगायत्र्यौसर्वेऽग्नेधाम्निश्चीयते । तेनरूपेण । आत्मानंसंपा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

द्याक्षिप्रं यजमानोमोक्षंप्राप्नोति । तदिहप्रार्थ्यते । येन हेपावकपावयितः । येन चक्षसादर्शनेन । भुरण्यन्तञ्जनान्अनु । शकुनिःक्षिप्रपाती भुरण्युरित्यभिधीयते । सर्वमेधयाजिनोजनान् अनुभुरण्यन्तम् पक्षिरूपेणात्मानं संगाद्यक्षिप्रंगच्छन्तमित्यर्थः । त्वंहेवरुण सूर्यपश्यसि । तदोध्याहारेणवाक्यपरिपूर्त्तिः । येनजनान्अनु भुरण्यतः पश्येति ॥ ३२ ॥ दैव्यावध्वर्यू । हेदैव्यावध्व-

येनांपावक ॥ येनांपावकुचक्षंसाभुरण्यन्तुज्जनाꣳ ॥ ऽअनु ॥ त्वंव्वं रुणपश्यंसि ॥ ३२ ॥ दैव्यांवद्ध्वर्य्यू ॥ दैव्यांवद्ध्वर्य्यूऽआगंतुꣳर थेंनसूर्य्यंत्वचा ॥ मद्ध्वांयज्ञꣳसमंञ्जाथे ॥ तम्प्रत्नथायंवेनश्चित्च न्देवानांम् ॥ ३३ ॥ आनंः ॥ आनऽइडाभिर्व्विदथेंसुशस्तिव्विश्वा

र्यूअध्वरस्यनेतारौ इहआगतम् आगच्छन्तम् आगमनंकुरुतम् । रथेनसूर्यत्वचा । सूर्यस्येवत्वक् यस्यसमूर्यत्वक् येनसूर्यत्वचा। मध्वामधुरयादुनाहविषासोमपुरोडाशेनदध्यादिना । यज्ञंसमञ्जाथे समाप्नुतिसाधुरूपं ममंजयन्तम् प्रभूतानिहवींषिकुरुत मित्यर्थः तंप्रत्नथायंवेनश्चित्च देवानामितितिस्रः प्रतीकाः ॥ ३३ ॥ आनः । त्रिष्टुप् । द्वितीयोर्द्वचः प्रथमंव्याख्यायते यच्छब्दयोगात् । अपि

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यथायेनप्रकारेण । हेदेवाः युवानःसर्वकर्मक्षमा अविपरिणामिनोवाः मत्सथमाद्यथत्प्रथनः अस्माकंगृहे । विश्वंजगदुद्वरामद्रुतिकृत्वा । अभिप्रित्वे अभिपतनकालेप्राप्ते । मनीषामनीषयेतिवि-भक्तिव्यत्ययः मनसद्रुच्छया । अपितथा तेनप्रकारेण माद्यतयथेष्टम् । नःअस्माकं विदथेयज्ञेद्रुडाभिः करणभूतैः । सुशस्ति अविभक्तिकोनिर्देशः । सुशस्तिभिश्च शोभनैःशंसमैश्च करणभूतैः । विश्वानरः आ-

नंरꣳ सवितादेवऽएंतु ॥ अपियथायुवानोमत्सथानोव्विश्वꣳजगंदभि पित्वेमनीषा ॥ ३४ ॥ यदद्य ॥ कच्चंवृचहन्नुदगाऽअभिसूर्य्य ॥ सर्व्वं न्तदिंन्द्रतेव्वशे ॥ ३५ ॥ तरणिंर्व्विश्वदर्शतꣳ ॥ तरणिंर्व्विश्वदर्श

एतुसविताच देवःआएतु ॥३४॥ यदद्य । हेगायत्रौ यत्अद्यकच्चकुत्रचित् यत् । हेवृत्रहन् वृत्रस्यपा-प्मनःशार्वरस्यतमसोहन्तः । त्वमुदगाअभि। अभ्युदगाः अभ्युदेषि हेसूर्य। तत्सर्वमेतत् हेइन्द्र ऐश्व-र्ययुक्ततेतव शेवर्त्तते । त्वमेवैक ईश्वरोनद्वितीयइत्यभिप्रायः ॥ ३५ ॥ तरणिर्विश्वदर्शतः यस्त्वंतरणिर सितूर्णोवर्तसे विश्वदर्शतः सर्वदर्शनीयश्चासि । ज्योतिष्कृत् ज्योतिषश्चकर्तासि हेसूर्य । तंत्वां-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रतितथाब्रूमः त्वमेवविश्वं सर्वम् आभासिदीपयसि । रोचनंदीप्तम् अग्निविद्युद्ग्रहतारकरूपन्त्व-दीयमेवैकंज्योतिः सर्वत्राभातीत्यर्थः ॥ ३६ ॥ तत्सूर्यस्य । द्वेविष्टुभौ तदेवसूर्यस्य देवत्वम् । तच्च-महित्वम्महाभाग्यम् तत्किमित्यतआह । मद्वाकर्तोर्वितंतं सञ्जभार मध्यामध्येदूत्यर्थः । कर्तोः कर्मणइत्यर्थः । मधेत्रयत्कर्मणाङ्क्रियमाणानां देवासुरमनुष्यसंबन्धिनां वितंतरश्मिजालं अहर्लक्षणम् सञ्जभार । अयमेवसंहरते नान्यएतत्तनितुं शक्नोतिनचोपसंहर्तुमित्यभिप्रायः । किञ्च यदाइत्

तोज्योतिष्कृदसिसूर्य्य ॥ विश्वमाभासिरोचनम् ॥ ३६ ॥ तत्सू र्य्यस्य ॥ देवत्वन्तन्महित्वम्मद्वाकर्त्तोर्व्वितंतꣳसञ्जभार ॥ यदेदयुक्तहरितः सधस्थादाद्रात्रीवासस्तनुतेसिमस्मै ॥ ३७ ॥ तन्मित्र

अयुक्त यदाप्रयुङ्क्तेआत्मनि आत्मसंस्थान्करोति हरितःहरितवर्णान् रश्मीन् । तेह्यस्तमनकाले लोहितांयन्ति सधस्थात्सहस्थानादाहृत्य द्यथिव्यादिलोकत्रयं तेषांसहस्थानम् । तत्रहि तेनि-पतन्ति । आद्रात्रीवासस्तनुते । आत्अथानन्तरम् रात्रीतमोमयंवासः तनुतेविस्तारयति । सिमस्मै-सर्वस्मैजगति एकत्वादित्य सहितंज्योतिरेकंतमः आदित्यप्रभावा त्प्रभवतीत्ययमभिप्रायः ॥ ३७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तन्मित्रस्य । सूर्यःतद्रूपंज्योतिः कृणुतेकुरुते द्योलोकस्य उपस्थेउत्सङ्गे । मित्रस्यावरुणस्याभिचक्षे अदर्शनाय । मित्रोहि सुकृतिनोगृह्णातिवरुणःदुःकृतिनोगृह्णाति एवमनेनप्रकारेण जगदनुगृह्णातीत्यभिप्रायः । किञ्च अनन्तम् अपर्यन्तंकालतः देशतश्च । अन्यत्एकम् रुशत्शुक्लं जरामरणादिभिर्वियुक्तम् । विज्ञानघनमानन्दः असावसूर्यस्यपाजः । पाजइतिबलनामबृहतुरूपमुच्यते

तच्चक्षं ॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्योरुपजगृणुतेद्योरुपस्थे ॥ अनन्तमन्यद्रुशदस्यपाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥ ३८ ॥ बरणमहान् ॥ बरणमहाꣳ ॥ ऽअसिसूर्य्यबडादित्यमहाꣳ ॥ ऽअसि ॥

रूपम् अस्तीतिशेषः । तच्चाद्वैतलक्षणम् कृष्णंद्वैतलक्षणं अन्यत् अपरंरूपम् हरितःहरिणाइन्द्रियवृत्तयः संभरन्तिनिदानभूताभवन्ति ॥ ३८ ॥ वरणमहान् । प्रगाथः द्वाभ्याम् पूर्वार्धर्चौ उत्तरासतो बृहतो । वट्मत्यम् महान्परब्रह्मअसिहेसूर्यबद्हेआदित्य तेजसा मादानादित्यः । महानसिकिञ्च महःमहतःतेतवसतः महिमामहाभाग्यं सर्वेषुदेवेष्ववस्थितम् । यतसत्तेपूज्यते सर्वैःप्राणिभिः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अङ्गासत्यं हेदेवदानादिगणयुक्त महान् असि। अभ्रासेभूयांसमर्थंमन्यन्ते यथाअहोदर्शनीयाहो दर्शनीयाइति ॥ १९ ॥ वट्सूर्य। वट्सत्यम् हेसूर्यअवमाअवणीयेन धनेनमहानसि। सत्यासत्यम् हेदेवमहानसि। किञ्च मन्हास्वकीयेन महत्वेन त्वमेवदेवानां मध्येअसुर्यः। असवःप्राणाः संतियेषांतेअसुराः रोमत्वर्धीयःतेभ्योहितः असुर्यः उपगवादित्वाद्यत् प्राणिभ्योहितइत्यर्थः।

मुहस्तेसतोमंहिमापंनस्यतेद्वादेवमुहाꣳ ॥ अंसि ॥ ३९ ॥ वट्सूं र्य्यꣳश्रवंसामुहाꣳ ॥ ऽअंसिसत्चादेवमुहाꣳ ॥ ऽअंसि ॥ मुहन्नाट्टे वानांमसुर्य्य÷ पुरोहितोव्विभुज्ज्योतिरदाभ्यम् ॥ ४० ॥ आयंन्तऽइवसूर्य्यम् ॥ आयन्तऽइवसूर्य्यव्विश्वेदिन्द्रस्यभक्षत ॥ व्वसूनि

पुरोहितश्च पुरएनम्भाति सर्वेषुकार्येष्वितिपुरोहितः। किञ्च विभुव्यापि। ज्योतिःविज्ञानघनानन्दम् अदाभ्यम्अनुपहिंसितम् ॥ ४० ॥ आयंतइव। इहतो। यथाआयन्त आश्रिताः सूर्यरश्मयःविश्वानि धनानिइदिति निपातःपादपूरणार्थः। इन्द्रस्यसंबन्धीनि इन्द्रानुज्ञातानि। भक्षत-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आख्यातमेतत् अनुदात्तत्वात् विभक्तंतेविभजंते एवंवयमपिसमाश्रिताः सूर्यंविश्वानीन्द्रसाधनानिविभक्ताम:। किञ्च वसूनिधनानि जातेपौत्रादौ जनमानेजनिष्यमाणेच भविष्यत्कालविषये। ओजसावलेन ज्ञानकर्मसमुच्चकारितया। प्रतिपुरुषम् भागन्नभागमिवदीधिम। निधीमहिस्थापयाम दधातेरेतद्रूपं नवोध्यायतेरर्थपौष्कल्यात्॥ ४१॥ अद्यादेवाः। हे विष्टुभौ अद्या-

जातेजनंमानुऽओजंसाप्प्रतिंभागन्नदीधि ॥ ४१ ॥ अद्यादेवाꣳ ॥ *
अद्यादेवाऽउदितासूर्य्यस्यनिरꣳहंसꣳ पिपृतानिरंबद्यात् ॥ तन्नो मित्रोवरुणोमामहन्तामदितिꣳ सिन्धुꣳ पृथिवीऽउतद्यौꣳ ॥ ४२ ॥

स्मिन्नहनि हे देवाः रश्मयःउदयकाले सूर्यस्य। निरंहसःपिपृत निष्पिपृत निर्मुंचत अंहसःपापात्सकाशात्। अहंतिश्चांहश्चांऽश्चहीतनिगूढोपधाद्विपरीतात्। निरवद्यात् निष्पिपृतच निर्मुञ्च चअवद्यात् अवदनीयात्। येनदुर्यशोभवति तदवद्यम्। तदेतदुच्यमानम् नःअस्माकम् मित्रावरुणःमामहन्तांपूजयंतुअदितिःसिन्धुःनदी। पृथिवीउतद्यौः ॥ ४२ ॥ आकृष्णेन।

* अद्यादेवा इत्यत्रअदृप्यतर्ठ० हकारचकारभवतहणो महेदेवेषु। अस्यार्थः अधेत्ययं ऋस्वस्वकारादिषु परेषुदीर्घमापद्यते इति दीर्घः प्राति० अ० ३। सू० ११५॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आवर्तमानः पुनःपुनर्भ्रमणंकुर्वन् । कृष्णेनरजसा रात्रिलक्षणेनसह । निवेशयन् स्वेषुस्वेषुप्रदेशेषुस्थापयन् अमृतंदेवादिकम् मर्त्यंचमनुष्यादिकंच । हिरण्ययेनहिरण्मयेन सवितारथेन । आदेवोयाति आयाति देवः दानादिगुणयुक्तः । भुवनानिभूतजातानिपश्यन् कानिकानिसाधुकुर्वन्ति कानिकानिवा असाध्नोति । स्वरूपानुवादः ॥ ४३ ॥ प्रवाहजे । विष्टुप् । वैश्वदेवस्तुतिः चतुर्थेहनि सर्वमेधेवैश्वदेव्यः पुरोरुचः । प्रवाहजे प्रहृजाते प्रच्छिदाते । सुप्रयाः

आकृष्णेनं ॥ आकृष्णेनरजसाव्वर्त्तमानोनिवेशयंन्नमृतम्मर्त्यंञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवंनानिपश्यंन् ॥ ४३ ॥ [१] प्रवाहजे ॥ सुप्रयाबर्हिरेषामाविश्प्पतीवुवीरिटऽइयाते ॥ विश्पा

सुप्रयाणं सुगमनम् वर्हिः एषाम् येषामितिसर्वनामव्यत्ययः । येषांयजमानानाम् । आदुयाते आगच्छतम् अश्विनौ । कथमिव । विश्पतीइव । सर्वमाप्तीइव वीरिटशब्दोगणवचनः । यथाविशांमनुष्याणां पतीराजानौ विशांमनुष्यां गणेअवस्थितौ कस्मिन्काले । अक्तोः रात्र्याः अवसाने । उषसःआगमनकाले । पूर्वहूतौपूर्वस्मिन्आह्वानकाले । किञ्च वायुः नियु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वान् अश्ववान् । पूषाच स्वस्तयेस्वस्त्ययनाय अविनाशायआदृयाते ॥ ४४ ॥ इन्द्रवायू- बृहस्पतिम् । तिस्रोगायत्र्यः । इन्द्रवायूबृहस्पतिम् । मित्रामित्रमितिप्राप्ते आकारः । मित्रम् अग्निम् पूषणम्भगम् । आदित्यान्मारुतंच गणम् आह्वयामीतिशेषः ॥ ४५ ॥ वरुणः प्रा-

मुवन्तोऽउषसः पूर्व्वहूतौव्वायुःपूषास्वस्तयेनियुत्वान् ॥ ४४ ॥ इन्द्रवा यूबृहस्पतिम् ॥ इन्द्रवायूबृहस्पतिम्मित्राग्निम्पूषणम्भगम् ॥ आ दित्यान्मारुतङ्गणम् ॥ ४५ ॥ वरुणं प्राविता ॥ भुवन्विश्वो व्विश्वाभिरुतिभिः ॥ करंतान्नः सुराधसः ॥ ४६ ॥ अधिनः ॥ अधिनऽइन्द्रेषाँव्विष्णोसजात्यानाम् ॥ इतामरुतोऽअश्विना ॥

विता । वरुणःप्राविता प्रकर्षेणअवितारक्षकः भुवन्भवतु । मित्रश्च । विश्वाभिःसर्वाभिः ऊतिभिः अवनैःपालनैः । किञ्च करताम्कुरुतांच नःअस्मान् सुराधसःशोभनधनान् ॥ ४६ ॥ अधिनः । अधि इत्अधागच्छतिनोस्माकम् एषांचसजात्यानाम्सक्त्विजाम् । हेइन्द्र हेवि-

शिवम् ६३७

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ष्णोहेमरुतः हेअश्विनौ । अथप्रतीकोक्ताः । तम्प्रत्नथा । अयंवेनः । येदेवासः । आनदूडाभिः । विश्वेभिःसोम्यंमधु ओ मासश्चर्षणीधृतः ॥ ४७ ॥ अग्नइन्द्र । विष्टुप् । हेअग्नेहेइन्द्र हेमित्रहेदेवाः । शर्द्धःबलं संगृह्य । प्रयन्तप्रगच्छत । सोमिनोगृहं सोमंपातुम् । हेमा-

तम्प्रत्नथायंवेनोयेदेवासऽआनऽऊडाभिर्विश्वेभिः सोम्यम्मधवोमासश्चर्षणीधृतः ॥ ४७ ॥ अग्नऽइन्द्र ॥ वरुणमित्रदेवाः शर्द्धःप्रयन्तमारुतीतविष्णो ॥ उभानासत्यारुद्रोऽअधग्नाः पूषाभगः सरस्वतीजुषन्त ॥ ४८ ॥ इन्द्राग्नीमित्रावरुणा ॥ इन्द्राग्नीमित्रावरुणादितिꣳस्वः पृथिवीद्यामुरुतः पर्वतारँ ॥

रुतगण उतअपिहेविष्णो । प्रत्यक्षकृतोयमर्द्धर्चः । द्वितीयस्तु परोक्षकृतः वाक्यभेदात् । उभानासत्या उभौनासत्यौरुद्रःअधग्नाःदेवपत्यः पूषाभगः सरस्वतीच जुषन्तसेवन्त यज्ञंसोमपानाय ॥ ४८ ॥ इन्द्राग्नीमित्रावरुणा । जगती । इन्द्राग्नीचमित्रावरुणौच अदितिश्चस्वःआदि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्यं च पृथिवीं च द्याञ्च मरुतश्चपर्वतांश्च अपश्च । हुवे आह्वयामि । विष्णुञ्च पूषणंच ब्रह्मणस्पतिञ्च नुचिप्रम् शंसंशसितव्यं सवितारञ्च हुवे । ऊतयेअवनाय ॥ ४९ ॥ अस्मेरुद्राः । त्रिष्टुभःपञ्च अस्मेअस्माकंरुद्राः मेहनाःसेचनाः यद्वा महनीयाः पूजनीयाः पर्वतासःपर्वताश्च हवहत्येव हवधेभरहूतौ संग्रामाह्वानेच सजोषाः समानजोषणाः समानप्रीतयः एकाभिप्रायाः

अपऽ॥ हुवेव्विष्णुंम्पूषणम्ब्रह्मंणस्प्पतिम्भगन्नुशꣳसꣳसवितारंम्
तयें ॥ ४९ ॥ अस्म्मेरुद्राऽ॥ अस्म्मेरुद्रामेहनापर्व्वतासोव्वृत्रहत्येभरं
हूतौसुजोषाꣳ॥ यऽशꣳसंतेस्तुवतेधायिपज्रऽइन्द्रंज्ज्येष्ठाऽअस्म्मारँ॥
अवन्तुदेवाऽ॥ ५० ॥ अर्व्वाञ्चोऽअद्य ॥ अर्व्वाञ्चोऽअद्याभवतायजत्रा

भवन्त्वितिशेषः । यश्चशंसतेशस्त्राणि स्तुवतेस्तौतिच स्तोत्राणि धायिदधाति हवींषि । पज्रःप्रार्जितधनःसन्तस्मैचरुद्रा सजोषाःभवन्तु । किञ्च इन्द्रज्येष्ठाः इन्द्रोज्येष्ठोयेषांतेतथोक्ताः अस्मान् अवन्तुपालयन्तु देवाः ॥ ५० ॥ अर्वाञ्चोअद्य । अर्वागञ्चनाः अद्यभवत हेयजत्राः हेयजनीयाः किञ्च आवोहार्दिभयमानोव्ययेयम् । आव्ययेयम् व्ययतिर्गत्यर्थः आगमेयम् अभिमुखमापादयेयम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वःयुष्माकं हार्दिंहृदयम् भयमानः विभ्यत् । विभेतेविकरणव्यत्ययेनशानचिशप् । यतएवमतो-ब्रवीमि वाङ्गंपालयत नःअस्मान् हेदेवाः निजुरः नितरांयोभक्षितं जरयतिसनिजूः बुभुक्षि-तादित्यः बुकस्यदकादिति विभक्तिव्यत्ययः । वाङ्ग्कर्तात् कूपात् । अवपदः अवाचीनानिय-

ऽआवोहार्दिंभयमानोव्ययेयम् ॥ चाद्ध्वंन्नोदेवानिजुरोव्वृकंस्युत्रा द्ध्वंङ्गुर्त्तादवपदोयजत्राऽ ॥ ५१ ॥ व्विश्वेऽअद्य ॥ मरुतोव्विश्वेऽऊ तीव्विश्वेभवन्त्वग्नयुऽसमिद्धाऽ ॥ व्विश्वेनोदेवाऽअवसागमन्तुव्वि श्वेमस्तुद्रविणंव्वाजोऽअस्मे ॥ ५२ ॥ व्विश्वेदेवाऽ ॥ शृणुतेमऽहवं म्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ ॥ येऽअग्निजिह्वाऽउतवायजत्राऽआ

वपादानि सतथोक्तः तस्मात्सोपानै र्यत्रोत्तरितुं नशकतेऽत्यर्थः । हेयजत्रा यष्टव्याः ॥ ५१ ॥ विश्वेअद्यइतिव्याख्यातम् ॥ ५२ ॥ विश्वेदेवाः । हेविश्वेदेवाःशृणुतइमंहवमआह्वानंममम । येअ-न्तरिक्षेस्थभवथ । येचउपद्यविद्युलोकेस्थभवथ । येचअग्निजिह्वाअग्निमुखाः । उतवाअपिचयजत्रा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यष्टव्याः श्रुत्वाचआह्वानम्आसद्यस्थित्वाअस्मिन्बर्हिषिमादयद्वम्तृप्यद्वम् ॥ ५३ ॥ देवेभ्योहि । यस्माद्देवेभ्यः प्रथमंयज्ञियेभ्यः यज्ञार्हेभ्यःअमृतत्वं सुवसिअभ्यनुजानासि भागश्चोत्तमंसुवसि आत् इत् अथानन्तरमेवदामानम् दातारमुत्पत्तिस्थितिलयानाम् स्वकीयंरश्मिजालम् हेसवितः व्यूर्णुषे विवृणोषि विस्तारयसि । रश्मीनामुद्गमेहि विप्रोऽकंपितमनसाग्निहोत्रादीनिकर्मा-

सद्यास्मिन्न्बर्हिषिमादयद्ध्वम् ॥ ५३ ॥ देवेभ्योहि ॥ प्रप्रयुमंय्यु ज्ज्ञियेभ्योमृतत्त्वꣳसुवसिभागमुत्तमम् ॥ आदिह्यामानꣳसवितर्व्यू र्णुषेनूचीनाजीवितामानुषेभ्यः ॥ ५४ ॥ [११] प्रवायुम् ॥ प्रवायुम

णिकुर्वीत । किञ्च अनूचीनाअन्वञ्चितानि तदनुगतानि जीविताजीवितानि जीवनहेतूनिकर्माणि मानुषेभ्यः ददासितस्मात् त्वामेवस्तुम इतिवाक्यशेषः ॥ ५४ ॥ समाप्तंसर्वमेकंकर्म । इदानींत्रयोनुवाकाः पुरोरुचामनारभ्याधीताः व्याख्येयाः । आदित्यस्यवा यज्ञवल्क्यस्यवा आर्षमापिप्पलमेधात् । प्रवायुम् त्रिष्टुप् । चतुर्थःपूर्वंव्याख्यायते वाक्यवशात् । हेप्रय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ज्योप्रकर्षेण यजनशील अध्वर्योयस्त्वं कविःक्रान्तदर्शनः वायुमभ्यच्छ आभिमुख्येन प्रद्रुयच्छसिप्रकर्षेण यष्टुमिच्छसि। यजतेरेतद्रूपम् बृहतीमनीषा बृहत्यामनीषया। किंभूतं वायुम्। बृहद्रयिम् महाधनम्। विश्ववारं सर्वस्यवरणीयम् रथप्रां रथपूरणम् शत्रुधनैरसौरथंपूरयति। द्युतद्यामा द्योतनंयमनंयस्य सतथोक्तः। द्युतद्यामानमिति विभक्तिव्यत्ययः वायुविशेषणत्वात्।

च्छा बृहतीमनीषा बृहद्रयिं विश्ववारꣳरथप्राम् ॥ द्युतद्यामानियुतः पत्यमानः कविः कविमियक्षसिप्रयज्यो ॥ ५५ ॥ इन्द्रवायूऽइमे ॥ सुताऽउपप्रयोभिरागतम् ॥ इन्दवोवामुशन्तिहि ॥ ५६ ॥ मित्रꣳहुवे ॥ पूतदक्षंवरुणञ्चरिशादसम् ॥ धियंघृताचीꣳसाधन्ता ॥ ५७ ॥

नियुतःपत्यमानः अत्रापिपत्यमानमिति पदयोर्विकारोवाक्यवशात् नियुद्भिरश्वैरुत्पतन्तम् कविंक्रान्तदर्शनम् ॥ ५५ ॥ इन्द्रवायूइमे व्याख्यातम् ॥ ५६ ॥ मित्रꣳहुवे। हे गायत्र्यौ मित्रमाह्वयामि पूतदक्षम् पूतस्यशुद्धस्य प्राणिनउद्धरणेदक्षं सोमम्। वरुणञ्च रिशादसम् हिंसकादिविनाशने शक्तिङ्कुर्वाणम् हुवे। कीदृशौ। धियंकर्मघृताचीम् येनकर्मणाघृतमच्यते क्षयतेतत्कर्मसाधन्ता-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

साधयन्तौ । नहिदेवतामन्तरेणकर्मसिद्धिः ॥ ५७ ॥ दस्रायुवाकवः । द्वयोरश्विनो रेकस्यदस्रइति-नाम अपरस्यनासत्यइति । तत्रार्यविभक्त्यर्थे आकारोविरूपैकशेषेवर्तते । गुणोयङ्लुकोरितिच पणिनिर्दर्शयति । हेदस्रौ दर्शनीयौ हेनासत्यौ नञ्असत्यौ सत्यावेवनभ्रान्नपादितिप्रकृतिभावः । युवाकवः युवाङ्कामयमानः अहमहमेकया मांपिवतं मांपिवतमिति सुताअभिषुताः दृक्तवर्हिषः प्रस्तीर्णबर्हिषः । यतःअतोब्रवीमि आयातम्आगच्छतम् हेरुद्रवर्तनी । रुद्रस्येववर्तनि-

दस्रायुवाकवः ॥ सुतानासंत्याव्वृक्तबर्हिषः ॥ आयातꣳरुद्रवर्तनी ॥ तम्प्रत्नथायंव्वेनः ॥ ५८ ॥ व्विदद्यदिं ॥ व्विदद्यदीसरमांरुग्णमद्रे र्म्महिपाथः॰पूर्व्यꣳसध्र्यक्कः ॥ अग्नंन्नयत्सुपद्यक्षराणामच्छारवंम्प्रथुमा

र्ययोस्तौ तथोक्तौ रुद्रपत्न्यानौ । तम्प्रत्नथायंवेन इतिप्रतीकोक्तौ ॥ ५८ ॥ आग्रयणंगृह्णाति । विदद्यदि त्रिष्टुप् । द्रुहवाक्प्रकटीभवेतिसोच्यते विदत्जानीयात् यदि । सरमावाक् त्वयीलक्षणा । साहिअभिषवे समानंरमते । रुग्नंचूर्णीकृतम् अद्रेःसोमाभिषवस्यकर्तुः । अद्रिभिश्चसोमोभिषूयते । महिमहत् पाथःसोमलक्षणम्अन्नम् पूर्व्यम् उषांप्रवन्तर्यामैन्द्रवायवादिषुगृहीतम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सध्र्यक्समानाञ्चनम् सहस्यसधिः अञ्चतेरुत्तरम् । कःकुर्यात् । किञ्च अग्रन्नयत् यन्नाग्रन्नयत्ति-सापाथः । सुपदीशोभनानिपदानि यस्यावाचःसातथोक्ता । नहिपदानिप्रत्याख्यायवाक्यंस्यात् । अक्षराणामकारादीनां रवंशब्दंजानती प्रथमाअक्षअभिमुख्येनअगात् । गच्छति एवमधियज्ञंमन्त्रो-व्याख्यायते । वह्वृचान्तुसंवादसूक्तम् । तत्रसरमादेवसुना इन्द्रेणप्रेषितान्वेषणार्थम् गोधनेपणिभिर-सुरैर्हृते तदभिप्रायेणव्याख्यायते । तत्रासुराणांपर्य्यालोचनवाक्यम् । विदद्यदिविदत्अलभत् यदा-सरमादेवमुनी । रुग्नंभग्नं गवांसंवन्धिभिःखुरैः । अद्रेःपर्वतस्यद्वारम् । अथानन्तरं महिमहत्

जानतीगात् ॥ ५९ ॥ नहिस्पशम् ॥ नहिस्पशमविदन्नन्यमस्मा
द्वैश्वानरात्पुरएतारमग्नेः ॥ एमेनमबधन्नमृताअमर्त्यंवैश्वानर

गोलक्षणंपाथःअन्नम् । पूर्व्यमपूर्वेषुकालेषु अपहृतम् । सध्र्यक् देवान्प्रतिसहाञ्चनम् कःकरोतेः रूपङ्करिष्यति । अग्रम् गवामग्रमवस्थायनयत् नेष्यति । सुपदी शोभनपादयुक्ता पदेनयान्वे-षयतिनष्टंसैवमुच्यते । अक्षराणामक्षदीयवा वाक्यसंवन्धिनाम् अक्षअभिरवमुच्चारणम् प्रथ-माजानती अगात्आगमिष्यति ॥ ५९ ॥ नहिस्पशम् । विष्टुप् । नहिशब्दःप्रतिषेधवचनः स्पश-मस्पशःप्रणिधिरुच्यते । अविदन्अन्यमअस्मात्वैश्वानरादग्नेः । पुरएतारम् सर्वेषुकार्येषु अग्रग-न्तारञ्चनहिअविदन् । आईम्ह्यौनिपातौ अथशब्दस्यार्थेवर्तेते अथएनं वैश्वानरम्अबधन् वर्हि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तवन्तः अस्तता अमरणधर्माणोदेवाः अमर्त्यम्अमरण धर्माणंवैश्वानरम् । क्षैत्रजित्याय यजमानस्यदेवयजनक्षेत्रजयनिमित्तम् ॥ ६० ॥ उग्राविघनिना । द्वेगायत्यौ उग्राउग्रौउद्गूर्णौ । विघनिना हन्तेर्घत्वम् विहन्तारौमृधः संग्राम्यसंग्रामकारिणांवा । इन्द्राग्नीहवामहे आह्वयामः । तौचआहूतौ नःअस्मान् मृडातःमृडयतःसुखयतः ईदृशेकर्मणि ॥ ६१ ॥ उपास्मै । उपगायत हेनरः ऋत्विजः

ङ्क्षैत्रजित्यायदेवा३ ॥ ६० ॥ उग्राव्विंघनिना ॥ उग्राव्विंघनिनाम्
धं३इन्द्राग्नीहवामहे ॥ तानोमृडातऽईदृशे ॥ ६१ ॥ उपास्मै ॥ गा
यतानरेपवमानायेन्दवे ॥ अभिदेवा२ँ ॥ ऽइयक्षते ॥ ६२ ॥ येत्वा ॥
हिहत्यैमघवन्नवर्द्धन्येशांम्बरेहरिवोयेगविष्टौ ॥ येत्वानूनमनुमदं

अस्मैपवमानाय । दशापवित्राद्रोणकलशम्प्रतिगच्छते । इन्दवेसोमाय अभिद्रुयक्षते यष्टुमिच्छते सनियकारलोपः । देवान् ॥ ६२ ॥ येत्वा । इच्छिष्टभौ येमरुतः त्वाम् अहिहत्ये अहिरसुरः । अहिवधेकर्तव्ये हेमघवन् अवर्द्धन्वर्द्धितवन्तः । येचशांवरे वधेकर्तव्ये हेहरिवन् । येचगविष्टौ गवामपामेषणायोपस्थितं सन्तं त्वामवर्द्धन् । येचत्वा त्वाम् नूनंनिश्चयेन अनुमदन्ति उत्कर्षयन्ति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तर्प्पयन्तिवा । विप्रामेधाविनः पिव हेइन्द्र सोमम् सगणःसमानगणः तैःमरुद्भिः ॥ ६३ ॥ जनिष्ठाउग्रः । जातःउग्रः उद्गूर्णः । सहसेबलाय तुरायत्वरणाय । वचनविशेषणम् । मन्द्रःमन्दनीयः ओजिष्ठःअतिशयेन ओजसायुक्तः । बहुलाभिमानः अचिन्त्याभिमानः बहुप्रकाराभिमानोवा । अभिमानःज्ञानम् यत्तस्मात् । अवर्द्धन्अवर्द्धयन् इन्द्रंमरुतश्चित् मरुतोपि अत्रपरमपदेस्थितम् ।

न्तिव्विप्राऽपिबेन्द्रसोमꣳसगंणोमरुद्भिः ॥ ६३ ॥ जनिंष्ठाऽउग्गनः ॥ सहंसेतुरायंमन्द्रऽओजिंष्ठोबहुलाभिंमानꣳ ॥ अवंर्द्धन्निन्द्रंम्मरुतंश्चिच्च दत्त्रंमातायद्वीरन्दधनुन्वनिंष्ठठा ॥ ६४ ॥ आतू ॥ आतूनंऽइन्द्रव्वृत्त्र हन्नुस्माकंमूर्द्धमागंहि ॥ महान्महीभिंरूतिभिंः ॥६५॥ त्वमिंन्द्र ॥

माता अदितिः यत्यस्मात् वीरञ्च । दधनन् दधातेरेतद्रूपम् नकारउपजनः धारितवती । धनिष्ठा अतिशयेनधन्या धनवतीतस्माच्च मरुतःअवर्द्धन्नितिसंबन्धः ॥ ६४ ॥ आतूनः । आ तू नः इति चयोनिपाताः क्षुन्दःपरिपूर्तिकराः । हेइन्द्र हेत्वत्वहन्त्वत्वस्यहन्तः । अस्माकमूर्द्धम् अस्मदीयंपक्षम् आगहिआगच्छ । एत्यच अस्मान्पालयेतिशेषः । महान्सन् महीभिर्महतीभिः जतिभिरवनैःपालनैः ॥ ६५ ॥ त्वमिन्द्र । बृहती । त्वमेव हेइन्द्र । प्रतूर्तिषुप्रतरणेषु शत्रुषु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निमित्तभूतेषु । अभिविश्वाअसि । अभ्यसि अभिभवसिविश्वाःसर्वाः स्पृधःसंग्रामान् किञ्च अशस्तिहा अभेरादिशेषः । अभिशस्तिहा । जनयिताच सुखानाम् । विश्वतूः सर्वतूरणश्चासि अतोब्रवीमि । त्वमेवतूर्य्य जहिमारय । तरुष्यतः हनिष्यतः शत्रून् ॥ ६६ ॥ अनुते । सतोब्रुहती । चतुर्थःपादःप्रथमंव्याख्यायतेयच्छब्दयोगात् । हेइन्द्रयत् यस्मात्कारणात्

त्वमिन्द्रप्रतूर्तिष्वभिविश्वाऽअसिस्पृधः ॥ अशस्तिहाजनिताविं
श्ववतूरसित्वन्तूर्यतरुष्यतः ॥६६॥ अनुते॥ अनुतेशुष्मन्तुरयन्तमी
यतुःक्षोणीशिशुन्नमातरा॥ विश्वास्तिस्पृधःश्नथयन्तमन्यवेवुचंस्य
टिन्द्रतूर्वसि ॥६७॥ युज्ञोदेवानाम्॥ युज्ञोदेवानाम्प्रत्येतिसुम्नमा

दृत्वमसुरंतूर्वसि । तूर्वतिर्हिंसाकर्माहिंसि । अतःकारणात् । अनुते शुष्मंतुरयन्तमीयतुः । अन्वीयतुः अनुजमतुः अनुगतवत्यौत्वाग्मेव । तेतवशुष्मंबलम् किंकुर्वाणम्तुरयन्तम् तूर्णंगच्छन्तम् । क्षोणी क्षोण्यौ द्यावापृथिव्यौ । शिशुंनशिशुमिवपुत्रमिव । मातरामातृपितरौ विरूपैकशेषः । किंचविश्वाः सर्वाःस्पृधः संग्रामाः तेतवमन्यवे मन्योःभयात् श्नथयन्तिविशो र्यन्ति । याहिदृत्वंहन्ति यस्यचद्यावापृथिव्यौ बलमीयतुः ॥ ६७ ॥ यज्ञोदेवानामि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तिव्याख्यातम् ॥६८॥ अदब्धेभिः सवितः । जगती । हेसवितः अदब्धेभिःअनुपहिंसितैः पायुभिःपालनैः त्वम् शिवेभिःशान्तैः अद्यपरिपाहि परिपालय नोस्माकम् गयंगृहम् हिरण्यजिह्वः सत्यवाक् भूत्वा । सुवितायसुप्रसूताय कर्मणेनव्यसेनवतराय । भवेतिवाक्यशेषः । रक्षचसर्वथा । माकिः माकश्चन नोस्माकन् अघशंसः अघंपापं यःशंसति सअघशंसः । ईशतईष्टा ईशिताभव-

दित्यासोभवंतामृडयन्तः ॥ आवोर्व्वाचोसुमतिर्व्ववृत्यादूर्ध्वोग्निर्ध्वया व्वरिवोवित्तरासंत् ॥ ६८ ॥ अदंब्धेभिःसवितः ॥ पायुभिष्ट्वंग्निवे भिरद्यपरिंपाहिनोगयंम् ॥ हिरंण्यजिह्वःसुवितायनव्यंसेरक्षामाकिं न्नोऽअघशंसऽईशत ॥ ६९ ॥ [१५] प्रवीरया ॥ शुचंयोदद्रिरवाम तु ॥ ६९ ॥ प्रवीरया । अन्यःपुरोरुग्गणः । त्रिष्टुप् । प्रवीरयावहुवचनस्यस्थानेयादेशः । प्रकृष्टवीराः सोमाःशुचयः स्वभावादेवशुद्धाः । दद्रिरेदविदारणे । विदीर्णाःकणीभूताः । वांयुवयोः संबन्धिनः । हेयजमानौ जायापती । कथंदद्रिरेइतिचेत् । वाम्अध्वर्युभिः मधुमन्तः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उदकवन्तःसुतासः अभिषुताःगवभिः । एवमनेनार्ङ्चेन यजमानौसंबोध्य अथेदानींसंबोधयति वायुम् । वहवायोनियुतः । वहप्रापयहेवायो नियुद्गणकानस्मान् । याहिच अक्तसोममभि । सोमंवाप्राप्तुम् । पिवचसुतस्याभिषुतस्य अस्मसःसोमस्य । मदायतुभ्ये मदजननार्थंवा ॥ ७० ॥ गावउपेति व्याख्यातम् ॥ ७१ ॥ काव्ययोराजानेषु । गायत्री । काव्ययोः कवीनांहितयोः ।

दृध्व्र्युभिर्म्मधुमन्तःसुतासःवहंवायोनियुतोयाह्यच्छा*पिबासु तस्यान्धसोमदाय ॥७०॥ गावउपं॥ गावउपावतावतम्महीयुज्ञस्य रुप्सुदा ॥ उभाकर्णाहिरण्यया ॥७१॥ काव्ययोराजानेषु॥ काव्यं योराजानेषुक्रत्वादक्षस्यदक्षिणे॥ रिशादसासुधस्थ्याआ ॥७२॥ दैव्या आजानेषु आजन्मभूमिषु उत्पत्तिस्थानेषु । क्रत्वा कर्मणाअग्निष्टोमादिकयाक्रियया । दक्षस्यउत्साहवतोयजमानस्य दुरोणेयज्ञगृहे । रिशादसा । रेसितव्यस्योपलक्षयितारौ । सधस्थ्याआ । सहस्थाने आगच्छतं हेमित्रावरुणाविति शेषः ॥ ७२ ॥ दैव्यावध्वर्यू व्याख्यातम् तंप्रत्यया

* पिबासोमम्मिबासुत्तस्यस्थामयोभुवो इत्यादि सूत्रेण पिबासुतस्येत्यत्र दीर्घोनिपात्यत्ते प्रा० अ० ३ । सू० ॥ १३० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अयंवेन इतिहेप्रतीकोक्तेः ॥ ७३ ॥ तिरश्चीनोविततः । त्रिष्टुप् । आग्रयणेनया गृह्यते तदभिप्रायेण प्रधार्य्यते आधवनीयादुन्नेतानि ग्राभ्यास्रासिंचति ताःपवित्रे यजमानः ततो-गृहगृहणम् । तिरश्चीनोवितनोरश्मिरेषाम् एषांसोमानाम् अन्तरादशापवित्रलक्षणात् । रश्मिः तिरश्चीनः वितनःप्रसारितः । उद्गातृभिः तस्मिन्दशापवित्रे सोमःप्रक्षिप्तःदशापवित्रात् अधः

वद्ध्वर्य्यु ॥ दैव्यांवद्ध्वर्य्यूऽआगंतुꣳरथेनसूर्य्यत्वचा ॥ मद्ध्वा यज्ञꣳसमञ्जाथे ॥ तम्मुत्क्राथायंव्वेनः ॥ ७३ ॥ तिरश्चीनोव्वितंतः ॥ तिरश्चीनोव्वितंतोरश्मिरेषामधः स्विदासी३दुपरिं स्विदासी३त् ॥ रेतोधाऽआंसन्म्महिमानऽआसन्त्स्वधाऽअवस्ता

स्वित् अधश्चआसीत् उपरिस्वित् उपरिचआसीत् आसीदित्युभयचविचारेप्लुतिः । किञ्च रेतोधाआसन् । रेतःसोमः सहिजगदुत्पत्तिवीजम । तस्यधारयितारआसन् ग्रहचमसाधवनी-यद्रोणकलशादयः । महिमानश्चआसन् । सोमैकादशाः सोमस्यमहिमानः । किञ्च । स्वधा-अवस्तात् स्वधाअन्नम्अवस्तात् । शुक्रोद्रोणकलश इत्येतदुक्तंभवति । प्रयतिःपरस्तात् प्रयतम्-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

म्प्रयतिः परस्तादुपरिष्टात् । आधवनीयादुन्नेतानिगृभ्णास्वासिञ्चति ताःपवित्रे यजमानोवनयति इत्येतदुक्तंभवति ॥७४॥ आरोदसी । जगती वैश्वानरउच्यते । आअपृणत् आपूरयतिरोदसीद्यावापृथिव्यौ । आस्वः आपूरयतिच स्वःआदित्यम् महत्महान्तम् । कदाआपृणत् यत्यदा जातंजातमत्रम् एनंवैश्वानरम् अपसः अपस्विनः कर्मवन्तःअधारयन् कर्मणिस्थापितवन्तः । सोअध्वराय

त्प्रयंतिः पुरस्तांत् ॥ ७४ ॥ आरोदंसी ॥ ऽआपृणदास्वंर्म्महज्जातंय्य देंनमुपसोऽअधांरयन् ॥ सोऽअंद्ध्वरायुपरिंणीयतेकुविरत्त्योनव्वा जंसातयेचनोंहितः ॥ ७५ ॥ उक्थेभिंर्व्वृत्रहन्तंमा ॥ उक्थेभिंर्व्वृत्र

सएत्रायमग्निः अध्वराय यज्ञार्थंपरिणीयते कविःक्रान्तदर्शनः । कथमिव अत्योनअश्वइव । वाजसातये अन्नसंभजनाय । चनोहितः चनसिअन्नेस्थापितः । अश्वोहिघृतादिभिरभिधारितेनान्नेनपोष्यते अतस्तेनोपमीयते ॥ ७५ ॥ उक्थेभिर्वृत्रहन्तमा । इमेगायत्र्यौ । योदुन्द्राग्नी । उक्थेभिः उक्थैः स्तुतौसन्तौ । वृत्रहन्तमा वृत्रस्यातिशयेनहन्तारौस्तः । याचित्र्यौचगिरावाचास्तुतौ आम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

न्दानामोदमानौस्तः यौच आङ्गूषैः स्तोमैः स्तुतौआविवासतः परिचरतःस्तोतॄन्। तौउक्थैः गिराआङ्गूषैश्चस्तुमः सर्वकामाप्त्यर्थम्॥७६॥ उपनः। उपशृणवन्तु नोस्माकम् गिरःवाचः सूनवःपुत्राः अस्मत्स्यप्रजापतेः येविश्वेदेवाः श्रुत्वाच। सुमृडीकाः अतिशयेनसुखयितारः भवन्तु नःअस्माकम्॥७७॥ ब्रह्माणिमे तिस्रस्त्रिष्टुभः। इन्द्रमरुत्संवादे इन्द्रस्यैतद्वाक्यम्। ब्रह्माणिस्तुतयः स्तवींषिवा। ममतयः

हन्तंमायामंन्दानाचिदागिरा॥ आङ्गूषैरावविवांसतः॥७६॥ उपंनः॥ सूनवो गिरंः शृणवन्त्वमृतंस्यये॥ सुमृडीकाभंवन्तुनः॥ ७७॥ ब्रह्मांणिमे॥ मतयः शꣳसुतासः शुष्मंऽइयर्त्तिप्रभृंतोमेऽअद्रिं॥

मममतीः इयर्ति उद्गमयन्ति। शंसुखम् सुतासःअभिषुताः सोमाःममउद्गमयन्ति। शुष्मइयर्तिप्रभृतोमेअद्रिः। शुष्मःबलम् इयर्ति। ऋगतौ णिचोलोपश्छान्दसः आरयति उद्गमयति। प्रभृतः हृग्रहोर्भश्छन्दसिहृग्येतिहकारस्यभकारः प्रहृतः सोमाभिषवनिमित्तम्। मेमम अद्रिःग्रावा। यत्रचआशासते यजमानाः मदीयमागमनमिच्छन्ति। यत्रचप्रतिहर्यन्ति। हर्यतिःप्रेप्साकर्मा। प्रतिकामयन्ति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उक्थाउक्थानि । इमानि इन्द्रःशृणोत्विति । इमाइमौहरी अश्वौवहतःप्रापयतः तातानि-स्थानानिनःअस्मान् अच्छआभिमुख्येन ॥ ७८ ॥ अनुत्तमाते । एवमिन्द्रेणोक्ता मरुतःप्रत्याहुः । अनुत्तम् गुदप्रेरणे अस्यनिष्ठाप्रत्ययेनुत्तप्रतूर्तेत्यादिनासिद्धिः । अनुत्तम् अप्रच्युतस्व भावंमहा-भाग्यम् । आआस्ते । तेतव । हेमघवन्धनवन् । नकिर्नु । नवाकश्चित् प्रत्यावकोम-

आग्रांसतेप्रतिहर्य्यन्त्युक्थेमाहरीव्वहतस्तानोऽअच्छ ॥ ७८ ॥ अनु त्तमातें ॥ मघव न्नकिर्न्नुनस्त्वावाँ२ ॥ ऽअस्तिदेवताविदानः ॥ नजा यमानोनशतेनजातोयानिकरिष्याक्रणुहिप्रवृद्ध ॥ ७९ ॥ तदित् ॥

हाभागस्यकिञ्च । नत्वावान् मतुप्साहश्यार्थे । नत्वत्सदृशः अस्तिदेवतादेवःविदानः सर्वज्ञइ-त्यर्थः । किञ्च नजायमानःनशते । नशिर्व्याप्त्यर्थश्छन्दसि । व्याप्नोति । नचजातः । तानिक-रिष्यति । तानिकानि । यानित्वंक्रणुहिकरोषीतिलकारव्यत्ययः हेप्रवृद्ध ॥ ७९ ॥ तदित् । तत् इत् आस । इच्छब्दएवार्थे आसीदितिलकारव्यत्ययः । तदेवासीत् भुवनेषुभूतजातेषु ज्येष्ठंब्र

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ङतमम्। यतोजज्ञेजातः उग्रः उङ्गूर्णः वज्रहस्तइन्द्रः। त्वेषनृम्णः तेजोधनोवा महाधनोवा। कार्यंदृष्ट्वाकारणानुमानं कुरुतेनहि यतः कुतश्चिदिन्द्रोजायतइति। किंच। यश्च सद्यो-जज्ञानः। जायमानः बाल्यमनपेक्ष्य। निरिणाति निहन्तिशत्रून्। पुनरपि बिभिनष्टि। अनुयंबिश्वेमदन्ति। अनुमदन्ति अनुतृप्यन्ति यंबिश्वेसर्वेदेवाः। ऊमाः। अवितारः अवनी-

तदिदासुभुवनेषुज्येष्ठंयतोजज्ञऽउग्रस्त्वेषनृम्मणꣳ॥ सद्योजज्ञा नोनिरिणातिशत्रूननुयंविश्वेमदन्त्यूमाꣳ॥ ८०॥ इमाऽउत्वा॥ * पुरूवसोगिरोव्वर्द्धन्तुयाममं॥ पावकवर्णाꣳशुचयोव्विपश्चितोभि

यावा। नास्तियतः कुतश्चिज्जायत इतिविशेषः॥ ८०॥ इमाउत्वाइति द्वितीयौ। तृतीयःपादः पूर्वंव्याख्यायतेसामर्थ्यात्। यन्त्वाम्यावकवर्णाग्निवर्णाःऋषयःशुचयः यमनियमपराः। विपश्चितः त्रिकालदर्शिनः। अभ्यनूषतअभिष्टुवन्तः। स्तोमैःस्तोत्रैः। तंत्वाइमाउःपादपूरणाः। याःममगि-

* अश्वरश्मिमर्मतिसुमतिश्वसुतचारयषृणिसेदिमेन्द्रियधारयेत्यादि सूत्रेणपुरुवसोइत्यवस्थायांवकारेपरेपुरुइत्युकारस्य दीर्घो भवति प्रा० अ० ३। सू०॥ ८८॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रःहेपुरूवसो प्रभूतधनता वर्द्धन्तुवर्द्धयन्तु ॥ ८१ ॥ यस्यायम् । यस्येन्द्रस्यअयंविश्वः सर्वःआर्यः दासः । वर्णाश्रमविहितकर्मानुष्ठानादासइव । सेवधिपाअरिःसेवधिनिधिः । निधिमिवये । धनंरक्षति नवर्णाश्रमविहितकर्मानुष्ठानं करोति सःयस्यशत्रुभूतः । किञ्च । तिरश्चित् प्राप्तेपि अर्येईश्वरे रुशमे । रुशतिर्हिंसाकर्मा । हिंसे । पवीरवि । पवीरमायुधंतद्वति । आयुधवति-

स्तोमैरनूषत ॥ ८१ ॥ यस्यायम् ॥ यस्यायंविश्वऽआर्य्योदासंऽशेव धिपाऽअरिःतिरश्चिंदर्य्येरुशमेपवीरवितुभ्येत्सोऽअज्यतेरयिः॥८२॥ अयꣳसहस्रम् ॥ अयꣳसहस्रमृषिभिः सहस्कृतः समुद्वऽइवपप्रथे ॥

युद्धकर्मणि । यइन्द्रः अरिःशत्रुः । हेयजमान तुभ्यइत्तुभ्यमेव । सइन्द्रः अज्यते । धातूनामनेकार्थत्वादंजिर्दीनार्थः विकरणव्यत्ययश्च अनक्तिदातिरयिःधनम् अत्रापिरयिमितिविभक्तिव्यत्ययः ॥ ८२ ॥ अयꣳसहस्रम् । सतोद्वहती । योयमिन्द्रः सहस्रंसहस्रकृत्वः । ऋषिभिः । सहस्कृतः । सहइतिबलनाम । बलंकृत्वास्तुतःसन् समुद्वइवपप्रथेप्रथते । तस्मात्सत्यः सःमहि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

माशवः बललक्षणः गृणेगीयतेअस्माभिर्यज्ञेषु । विप्रराज्ये । यज्ञेहिब्राह्मणाः स्वतंत्राराजान-
इवभवन्ति ॥ ८३ ॥ अदब्धेभिःसवितरितिव्याख्यातम् ॥ ८४ ॥ (१) आनः आयाहिनःअस्माकंय-
ज्ञम् । दिविस्पृशं द्युलोकयायिनम् । ऋत्विग्यजमानैर्विहभिराख्यःदक्षिणादिभिःसम्पन्नःयज्ञः

सत्यः सोऽअस्यमहिमागृणेशवोयुज्ञेषुविप्रराज्ये ॥ ८३ ॥ अदब्धेभिः सवितः ॥ पायुभिष्ट्वꣳशिवेभिरद्यपरिपाहिनोगयम् ॥ हिरण्यजिह्वः सुवितायनव्यंसेरक्षामाकिर्नोऽअघशꣳसऽईशत ॥ ८४ ॥
[१५] आनः ॥ आनोयुज्ञञ्जन्दिविस्पृशंव्वायोयाहिसुमन्नमभिः ॥ अ

दिवंस्पृशत्येव । हेवायो सुमन्नभिः सुमननैः संकल्पैः । आगतस्यकिंफलमितिचेत् । अन्तःपवि-
त्रेदशापवित्रस्य उपरिश्रीणानः होतृचमसेनिषिच्यमानः सोमोवक्तेते तत्रतवग्रहोगृह्यते । अयंच

(१) षष्ठः पुरोरुग्गणः समाप्तः इतोऽध्यायसमाप्तान्तं त्रयोदश ऋचः प्रतीकोक्तास्तत्रैव ऐन्द्रवायवादिसावित्रान्तानां ग्रहाणां ग्रहणमन्त्राः पूर्ववत् ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यःशुक्रः सोमःतम् अयामिप्रापयामितेतव ॥ ८५ ॥ इन्द्रवायूसुसंहृशा । इन्द्रवायू । सुसंहृशा । सुतरांसम्यग्दर्शनौयौ । सुहवा । स्वाह्वानौच । इहहवामहे आह्वयामः । तथाचाह्वयामः । यथा-येनप्रकारेण नःअस्माकम्सर्वदृत्सर्वएवजनः । अनमीवःअमीवाव्याधिस्तद्रहितः । सङ्गमेइन्द्रवायु-संगतौ । सुमनाशोभनमनस्कः । असत्भूयात् ॥ ८६ ॥ ऋधगित्था । तृतीयःपादः प्रथमंव्या-

न्तः प्रविक्तंऽउपरिश्रीणानोयःशुक्रोऽअयामिते ॥ ८५ ॥ इन्द्रवायू सुसुन्हृशा ॥ सुहवेहहंवामहे ॥ यथानुः सर्व्वऽइज्जनोनमीवः सङ्गमेसुमनाऽअसत् ॥ ८६ ॥ ऋधंगित्था ॥ समर्य्यः शशमेदेवतातये ॥ योनूनम्मित्रावरुणावभिष्टयऽआचक्रेहव्यदातये ॥ ८७ ॥ आया

ख्यायतेयच्छब्दयोगात् । यःमर्त्यःनूनंनिश्चयेन मित्रावरुणौअभिष्टयेस्वाभिष्टप्राप्तये । आचक्रेसे-वतेहव्यदातये हविषो दानाय । समर्त्यः ऋधक्सर्व्वद्धियुक्तः इत्था । इत्थमित्यभिनयेन दर्श-यति । शशमे । शाम्यतियमनियमज्ञोभवति । देवतातये । देवानांकर्मदेवतातिः तस्यै । यज्ञायेत्यर्थः ॥ ८७ ॥ आयातम् । आगच्छतम् उपभूषतम् अलंकुरुतंचयज्ञम् । मध्वः मधुरूपस्य

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वमंशपिबतंच । हेअश्विनौ । किंच । दुग्धंपयः महाबीरसेचनार्थम् । हेइषणौसेक्तारौ । हेजेन्यावसू जेन्यंजितं स्वीकृतंवसुधनं याभ्यांतौजेन्यावसू । किंच मानोमर्ड्डिष्टम् माचमर्ड्डिष्टम् संप्रहारकृतम् नःअस्मान्प्रति । आगतम् अवश्यञ्चआच्छतम् ॥ ८८ ॥ प्रैतु । अस्मदीयं यज्ञंप्रतिआगच्छतु ।

तम् ॥ आयातुमुपंभूषतुम्मदूध्वंः पिबतमश्विना ॥ दुग्धम्पयोव्वृषणाजेन्यावसूमानोमर्ड्डिष्टमागंतम् ॥ ८८ ॥ प्रैतु ॥ प्रैतुब्रह्मणस्पतिः प्रदेव्येतुसूनृता ॥ अच्छाव्वीरन्नर्य्यम्पुड्क्तिराधसन्देवायुज्ञन्नंयन्तुनः ॥ ८९ ॥ चुन्द्रमाऽअप्सु ॥ चुन्द्रमाऽअप्स्वन्तरासुपुरणो

ब्रह्मणस्पतिः बृहस्पतिः । प्रैतुचदेवीवाक् । सूनृता शोभनासत्यवतोवयोलक्षणा । कंप्रत्यागच्छत्त्वित्यतआह । अच्छअभि । वीरंपुत्रं । महाबीरंवा । नर्यम् नृभ्योहितम् अनुग्राहकम् । पंक्तिराधसम् ब्रह्मपङ्क्तिसाधकम् पंक्तिपावनमित्यर्थः । किञ्चदेवाः यज्ञंनयन्तु नःअस्माकम् ॥ ८९ ॥ चन्द्रमाअप्सु । आकृतिपरिणामोवोच्यते । योसौचन्द्रमाः सतथासोमरूपापन्नः । अभिष्टुतः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अप्स्वन्तः मध्येरसरूपेण आस्थितः। अग्नौञ्जतःसन् सुपर्णःसुपतनः धावतेदिवि। तस्मात्प
र्जन्यरूपमास्थाय। उदकदानद्वारेण। रयिंधनम् पिशंगंपीतवर्णम् बहुलमसंख्यातम् पुरुस्पृहम्
वहवोयत्रस्पृहयन्ति। हरिःसोमएति। कनिक्रदत् पर्जन्यरूपेणात्यर्थं स्तनितंकुर्वन् ॥ ९० ॥
देवंदेवंवः। देवंदेवमितिवीप्सार्थोभ्यासः। यावन्तोदेवास्तावतोदेवान्वःयुष्माकमवसेपालनाय।

धावतेदिवि॥रयिम्पिशङ्गंबहुलम्पुरुस्पृहंहरिरेतिकनिक्रदत्।९०।
देवन्देवंवः॥देवन्देवंवोवसेदेवन्देवमभिष्टये॥देवन्देवꣳहुवेमवा
जसातयेगृणन्तोदेव्याधिया॥९१॥दिविपृष्टः॥दिविपृष्टोऽअरो
चतग्निर्वैश्वानरोबृहन्॥क्ष्मयावृधानऽओजसाचनोहितोज्ज्यो

हुवेमेत्यनेनसंबन्धः आह्वयामः। देवंदेवमभिष्टये अभिष्टकामावाप्तये आह्वयामः। देवन्देवंहु-
वेम। वाजसातये अन्नसम्भजनाय। कथंहुवेमेतिचेत्। गृणन्तःस्तुतिभिः देव्याधिया। देवता-
याथात्म्यचिन्तनपरयाबुद्ध्या ॥ ९१ ॥ दिविपृष्टः। योग्निर्वैश्वानरः दिविपृष्टः द्युलोकेस्थितः आदि-
त्यात्मना अरोचतेदेदीप्यते। बृहन्महान्। सोयम् क्ष्मयापृथिव्या कारणभूतया। वृधानः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बर्द्धमानः ओ जसावलेनच। चनोहितः चनसिअन्नेहविर्लक्षणे हितःस्थापितः। ज्योतिषा-
वाधतेतमः ॥ ८२ ॥ इन्द्राग्नीअपात्। प्रवत्तिहकेयस्यक्। यथाप्रक्तन्तु व्याख्यायते। मानुषोवा-
गनयोच्यते। उक्तंच। अथयन्मानुष्यावाचाह इतीदंकुरुतेतीदंकुरुतेति। तदुहतयाचीयतइति।
हेइन्द्राग्नी अपात् पादरहितागद्या इयंवाक्। पूर्वाआअगात् आगता। पद्वतीभ्यः पादव-

तिंषावाधतेतमंः ॥ ८२ ॥ इन्द्रांग्नीऽअपात् ॥ इन्द्रांग्नीऽअपादिय
म्पूर्व्वागांत्पद्वतीभ्यः ॥ हित्वीशिरोजिह्व्वयाव्वावदच्चरंत्ति ६ शत्प
दान्न्यंक्रमीत् ॥ ८३ ॥ देवासोहिष्म्मा ॥ मनवेसमंन्यवोव्विप्रुवेंसा

तीभ्यःसकाशात्। हित्वीहित्वापरित्यज्यशिरः प्रथमंपदम् अन्यत्करोति। नहिलौकिक्यावाचः
कश्चित्पदनियमोस्ति। जिह्वया। विदुषः वावदत्वदन्ती। चरत्चरति। कियन्तितत्रपदानि।
विंशत्पदानि। विंशत्संख्याकानिपदानि अक्रमीत्अतिक्रामति। नहिपरतः त्राणविषयः ॥ ८३ ॥
देवासोहिष्मा। हिस्मनिपातौ। येदेवासः मनवेसमन्यवः मनुनासमानदीप्तयः समानक्रोधावा।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विसृष्टेवैसासकंह उपास्याः । संरातयः समानदानाश्च । तेविष्टेदेवाः नःअस्माकम् अद्य । तेचअपरम् आगामिकाले । तुचेतुनः । तुगित्यपत्यनाम । अपत्यायच अस्मदीयाय । भवन्तु । वरिवोविदः । वरिवोधनं येअस्मदर्थंविन्दन्ति तेवरिवोविदः ॥ ६४ ॥ अपाधमत् । प्रथमोर्द्व-र्चःपरोक्षकृतः द्वितीयःप्रत्यक्षकृतः अतोवाक्यभेदः पदसन्नतिर्वैकस्मिन्नर्द्धर्चे । अपाधमत् धमतिर्गति-कर्मा । यदा अपगमयति । अभिशस्तीः अभिशापान् अशस्तिहा अभे रादिशेषः । अभिशस्तिहा

कꣳसरांतयꣳ॥ तेनोऽअद्यतेऽअपरन्तुचेतुनोभवन्तुव्वरिवोविदः॥६४॥ अपाधमत् ॥ अपाधमदभिशस्तीरशस्तिहाथेन्द्रोद्युम्न्याभवत् ॥ देवास्तऽइन्द्रसख्याययेमिरेवृहद्भानोमरुद्गण ॥ ६५ ॥ प्रवः॥ प्रव

स्वतएव । अथानन्तरम् इन्द्रःद्युम्नी अन्नवान्यशस्वीवा आअभवत्भवति । एवंस्तुतइन्द्रः प्रत्यक्षी-भूतः । इतउत्तरोर्द्धर्चःप्रत्यक्षकृतः । देवाः तेतव हेइन्द्रसख्यायसखिभावाय येमिरे आत्मानंसंयतंकृत वन्तः हेवृहद्भानो महादीप्ते । हेमरुद्गण एकवाक्यतु बहूनांपदानां सन्नतिःकार्या ॥ ६५ ॥ प्रवः । प्रथमावहुवचनस्य वआदेशः । प्रार्चतप्रोच्चारयत वःयूयम् स्तुतीः इन्द्राय वृहतेमहते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हेमरुतः । ब्रह्मवयौलक्षणाः किमितिचेत् । हतंहनति हन्तीतिप्राप्तेशपःअवणम् । हत्वहा हतवधप्रवणः शतक्रतुः वज्रकर्मा । वज्रेण शतपर्वणा शतग्रन्थिना ॥ ९६ ॥ अस्येत् । असादृत् इतिनिपातःपादपूरणः । मदे सुतस्यविष्णावि विष्णुर्यज्ञः । यज्ञे अभिषुतस्य मदेसंजाते

ऽइन्द्रायब्रह्मुतेमरुतोब्रह्मार्च्चत ॥ वृत्रꣳहंनतिवृत्रहाशतक्रतुर्व्वज्रेणशतपर्व्वणा ॥ ९६ ॥ अस्येत् ॥ अस्येदिन्द्रोवावृधेवृष्णण्युꣳशवो मदेसुतस्यविष्णवि ॥ * अद्यातमस्यमहिमानमायवोनुष्टुवन्तिपूर्व्वथा ॥ दुमाऽउत्वायस्यायमयꣳसहस्रमूदूर्ध्वऽऊषुणः ॥ ९७ ॥ [१३]

इतिसंहितापाठेत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

यदिन्द्रोवावृधेवृद्धश्च । वृष्णंरसेक्तृत्वम् आविष्करोति । शवोबलञ्च आविष्करोति । तस्यास्य इन्द्रस्य अद्यअद्यापि संमहिमानतं आयवःमनुष्याः अनुष्टुवन्ति । पूर्वथापूर्ववत् यथापूर्वमृषिभिःस्तुतः । दुमाउत्वा यस्यायम् । अयꣳसहस्रम् । ऊदूर्ध्वऊषुणः इतिचतस्रः प्रतीकोक्ताव्याख्याताः ॥ ९७ ॥

इतिउवटकृतौ मन्त्रभाष्ये त्रयस्त्रिंशोध्यायः ॥ ३३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

(१) यज्जाग्रत: । षट्त्रिंशदक्षरस्त्रिष्टुभो मनोदेवत्या: । अस्मिन्नध्याये लैङ्गिकोविनियोग: । लिङ्ग-चसामर्थ्यमुच्यते । अभिधा नशक्ति: । यन्मन: जाग्रत: पुरुषस्य दूरम् उदैतिउद्गच्छति चक्षु:प्र-भृतीन्यपेक्ष्य । यच्चदैवम् देवोविज्ञानात्मा सोनेनगृह्यत इतिदैवम् । उक्तञ्च । मनसैवानुद्रष्टव्यं मेतद्प्रमेयं ध्रुवमिति । तदुसुप्तस्य तद:स्थाने यदोट्टत्ति: । उकार:समुच्चयार्थीय: । यच्चमन:

* यज्जाग्रंतः ॥ यज्जाग्रंतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैतिं ॥
दूरङ्गमज्योतिषाज्योतिरेकन्तन्मेमनः शिवसङ्कल्पमस्तु ॥ १ ॥

सुप्तस्य तथैवतेनैवप्रकारेणएति । यच्चदूरंगमम् दूरंगच्छतीतिदूरंगमम् । अतीतानागतवर्त-मानव्यवहितविप्रकृष्टगृह्णाति । ज्योतिषांसोवादीनां विज्ञाननेतृणां मध्येएकमेवज्योति: । तत् मेमन: शिवसंकल्पम् । संकल्प:कामम्मूलपदार्थसंस्त्यादे: सुरूपताज्ञानवत: कामप्रभृति । शान्त संकल्पम् अस्तुभवतु ॥ १ ॥ येनकर्माणि । येन मनसा सताकर्माणि । अपस: अपद्रूतिकर्मनाम

(१) अनारभ्याधीतोऽध्याय: आ पिटमेधात् आदित्ययाज्ञवल्क्यादृष्टा मन्त्रा: पाठे विनियुक्ता: ॥ षड्त्रिंशदक्षरस्त्रिष्टुभो मनो-देवत्या: शिवसङ्कल्पदृष्टा: ।

* यज्जाग्रतःपंचनव्यःसोमोधेनुमाक्रष्णेनपूषन्तवदग्रकानतदष्टौषडष्टापंचाशत् ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तद्धितलोपः । अपश्चिनःकर्मवतः । मनीषिणःमेधाविनः । यज्ञेकरवन्तिकुर्वन्ति । विदथेषु-वेदनेषु यज्ञविधिविज्ञानेषु धीराःधीमन्तः । यच्चअपूर्वम् । नविद्यतेपूर्वमिन्द्रियंयस्मात्तदपूर्वम् यद्वा अपूर्वमनपरम् यच्च यज्ञम्पूज्यम् । यच्च अन्तर्मघेव प्रजानामास्ते । तन्मेमनइतिव्याख्यातम् ॥२॥

येनकर्म्माणि ॥ येनकर्म्माणयेपसोमनीषिणो यज्ञेकुरवन्तिविदथे षुधीराः ॥ यदपूर्व्वंयक्षमन्तः प्रजानान्तन्मेमनः शिवसङ्कल्प मस्तु ॥ २ ॥ यत्प्रज्ञानम् ॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्योतिर न्तरमृतंप्रजासु ॥ यस्मान्नऋतेकिञ्चनकर्म्मक्रियतेतन्मेमनः शिवसङ्कल्पमस्तु ॥ ३ ॥ येनेदम् ॥ येनेदम्भूतम्भुवनम्भविष्यत्परि

यत्प्रज्ञानम् । यन्मनःप्रज्ञानम् विशेषप्रतिपत्तिप्रज्ञाम् । उत अपिच चेतः । सामान्यप्रतिपत्ति-चेतः धृतिश्चप्रसिद्धा । यन्मनः अन्तर्ज्योतिरमृतञ्चप्रजासु । यस्मान्नऋते येनचविना नकिञ्च-नकर्मक्रियते । तन्मेमनइतिव्याख्यातम् ॥ ३ ॥ येनेदम् । येनमनसा इदंभूतंभूतकालम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भुवनंवर्त्तमानकालम् । भविष्यत्कालञ्च । परिगृहीतम् । अद्यतेनसर्वम् । येनचमनसा यज्ञ-स्तायते तन्यते सप्तहोता । सप्तहोतारोह्यग्निष्टोमेभवन्ति । तन्मे मनइतिव्याख्यातम् ॥ ४ ॥ यस्मिन्नृचः यस्मिन्यजूंषिसामानि यस्मिन्प्रतिष्ठिताः । यस्मिन्नसिक्तचः प्रतिष्ठिताः । यस्मिन्सामानिप्रतिष्ठितानि । यस्मिन्यजूंषिप्रति-

गृहीतमृतेनुसर्व्वम्॥ येनंयुज्ञस्तायतेसुप्तहोंतातन्मेमनंः शिव संङ्कल्पमस्तु ॥ ४ ॥ य स्मिन्नृचंः ॥ यस्मिन्नृचुः सामुयजू'ंषि यस्मिन्नुन्प्रतिंष्ठितारथनाभाविवाराः॥ यस्मिँश्चित्तर्ठ० सर्व्वमोतं म्प्रजानान्तन्मेमनंः शिवसंङ्कल्पमस्तु ॥ ५ ॥ सुषारथिरश्वांनिव ॥ सुषारथिरश्वांनिवयन्मंनुष्यान्नेनीयतेभीशुंभिर्व्वाजिनं

ष्ठितानि । कथमिव । रथनाभौइव आराः । यस्मिन् चित्तंसंज्ञानम् सर्वम् तदयतस्या-र्थस्य । ओ तन्निच्चिप्तम् तन्तुमंततमिवकृतम् प्रजानाम् । तन्मेमनइतिव्याख्यातम् ॥ ५ ॥ सुषारथिः । यन्मनः मनुष्यान् । नेनीयते अत्यर्थन्नयति । कथमिव सुषारथिः कल्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

णासारथिः अश्वान् इव । यन्मनुष्यान् । यज्ञमनः सुषारथिरिव । अभीशुभिः प्रग्रहैः वाजिनइववेजनवतोश्वानिव । यमयतीतिशेषः । हेउपमे एकवचनमन्यत्वनियमनमर्थः यज्ञहृत्प्रतिष्ठम् । तन्मेमनः शिवसंकल्पमस्तु ॥ ६ ॥ पितुन्नु । अन्नस्तुतिः । उष्णिगनुष्टुब्बार्भा । द्वितीयोर्द्वर्चः प्रथमंव्याख्यायते यच्छब्दयोगात् यस्यापितोः अन्यस्यस्तितः विस्थानः इन्द्रः ओजसाबलेन । वृत्रम् ।

ऽइव ॥ हृत्प्रतिष्ठँयदजिरञ्जविष्ठन्तन्मेमनः शिवसंङ्कल्पमस्तु ॥ ६ ॥ पितुन्नु ॥ स्तोषम्महोधर्म्माणन्तविषीम् ॥ यस्यंस्तितोव्योजसाव्वृत्रंव्विपर्व्वमर्दयत् ॥ ७ ॥ अन्वित् ॥ अन्विदनुमतेत्व

विपर्वविपर्वाणम् विगतसन्धिवन्धनंकृत्वा । व्यमर्दयत् विविधंमर्दितवान् । तम् पितुम् अन्नम् नुरनर्थकः । स्तोषमस्तौमि । महःमहतः धर्माणम्धारयितारम् । तविषीम् तविषाः इतिविभक्तिव्यत्ययः । तविषीतिबलनाम । तवतेर्वृद्धिकर्मणः बलस्य ॥ ७ ॥ अन्वित् । चतस्रोनुष्टुभः । अनुमन्यासै अनुमन्यस्व । इदितिनिपातः पादपूरणः । हेअनुमते । त्वम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शंचसुखंच नःअस्माकम् क्रधिकुरु हेअनुमते । क्रत्वेक्रतवे संकल्पाय । दक्षायतत्समृद्धये संकल्पसिद्धयेच । नःअस्मान् हिनुगमय । प्रणआयूंषितारिषः । प्रतारिषः प्रवर्द्धयच नः अस्माकमायूंषि ॥ ८ ॥ अनुनः । अनुमन्यताम् । नःअस्माकम् अद्यअनुमतिः यज्ञम् देवेषुयज्ञियेषु । अग्निश्चअनुमन्यताम । हव्यवाहनः हविषोवोढा । भवतंभवतामितिपुरुषव्यत्ययः ।

म्मन्न्यासैशञ्चंनस्क्रधि ॥ क्रत्वेदक्षायनोहिनुप्प्रणऽआयूंऽषितारि षः ॥ ८ ॥ शतम् ॥ १८०० ॥ अनुंनः ॥ अनुंनोद्यानुंमतिर्य्युज्ञन्देवे षुंमन्न्यताम् ॥ अग्गिनश्चंहव्यवाहंनोभवंतन्दाशुषेमयंः ॥ ९ ॥ सि नीवालिपृथुंष्टुके ॥ सिनीवालिपृथुंष्टुकेयादेवानामसिस्वसां ॥

दाशुषेहवींषि दत्तवतेयजमानाय । मयःसुखरूपौ ॥ ९ ॥ सिनीवालि । सिनीवालीदेवपत्नी । हेसिनीवालि । हेपृथुष्टुकेपृथुसंयमितकेशभारे । माहास्तुतिर्वा पृथुष्टुका । यात्वंदेवानाम् असिभवसि स्वसाभगिनी । तांत्वांब्रवीमि । जुषस्व प्रीत्यापरिगृह्णीष्व हव्यंहविः । आहुतमभि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हुतमग्नौ । प्रजांच हेदेविदिदिड्ढि । दिशअतिसृज देहि नःअस्मभ्यम् ॥ १० ॥ पञ्चनद्यः सरस्वतीम् । नदीदेवतायाः पञ्चनद्यः हृषद्वती शतद्रूश्चन्द्रभागाविपाशेरावती त्यादिकाः । सरस्वतीम् अपियन्तिअपिगच्छन्ति । सस्रोतसः । समानानिस्रोतांसि यासां तास्तथोक्ताः । सरस्वतीतु । तुशब्दोवधारणार्थः । सरस्वत्येवपञ्चधा । सोसाचस्वदेशेभवत् भवतिसरित् नदी ।

जुषस्वंहुव्यमाहुतम्प्रजान्देविदिदिड्ढिनः ॥ १० ॥ [१०] पञ्चंनद्यः ॥ पञ्चंनद्यः सरंस्वतीमपिंयन्तिसस्रोतसः ॥ सरंस्वतीतुपंञ्चधासोदेशेभंवत्सरित् ॥ ११ ॥ त्वमंग्ने ॥ प्रथमोऽअङ्गिंराऽऋषिर्देवो देवानांमभवः शिवः सखा ॥ तवंव्रतेकुवयोविद्मनापसोजायन्तमु

तस्यांहिसारस्वतानि सत्राणिभवन्ति ॥ ११ ॥ त्वमग्ने । चतस्त्रआग्नेय्यः । द्वे जगत्यौ अन्येत्रिष्टुबनुष्टुभौ । हेअग्ने त्वम्प्रथमआद्यः अङ्गिराःऋषिः अभवः । त्वंचप्रथमः देवःदेवानामभवः । शिवःकल्याणः सखासमनख्यानः । किञ्च तवव्रतेकर्मणिवर्त्तमानाः कवयःक्रान्तदर्शनाः । विद्मनाअपसः अपइतिकर्मनाम । विदितकर्माणः । अजायन्तसंभृताःमरुतः । भाजन्यः ऋष्टयःखड्गा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

येषांते भाजदृष्टयः। योहिशत्रून्जयति भाजन्तेतस्यायुधानि ॥ १२ ॥ त्वन्नः। विष मोयंमंत्रः साध्याहाः। त्वंनःअस्माकम् हेअग्ने आश्रयदूतिशेषः। अथैवंसति। तव हेदेव। पायुभिः पालनैः धैर्य्यावलम्बिभिः पालिताःसन्तः आस्महे। किञ्च मघोनोरक्ष धनानिरक्ष। तन्वः शरीराणिचरक्ष। हेवन्द्य वंदितव्य। कस्मात्पुनस्त्वमेवमुच्यसे। यतःस्वभावतएवत्रातातोकस्यपु-

रुतोभ्भाजंदृष्टयः ॥ १२ ॥ त्वन्नंः ॥ त्वन्नोऽअग्नेतवंदेवपायुभिं र्म्मघोनोरक्षतुन्वश्चवन्द्य ॥ त्रातातोकस्यतनयेगवांमस्यनिंमेषꣳ र क्षंमाणस्तवंव्रते ॥१३॥ उत्तानायामवं ॥ भराचिकित्वान्त्सुद्यः प्रवीं तांव्वृषंणञ्जजान ॥ अरुषस्तूपोरुशंदस्यपाजऽइडायास्पुत्रोव्वयुनेंज

त्रस्य। तनयेतनयस्यपौत्रस्यच। गवांचअसि। कथम्। अनिमेषम् रक्षमाणः। प्रमादमकुर्वन्र-क्षमाः। एवंचेत् मृदुहृदयतमोसि। तवव्रतेतवकर्मणि वयंस्याम। अन्यादेवताः परित्यज्यत्वामे-वपरिचरामइत्यभिप्रायः ॥ १३ ॥ उतानायामव। द्वितीयोर्द्धर्चःप्रथमंव्याख्यायते योग्यत्वात्। योयम् अरुषस्तूपः। ज्वालासंघातमूर्तिः। यस्यचास्य रुशत्पाजःदीप्तंबलम्। यश्च इडायाःपृथिव्याःपुत्रः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यश्च वयुनेप्रज्ञाने कर्त्तव्येऽजनिष्टजातः तमग्निम्। उतानायाम् अरण्याम्अवभर। अवाचीनं-हर। चिकित्वान्जानानः अरण्यावीर्यमितिशेषः। किन्तद्वीर्यमितिचेत्। सद्यः प्रवीताबृषणं-जजान। सद्यएवप्रवीताकामितासती बृषणंवर्षितारंसेक्तारं युवानंसर्वकर्मक्षमंजनयतीति ॥ १४ ॥ इडयास्त्वा। इडयाःपृथिव्याः त्वाम्। पदेदेवयजनाख्ये। वयम्नाभानाभौ पृथिव्याअधि। उतर-

निष्ट्र ॥१४॥ इडायास्त्वा॥ पदेव्वयन्नाभांपृथिव्याऽअधि॥ जातवेदो निधीमह्यग्नेहव्यायवोढवे ॥ १५ ॥ प्रमन्म्महे ॥ शवसानायशू षमांङ्गूषङ्गिर्व्वणसेऽअङ्गिरस्वत्॥ सुवृक्तिभिस्तुवतऽऋंग्मियायार्च्चा

वेद्यं। नाभिकाभवति तद्विषयमेतत्। हेजातवेदः जातप्रज्ञान निधीमहिस्थापयामः। हेअग्ने हव्यायवोढवे हविषोवहनाय ॥ १५ ॥ प्रमन्महे। चतस्रऐन्द्र्यस्त्रिष्टुभः। प्रमन्महेप्रजानीमः। शवसानाय। वलमाविष्कुर्वते। शूषंवलम्। आङ्गूषम्आघोषंस्तोमम्। गिर्वणसेदेवाय। कथ-मिव। अङ्गिरस्वत्। अङ्गिरसातुल्यप्रज्ञानायच। सुवृक्तिभिःस्तुवते। सुवृक्ताभिःशो भनाभिः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तुतिभिः । स्तुवन्तीतिविभक्तिव्यत्ययः सामर्थ्यात् । ऋग्मियायर्क्सामयाय स्तुतिमयाय । अर्चनीया-
यच । वयम्अर्चामः अर्कम्उच्चारयामःमंत्रम् । नरेन्द्ररूपाय । विश्रुताय । शौर्यबलदानादिल-
ब्धख्यातये ॥ १६ ॥ प्रवः । सामर्थ्याद्वितीयोर्ङ्चःप्रथमंव्याख्यायते । येनसाम्ना नःअस्माकम् ।
पूर्वेपितरःपदज्ञाः आत्मसत्तत्ववेदिनः । अर्चन्तःस्तुवन्तः अङ्गिरसःऋषयः गाःअविन्दन् । आदि-

मार्क्कन्नरेविश्रुताय ॥ १६ ॥ प्रवेः ॥ प्रवोमुहेमहिनमोभरध्वमाङ्गूष्यꣳशवसानायसामं ॥ येनानुःपूर्वेपितरःपदज्ञाऽअर्चन्तोऽअङ्गिरसोगाऽअविन्दन् ॥ १७ ॥ दुच्छन्तित्वा ॥ सोम्यासुःसखायꣳसुन्व

त्यरश्मीन्लब्धवन्तः । सहिसाम्नांलोकः । तत्साम । प्रभरध्वम् । आहरध्वम् । वःप्रथमावहुव-
चनस्यस्थानेवआदेशः । यूयम् हेपुत्रपौत्रप्रपौत्राः । महेमहतेइन्द्राय । महिमहत्त्वम् । नमः
अन्नम् आङ्गूष्यम् स्तोमस्यचहितम् साम । प्रभरध्वम् । सवसानाय । वलमभिलषमानाय ॥ १७ ॥
दुच्छन्तित्वा । दुच्छन्तित्वाम् । सोम्यासःसोमसंपादिनः । सखायःसमानख्यानाः । कर्षंसमान-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ख्यानाः । श्रुतौ । इयावैदेवाः । अहैवंदेवाः । अथयेब्राह्मणाःशुश्रुवांसोनूचानाः तेमनुष्यदेवाइति । केनप्रकारेणइच्छन्ति । सुन्वन्तिसोमम् अभिषुण्वन्तिसोमम् । दधतिप्रयांसि । प्रयइत्यन्ननाम । धारयन्तिच हविर्लक्षणान्यन्नानि । किञ्च । तितिक्षन्तेअभिशस्तिंजनानाम् । मनोवाक्कायसंयता क्षान्तिपराः । अभिशस्तिन्दुर्वचनंजनानांसहन्ते । अथैवंत्वामिच्छताम् हेइन्द्र । त्वत् त्वत्तःशक्तासात् आसमन्ताद्भावेन । कःचन । चनोनिपातोप्यर्थे । हिरनर्थकः । कोपि । प्रकेतः

न्तिसोमन्दधंतिप्रयांऽसि ॥ तितिक्षन्तेऽअभिशस्तिञ्जनानांत्वामिन्द्र त्वदाकश्चनहिप्रंकेतः ॥ १८ ॥ नते ॥ दूरेपरमाचिद्वृजाऽस्यान्तुप्रयांहिहरिवोहरिंभ्याम् ॥ स्थिरायुव्वृषणेसवनाकृतेमायुक्ताग्रावा

प्रज्ञानविशेषः । अत्यर्थंभवति । यजमानानामितिशेषः ॥ १८ ॥ नते । नहितेतव दूरेपिपरमापरमाणिविप्रकृष्टदेशानि । रजांसिस्थानानि । एवंचेत् । आप्रयाहिआयाहि त्वतूर्णम् । हेहरिवः हरिभ्याम्अश्वाभ्याम् । किमर्थम्स्थिरायहृढसौहृदाय। वृषणेसेक्त्रे । सवनाकृतेमा । सवनानिकृतानिइमानि । किञ्च । युक्ताःअभिषवकर्मणि । ग्रावाणः । समिधानेसमिध्यमानेच अग्नौ-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आहवनीयाख्ये आहुतयःहोप्यन्ते। अतश्चआयाहि ॥ १९ ॥ अषाढंयुत्सु। अषाढम्असोढम। युत्सुयुद्धेषु। पृतनासुसैन्येषु। पप्रिम्। पृपालनपूरणयोरित्यस्यैतद्रूपं नतुप्रापूरणइत्यस्य। पप्रिंपालनशीलम्। स्वर्षाम्स्वर्दिवंसनोतिसतथातम्। अप्साम्अपःसनोतिसंभजते सतथातम्भजनस्यगोपाम्। वलस्यगोप्तारम्। भरेषुजाम्। जयतेरेतद्रूपंनतुजानतेः। संग्रामेषुजेतारम्। सुचि-

वांणः समिधानेऽअग्नौ ॥ १९ ॥ अषाढंयुत्सु ॥ पृतनासुपप्रिंस्वर्षामप्सांवृजनंस्यगोपाम् ॥ भरेषुजाꣳसुक्षितिꣳसुश्रवंसंजयन्तन्त्वामनुमदेमसोम ॥ २० ॥ [१०] सोमोधेनुम् ॥ सोमोधेनुꣳसोमोऽअ

तिम। सुनिवासम्। शवसम्कल्याणकर्मकर्तृत्वेनप्रसिद्धम्। जयन्तंत्वाम्अनुमदेम। मदेर्मोदनार्थस्यग्रहणम। परसैन्यानिजयन्तंत्वांदृष्ट्वा उत्साद्यन्ते तत्दृष्ट्वाप्रहृष्टाःस्याम हेसोम ॥ २० ॥ सोमोधेनुम्। सोमःधेनुन्ददाति। सोमएवअर्वंगतमश्वम् आशुम्शीघ्रगतिंददाति। सोमएवचवीरंपुत्वम् कर्मण्यम्कर्मणिसाधुंददाति। तमेवविशिनष्टि। सादन्यंसदनेसाधुम्। विदथ्यंविदथेयज्ञे-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

साधुम । सभेयम् सभामर्हतिसभेयस्तम् । पितृश्रवणम् पितुरनुशासनेचस्थितम् विनीतमित्यर्थः । यःयजमानःददाशत्अस्मैसोमायहविः तस्मैसोमोधेन्वादीन्ददातीत्यभिसंबन्धः ॥ २१ ॥ त्वमिमाः । हेसोम त्वम् इमाःओषधीः विश्वाःसर्वाः अजनयः जनितवानसि त्वम् अपःअजनयः । त्वम्गाःअजनयः । त्वम्आततन्थ आततवानसि उरुविस्तीर्णमन्तरिक्षम् । त्वंज्योतिषावितमोववर्त्थ

व्वन्तमाशुꣳसोमोव्वीरङ्गम्मꣳयन्ददाति ॥ सादन्यꣳविदथ्याꣳसभेयं म्पतिꣳश्रवणंय्योददाशदस्मै ॥ २१ ॥ त्वमिमाꣳ ॥ त्वमिमाऽओषंधीꣳ सोमविश्व्वास्त्वमपोऽअंजनयुस्त्वङ्गाꣳ ॥ त्वमातंतन्थोर्व्वन्तरिंक्षन्त्व ज्ज्योतिंषाव्वितमोंव्ववर्त्थ ॥ २२ ॥ देवेनंनꣳ ॥ देवेनंनोमनंसादेव

विष्टणोषितमः । त्वमेवादित्यात्मनातमोपनयसि । सर्वात्मत्वेनस्तुतिः ॥ २२ ॥ देवेनन: । दैवेनेतिप्राप्ते तद्धितलोपश्छान्दसः । दैवेनमनसामहनःअस्मभ्यम् । रायोभागम्धनस्यभागम् । सहम्शब्दःबलवचनः सान्तः तत्र अकारागमश्छान्दसः । हेसहस्वन् अभियुध्य । युध्यतिर्गत्यर्थानांमध्ये-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पठ्यते अन्तर्भावितण्यर्थश्चगच्छते । अभिगमयदेहीत्यर्थः । एवंदानप्रवृत्तन्त्वांकश्चित्प्रतिवक्षीयादित्यतआह । माचक्त्वाम् आतनत् । तनोतिःप्रतिवन्धार्थः । प्रतिवक्षातु कुतस्त्वमेवमुच्यसइतिचेत् । ईशिषेवीर्यस्य यतस्त्वं स्वकीयस्यवीरकर्मणः ईशिषेईश्वरोयस्त्वमित्यभिप्रायः । किञ्चउभयेभ्यः प्रचिकित्सउभयलोकप्राप्त्यर्थं व्याधप्रगंकुर्वित्यभिप्रायः । गविष्टौ गोशब्देनात्रद्युलोकोभिप्रेतः । स्वर्गैषणायाञ्चविषयभूतायाम् अस्मान् प्रचिकित्स । देवंमनःप्राप्य लब्धधना अरोगाश्च यथा-

सोमरायोभागꣳ संहसावन्नभियुंड्ग्धि ॥ मात्वातनदीशिषेवीर्य्यस्योभयेभ्युःप्रचिकित्सागविष्टौ ॥ २३ ॥ अष्टौव्यख्यत् ॥ अष्टौव्यंक्वात्ककुभः पृथिव्यास्त्रीधन्वयोजनासप्तसिन्धून् ॥ हिरण्याक्षः सं

स्वर्गंयास्यामस्तथाकुर्वितिवाक्यार्थः ॥ २३ ॥ अष्टौव्यख्यत् । चतस्रःसाविव्यः द्वितीयाजगतीत्रिष्टुभोन्याः । यःअष्टौव्यख्यत् प्रकाशितवान्ककुभःदिशः । चतस्रोदिशः चतस्रोवान्तरदिशः । पृथिव्याः संबन्धिनीः । त्रीधन्व । त्रीणिधन्वानि द्युतिशब्दसमाधिः । धन्वद्युत्यन्तरिक्षनाम तदुपलक्षितावितरावपिलोकौगृह्येते । क्षयिणोयान्तीतियथा । यश्च त्रीन्लोकान्व्यख्यत् । यश्चयोजनान् योजनगव्यूतिक्रोशादीन् मानविशेषान्व्यख्यत् । यश्चसप्तसिन्धून् यश्चसप्तसमुद्रान् व्यख्यत् । सोयंहिरण्याक्षः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हिरण्यसदृशात्रः । अमृतदृष्टिर्वा सवितादेवः आअगात्आगतु । किंकुर्वन्नित्यतआह । दधत्स्थापयन् रत्नानिरत्नमयानि धनानि । दाशुषेहवींषि दत्तवतेयजमानाय । वार्याणिवरणीयानि ॥ २४ ॥ हिरण्यपाणिःसविता । सुवर्णपाणिः सविता । विचर्षणिः विविधंयष्टा कृताकृतप्रत्यवेक्षकः । उभेद्यावापृथिवी अन्तःअधिकरणश्रुतेर्योग्यक्रियायाअध्याहारः । मध्येस्थितः ईयतेएतियदा । अथतदा अपामीवांबाधते अमीवांव्याधिम् । वेति विगतिकर्मा । गच्छति सूर्यंसूर्यरूपमवस्थाय ।

वितादेवऽआगाद्दधद्रत्नादाशुषेव्वार्य्याणि ॥ २४ ॥ हिरण्यपाणिःसविता ॥ विचर्षणिरुभेद्यावापृथिवीऽअन्तरीयते ॥ अपामीवाम्बाधते वेतिसूर्य्यमभिकृष्णेनरजसाद्यामृणोति ॥२५॥ हिरण्यहस्तोऽअसुरः ॥ सुनीथःसुमृडीकःस्ववांयात्वर्व्वाङ् ॥ अपसेधन्रक्षसोयातुधानानस्थात्

ततोस्तमनकाले । अभिकृष्णेनरजसाद्यामृणोति । अभिमृणोतिअभिव्याप्नोतिकृष्णेनरजसातमोलक्षणेन । द्यादुलोकम् ॥ २५ ॥ हिरण्यहस्तः । द्वितीयोर्द्वर्चःप्रथमंव्याख्यायतेसामर्थ्यात् । यःअपसेधन् अपगमयन् रक्षसःयातुधानाञ्चअमुखकारकान् । अस्थात्उदस्थात् । देवः प्रतिदोषंगृणानः । श्रुतिस्मृतिविहितधर्मपराङ्मुखानां यावन्तोदोषास्तावतःस्तुवन् उच्चारयन् गणयन्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उपभोगार्थमित्यभिप्रायः। सोयंसविता हिरण्यहस्तः हिरण्यदानार्थंहस्तौयस्यसतथोक्तः। रूपेण-
वास्तुतिः। असुरःरादाने असून्प्राणान्ददातीत्यसुरः। सुनीथः नीयास्तुतिः। कल्याणस्तुतिः।
सुमृडीकःसाधुसुखयिता। स्ववान् आत्मीयज्ञातिधनवचनः स्वशब्दः। यातुआयातु। अर्वाङ्अ-
र्वागञ्च नःअस्मभनभिमुखः॥ २६॥ येतेपन्थाः। येतेतवपन्थाः पन्थानइतिवचनव्यत्ययः। हेसवितः

हेवः प्रतिष्टोषङ्गृणानः॥ २६॥ येते॥ येतेपन्थांःसवितःपूर्व्यासो
रेणवः सुकृताऽअन्तरिक्षे॥ तेभिर्नोऽअद्यपथिभिः सुगेभीरक्षाच
नोऽअधिचब्रूहिदेव॥ २७॥ उभापिबतम्॥ उभापिबतमश्विव

पूर्व्यासः पूर्वेष्वपिकालेषुभवाः। अरेणवः अपांशुलाः। सुकृताःसाधुकृताः धावा। अन्तरिक्षे
तेभिः तैः नःअस्मान् अद्यनयेतिशेषः। पथिभिः सुगेभिः साधुगमनैः अन्नपानप्रभृतैर्गच्छतः
रक्षाच रक्षच नःअस्मान्। अधिचब्रूहि। अङ्गीकृत्यचब्रूहि। यथाएतेअस्मदीयाइति। यद्वा यद-
स्माकं हितंपथ्यं तदधिब्रूहि उपदिश हेदेवदानागुणयुक्त॥ २७॥ उभापिवतम्। आश्विन्य-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्तिस्रः एकागायत्रीद्वेत्रिष्टुभौ। उभौसोमंपिवतम् हेअश्विनौ। पीत्वाचसोमम् उभावपि नःअस्मभ्यम् शर्मशरणं प्रयच्छतमदत्तम्। किञ्च अविद्रियाभिः दृविदारणे अविदीर्णाभिः अनवखण्डिताभिः ऊतिभिरवनैः रक्षतमितिशेषः॥ २८॥ अप्रस्वतीम्। अप्रवृतिकर्मनाम कर्मवतीम हेअश्विनौ वाचम् अस्मेअस्माकम कृतंकुरुतम्। किञ्च नःअस्माकम् हेदस्रौदर्शनीयौ हेवृषणौवर्षितारौ युवानावित्यर्थः। मनीषांमनसःसंबन्धिनीमिच्छांच। अप्रस्वतीमेवकृतम्। कस्मात्पु-

नोभानुःशर्म्मयच्छतम्॥ अविद्रियाभिरूतिभिः॥ २८॥ अप्रस्वतीम प्रिश्वना॥ अप्रस्वतीमप्रिश्वनाव्वाचंमस्मेकृतन्नोदस्राव्वृषाणामनीषाम्॥ अद्यूत्येवंसेनिह्वयेवांव्वृधेचंनोभवतंव्वाजंसातौ॥ २९॥ द्यूभिरक्तुभिः॥ द्यूभिरक्तुभिꣳ परिपातमस्मानरिष्टेभिरश्विना

नरहमेवंब्रवीमि। यतःअद्यूत्येअवसे। द्यूतेभवमवसमन्नंद्यूत्यम्। दूतादागतं कर्मणंनभवति अतएवमुच्यते। अद्यूत्ये अन्नेनिमित्तभूते। निह्वयेवाम्आयामियुवाम्। आगत्यच। वृधेवर्द्धनायच नःअस्माकम्भवतम्। वाजसातौ वाजसंभजननिमित्तभूते संग्रामेच यज्ञेवावर्द्धनायैवभवतम्॥ २९॥ दूभिरक्तुभिः। द्युभिरहोभिः कारणभूतैः अक्तुभिः अक्तुरात्रिः रात्रिभिश्च कारणभूताभिः।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अधिकरणविवक्षावा । कालेहि दूषुराविषुवा । परिसर्वतःपातम् परिपालयतम् युवाम्अ- स्मान् । नकेवलमुदाभिरक्तुभिः परिपातमस्मान् । किंतर्हि । अरिष्टेभिःअनुहिंसितैः हेअश्विनौ- सौभगेभिः । भगइतिधननाम । शोभनैश्चधनैः । योजयतमित्यध्याहारः । तत् नःअस्माकम्मित्रः वरुणश्च मामहन्तांपूजयन्ताम । अदितिश्चसिन्धुश्च पृथिवीचउतअपिचद्यौः ॥ ३० ॥ आकृष्णेनेतिव्या-

सौभगेभिः ॥ तन्नोमित्रोव्वरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउ तद्यौः ॥३०॥ [१०] आकृष्णेन ॥ रजसाव्वर्त्तमानोनिवेशयन्नमृतम्म र्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ३१ ॥ आरात्रि ॥ पार्थिवꣳरजः पितुरप्रायिधामभिः ॥ दिवः सदाꣳसि

स्थातम ॥ ३० ॥ आरात्रि । रात्रिदेवत्याबृहती । हेरात्रियात्वम् आअप्रायिआअपूपुरःआपूरयसि । पार्थिवंरजःपृथिवीसंबन्धिलोकम् पितुः मध्यमस्यलोकस्यधामभिःस्थानैःसह । याचत्वम् दिवःद्युलो- कस्यसदांसिस्थानानि । बृहतीमहतीविति षष्ठेआक्रामसि । यस्याश्चते । तथापिआवर्त्तते । त्वेषंम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हाप्राग्भारंदीप्तंवातम:तांत्वांस्तुम: ॥ ३२॥ उषस्तत्। उषोदेवत्यापरोष्णिक्। हेउष: तत्चित्रंचायनीयं महनीयंधनम्आभर आहरअस्मभ्यम् हेवाजिनीवतिअन्नवति । येनधनेनतोकंच तनयंचपौत्रंच धामहे दधमहे ॥ ३३ ॥ प्रातरग्निम् वहुदेवत्याजगती। प्रात:शब्दो विप्सावचन: । प्रात:प्रात: पुन:

बृहतोविभित्थसुआक्षेषंब्वर्त्ततेतमः ॥ ३२ ॥ उषस्तत् ॥ उषस्तच्चित्रंचमाभंगास्मभ्यंब्वाजिनीवति ॥ येनंतोकञ्चतनंयञ्चधामंहे ॥३३॥ प्रातरग्निम् ॥ प्रातरग्निम्प्रातरिन्द्रंठं० हवामहेप्रातर्मित्रावरुणाप्रा तरश्विना ॥ प्रातर्भगंम्पूषणम्ब्रह्मंणस्पतिंम्प्रातः सोमंमुतरुद्रंहुवेम ॥ ३४ ॥ प्रातर्जितम्भगंम् ॥ प्रातर्जितम्भगंमुग्रंहुवेमब्रय

पुन: । अग्निञ्च इन्द्रञ्च मित्रावरुणौच अश्विनौच । हवामहइतिप्रत्येकमभिसंबध्यते । प्रात:भगञ्च पूषणञ्च ब्रह्मणस्पतिञ्च प्रात:सोमम् उतअपिच रुद्रम् हुवेमआह्वयाम: ॥३४॥ प्रातर्जितम् । पञ्चभ-गदेवत्याखिष्टुभ: । योविधर्त्तेत्यादि मन्त्रोव्याख्यायते उद्दिश्यमानत्वात् । य:भग: विधर्ताविधारयिता

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सर्वस्यजगतः । आघ्रश्चिद्यम् प्रतिषेधस्यदीर्घत्वंछान्दसम् । आघ्रः ध्रेट्पत्नौ । अट्पत्नःबुभुक्षितः । अथ वाघ्रियते: आघ्रःदरिद्रः चिच्छब्दोप्यर्थे । दरिद्रोपियंभगंमन्यमानः मन्यतेरर्चतिकर्मा । पूजयन्स्वा-र्थसिद्धये भगम्भक्षिदित्याह उदयम्भक्षयस्व भजस्वदित्याह । तुरश्चित् आङोध्याहारः । आतुरोपि आतुरोपि यंभगं मन्यमानःभक्षीत्याह । उदयंभक्षयस्वदित्याह । यद्वातुरशब्देन यमोभिधीयते । सहितूर्णंप्राणिनोहन्ति । यमोपि यंभगं मन्यमानः भक्षीत्याह । उदयंभक्षयस्वेत्याह । सहि-

स्पुत्रमदितेर्य्योर्विधर्त्ता ॥ आदघ्रश्चिद्यम्मन्यमानस्तुरश्चिद्राजा चिद्यम्भगंभक्षीत्याह ॥ ३५ ॥ भगप्रणेतः ॥ भगप्रणेतुर्भगसत्यराधो भगेमान्धियमुदवादंन्नः ॥ भगप्रनोजनयुगोभिरश्नवैर्भगप्र

दिवसान् प्राणिनोगणयति । राजाचित् राजापियंभगंमन्यमानः भक्षीत्याह उदयंभक्षयस्व भज-स्वेत्याह । तदुदयेहि राज्ञांवार्त्तासिद्धिः । तंप्रातर्जितम् प्रातर्जयिनंभगम् उग्रमुद्गूर्णदानम् हुवेमआह्वयामः । वयम् ऋषिरात्मानमाह । पुत्रम्अदितेः ॥ ३५ ॥ भगप्रणेतः । हेभग हेप्रणेतः प्रकर्षेणनयस्यकर्त्तः । हेभग हेसत्यराधः सत्यमविनाशिराधोधनंयस्य । सतथोक्तः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हेभग इमांधियंप्रज्ञाम् उत्अवउद्गमय । यथासूक्तमानर्थान् पश्यामः तथाकुर्वित्यभिप्रायः । ददत् नःदेहिअस्मभ्यम्धनम् । भगप्रनोजनयगोभिरश्वैः । हेभगप्रजनयनःअस्मान् गोभिः अश्वैश्च । हेभग नृभिःमनुष्यैः नृवन्तःस्यामभवेम ॥ ३६ ॥ उतेदानीम । उतअपिच इदानीं-भगवन्तः स्यामआदित्यप्रसादात् । उतअपिचप्रपित्वेप्राप्ते अस्तमनकाले भगवन्तःस्याम । उत-

नृभिर्न्नृवन्तः स्याम ॥ ३६ ॥ उतेदानीम् ॥ उतेदानीम्भगवन्तः स्यामोतप्रपित्वऽउतमध्येऽअह्नाम् ॥ उतोदितामघवन्त्सूर्य्यस्य व्वयन्देवानांꣳसुमतौस्याम ॥ ३७ ॥ भगऽएव ॥ भगवाꣳऽअस्तुदेवा स्तेनंव्वयम्भगवन्तःस्याम ॥ तन्त्वांभगसर्व्वऽइज्जोहवीतिसनोभगपु

अपिच मध्येमध्यन्दिने अह्नांभगवन्तःस्याम । उतोदिता उतअपिच उदिताउदयकाले हेम-घवन् धनवन् सूर्यस्यभगवतः प्रसादादेववयम् देवानांसुमतौकल्याण्यांमतौस्यामभवेम ॥ ३७ ॥ भगएव । हेदेवाः भगएवभगवान्धनवान्अस्तु । किमन्यैर्देवताविशेषै र्धनयुक्तैरदातृभिरित्यभि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रायः। तेनभगप्रदत्तेन धनेनवयंभगवन्तःधनवन्तः स्यामभवेम । एकंवाक्यम् । द्वितीयेनार्द्धर्चेनद्वितीयम् एकवाक्यतायाअसंभवात् । तंत्वा । उपरितद्गुणवर्णात् यदोवृत्तिः । यंत्वाम् । हेभग सर्वदृत् सर्वएवजोहवीति आह्वयतिकामसिद्धये । सनःअस्माकम् हेभगपुरएताअग्रयायी सर्वकाकार्येषुभवद्वह ॥ ३८ ॥ समध्वराय । समनमन्तप्रह्वीभवन्ति याउषसः अध्वरायायज्ञाय । अग्निहोत्रादिकर्मणे कथमिव । दधिक्रावेव । यथादधिक्रावाअश्वः शुचयेपदाय । शुचिपदम् अग्न्या-

रऽएताभंवेह ॥ ३८ ॥ समंद्ध्वरायं ॥ समंद्ध्वरायोषसोंनमन्तद धिक्रांवेवशुचंयेपदायं ॥ अर्व्वांचीनंव्वसुविदम्भगंन्नोरथंमिवाश्व्वांव्वा जिनऽआवंहन्तु ॥ ३९ ॥ अश्व्वांवतीर्ग्गोंमतीः ॥ अश्व्वांवतीर्ग्गोंम

धानार्थंकर्त्तव्यमितिसन्नमते । एवंताउषसः । अर्वाचीनम् । अनन्यगतमनस्कम् । वसुविदंच । वसुधनंविन्दतीतिवसुवित् तंवसुविदम् । भगम् आदित्यम् नःअस्मान् प्रति । रथमिव । अश्वाः वाजिनः वेजनवन्तः अन्नवन्तोवा । आवहन्तु आगमयन्तु ॥ ३९ ॥ अश्वावतीः । उषोदेवत्याविष्टुप् । अश्ववत्यःगोमत्यःनःअस्माकम् । उषासःवीरवत्यःसदम् सदाकालम् उच्छन्तु । उच्छी-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विवाशे । विवासयन्तुतमः । भद्राःभन्दनीयाः । घृतमवश्यायजलंदुहानाः । विश्वतः प्रपीताः । प्याय:पौआदेशः । सर्वतःआयायिताः धर्मार्थकामैः । इदानीस्तत्विग्विषयःप्रश्नः । यूयंपातपालयतस्वस्तिभिरविनाशैः सदानःअस्मान् ॥ ४० ॥ पूषन्तव । इषेपौष्णौ गायत्रीविष्टुभौ । हेपूषन् तवव्रतेकर्मणि वर्त्तमानावयम् नरिष्येमनविनश्येम कदाचनकदाचिदपि । अन्यच्च ।

तीर्न्नऽउषासोंब्वीरवंतीऽसदंमुच्छन्तुभद्राः ॥ घृतन्दुहांनाव्विश्वतुः प्प्रपीतायूयंपांतस्वस्तिभिःसदांनः ॥ ४० ॥ [१०] पूषन्तवं ॥ व्व्रते व्वयन्नरिंष्येमकदांचन ॥ स्तोतारंस्तऽइहस्म्मसि ॥ ४१ ॥ पथस्प्पंथुः परिंपतिम् ॥ पथस्प्पंथुःपरिंपतिंव्वचस्याकामेंनकृतोऽअव्व्यानड्र्कम् ॥

स्तोतारोपि । तेतव । इहस्मसि । स्म । इदन्तोमसि इतीकारउपजनः ॥ ४१ ॥ पथस्पथः । यःपथस्पथः मार्गस्यपरिपतिम् अधिपतिमित्यु प्रसर्गव्यत्ययः । वचस्यावचनेन वेदीक्तेनअभिमुखीकृतः । कामेनइच्छयाच अभिमुखीकृतः । अभ्यानट् । अनशिर्व्याप्तिकर्मा अभिव्याप्नोति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अर्कम्। सः नः अस्मभ्यम् रासत् ददातु। गुरवः। पूर्वपदात् तलोपः। शुचंसंतापंसाधनाभावकृतं यानिरुधन्ति साधनानिभवन्ति तानितथोक्तानिलिख्यच्यत्ययेन। चन्द्राग्राः। तान्येव विशिषयन्ते। चायनीयाग्राणि। धियंधियंमीषधाति। कर्मकर्मवचनः प्रसाधयति। पूषा॥ ४२॥ चीणिपदा। वैष्णव्यौगायत्र्यौ। द्वाभ्यामेकवाक्यम्। यःविष्णुःयज्ञः त्रीणिपदानि। विचक्रमेक्रा-

सनोरासच्छुरुधंश्चुन्द्राग्राधियंन्धियꣳसीषधातिप्रप्रपूषा॥४२॥ चीणिं पदाव्विचंक्रमेव्विष्णुंर्गोपाऽअदाभ्यꣳ॥ अतोधर्म्माणिधारयंन्॥४३॥ तद्विप्रांसꣳ॥ तद्विप्रांसोव्विपन्यवोंजागुवाꣳसꣳसमिंन्धते॥ व्विष्णो

न्तवान् अग्निवाय्वादित्याख्यानि। गोपाःगोपायिताच समस्तस्यजगतः। अदाभ्यःअनुपहिंस्यः। अतःअस्मादेवपदत्रयात् धर्माणि। धर्मशब्दउभयलिङ्गः अर्द्धचादौहिगणेपठितः। धर्मान् धारयन्। कर्मपर्यायोवा। अतः एभ्यःपदेभ्यः कर्माणिधारयन्॥ ४३॥ तद्विप्रासः। तस्यविष्णोर्यज्ञस्य यत्परमंपदं ब्रह्मलक्षणम्। तत्। विप्रासःब्राह्मणाः विपन्यवः मेधाविनः। जागृवांसः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

असुप्ताः अप्रमत्ताः । ज्ञानकर्मसमुच्चकारिणः । समिन्धते । संदीपयन्ति उपासनैर्निर्मलीकुर्वन्ति ॥ ४४ ॥ घृतवतौ । द्यावापृथिवीयाजगतौ । येद्यावापृथिव्यौघृतवत्यौ उदकवत्यौ । भुवनानामभिश्रिया । भूतजातानामध्याश्रयणीये । उर्वीविस्तीर्णे । पृथ्वीपृथुले । मधुदुघे । मधूदकंतस्यदोध्र्यौ । सुपेशसासुरूपे । तेचरुणस्यादित्यस्यधर्मणा धारणेन । विष्कभिते । स्कभ्नोतिर्दृढीकरणार्थः । दृढी-

र्य्यंत्परमम्मुदम् ॥ ४४ ॥ घृतवंतीभुवंनानाम् ॥ घृतवंतीभुवंनानाम भिश्रियोर्व्वीपृत्थ्वीमंधुदुघंसुपेशंसा ॥ द्यावांपृथिवीव्वरुंणस्यधर्म्मंणा व्विष्कंभितेऽअजरेभूरिरेतसा ॥ ४५ ॥ येनंःसुपत्क्नाऽअपतेभवन्त्विन्द्रा ग्निभ्यामवंबाधामहेतान् ॥ व्वसंवोरुद्राऽआदित्याऽउपरिस्पृशंम्मो

क्षते । अजरेजरारहिते । भूरिरेतसा । बहुरेतस्के । सर्वभूतानांहिरेतांसि ताभ्यामेवोत्पद्यन्ते ॥ ४५ ॥ येनः । जगतीलिङ्गोक्तदेवता । येनःअस्माकम् सपत्नाःशत्रवः । अपतेभवन्तु । अपगतवीर्यानिरुद्यमास्तेभवन्तु । ततः । इन्द्राग्निभ्याम् अववाधामहै अवनाशयामः तान्शत्रून् । किञ्च वसवःरुद्राः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आदित्याश्च । उपरिस्पृशम् उपरिस्थितःस्पृशतीति उपरिस्पृक् आधिपत्येवस्थितः पादेनस्पृशतीति उपरिस्पृक्तं उपरिस्पृशम् भाम् उग्रंच । चेत्तारंज्ञातारंचज्ञेयस्य । अधिराजम् अधिपतिमीश्वरंच अक्रन् कृतवन्तःकुर्वन्तुवा । ४६॥ आनासत्या । आश्विनौजगती । आयातम् आगच्छतम् हेनासत्यावश्विनौ । त्रिभिरेकादशैःत्रयस्त्रिंशद्भिर्देवैः सहितौभूत्वा । तदुक्तम् । अष्टौवसवइत्यादि । इहमधुपेयम् ।

ग्रꣳचेत्तारमधिराजमंवक्रान् ॥ ४६ ॥ आनासत्या ॥ त्रिभिरेकादशैरि
हदेवेभिर्यातम्मधुपेयंमश्विना ॥ प्रायुस्तारिष्टन्नीरपांꣳसिमृक्षतꣳ
सेधंतन्द्वेषोभवंतꣳसचाभुवा ॥ ४७ ॥ एषवꣳः ॥ एषवस्तोमोमरुतऽइ

मधुःसोमःसोमपानम्प्रति । एत्यच । प्रायुस्तारिष्टम् । प्रतारिष्टं प्रवर्द्धयतम् आयुः । नीरपांसिमृक्षतम् । मृजूष्शुद्धौ । रपःपापमुच्यते । निर्म्मृक्षतम् । निःशोधयतम् नाशयतम् । रपांसिपापानि । सेधतं द्वेषः । षिधुगत्याम् । गमयतम् दौर्भाग्यम् भवतंच । सचा भुवा सहभुवौ सर्वकार्येषुसंयुक्तौ ॥ ४७ ॥ एषवः । मारुतोत्रिष्टुप् । हेमरुतः एषस्तोमः वः युष्माकम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इयंवगौः सत्याच प्रियाच । मम । मान्दार्य्यस्य ऋषेःसमेति । स्वस्त्रामिसंबन्धम् । हणा-तीति मान्दार्यः । यद्वा । मान्दारयति मांदारयतीत्येवं यःसपत्नानां प्रत्ययंदधातिसमान्दार्यः तस्य । ममच । मान्यस्यमानार्हस्य । कारोः कर्तुः तंस्तोमंतांचगिरम् उपश्रुत्य । एषा-यासीष्ट । आदृषायासीष्ट । आयासीष्ट । आयासोरन् इतिवचनव्यत्ययः आगच्छत । इषा-

यङ्गीर्मान्दार्य्यस्यमान्यस्यकारोः ॥ एषायासीष्टतुन्वे वयांविद्या मेषंवृजनंजीरदानुम् ॥४८॥ सहस्तोमाःसहछन्दसः ॥ सहस्तोमाः सहछन्दसआवृतः सहप्रमाऽऋषयः सप्तदैव्याः ॥ पूर्वेषामन्या

अन्नेन निमित्तभूतेनाह्वयमानाः । तन्वेवयाम् । शरीरस्थित्यर्थम् वयोदृढकर्तृम् । आया-सीष्ट । किञ्च । विद्याम्लभेमहि । इषमन्नम् वृजनंबलंच जीरदानुंजीवितदातृकर्मंच ॥ ४८ ॥ सहस्तोमाः । ऋषिसृष्टिप्रतिपादिकानुष्टुप् । सहस्तोमाःस्तोमसहिताः । सहछन्दसः छन्दस्स-हिताः । आवृतःआवृच्छब्देनकर्माभिधीयते । यद्वासत्यप्रधानानां कर्मणामनुष्ठातारः । सहप्रमाः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रमाणंप्रमा । शब्दप्रमाणपरीक्षणतत्पराः ऋषयःसप्त । सप्तऋषयः इतिप्राप्तेऽत्यये । भरद्वाज कश्यप गौतमात्रिविश्वामित्र जमदग्नि वसिष्ठाः । दैव्याः प्रजापतेः प्राणाभिमानिनः एतेऽभिव्यज्यजानाः । पूर्वेषाम् अवस्तनकल्पोत्पन्नानां अवसिताधिकाराणाम् । पन्थाम् पन्थानम् । अनुदृश्य अवलोक्य । धीराः अन्वालेभिरे अन्वालभन्तः सृष्टवन्तः सृष्टियज्ञम् कथमिव । रथ्योनरश्मीन् । रथेसाधुः रथ्यःसारथिः । नकारउपमार्थीयः । यथासारथिरिष्टदेशप्राप्त्यर्थं पथममश्वर-

मनुदृश्य धीरा अन्वालेभिरे रथ्यो नरश्मीन् ॥ ४९ ॥ आयुष्यं वर्च्चस्यम् ॥ आयुष्यं वर्च्चस्यꣳरायस्पोषमौद्भिदम् ॥ इदꣳहिरण्यं वर्च्चस्वज्जैत्रायाविशतादुमाम् ॥५०॥ नतत्॥ नतद्रक्षाꣳसिनपिशाचा

श्मोनालभते स्पृशति एवन्तेपिसृष्टियज्ञं सृष्टवन्तः ॥ ४९ ॥ आयुष्यम् । तिस्रःहिरण्यस्तुतिः उष्णिक्शक्करीबिष्टुभः । यदिदंहिरण्यम् । आयुष्मम् आयुषेहितम् । वर्चसंवर्चसेहितम् । रायस्पोषम् धनसमृद्धयिष्ट । औद्भिदम् उद्भिष्ट । धनसम्पन्नंगमयत्वा । वर्चस्वत् अन्नसंयुक्तम् । तत्जैत्रायविजयाय । आविशतात्आविशतु । उःपादपूरणार्थः । माम् । मयवस्थानं करोतु । ५० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नतत् । नतत्हिरण्यंरक्षांसि नचपिशाचाः तरन्तिहिंसन्ति । देवानांप्रथमजम् श्रो जःहि-एतत् । यतश्चदेवानामोजः प्रथमजम् अतः योविभर्तिदाक्षायणं हिरण्यम् । दाक्षायणं हिरण्यम् । दाक्षायणमित्यलंकारविशेषः । सदेवेषुदेवलो केषु कुरुते दीर्घमायुःचिरंदेवलोकेव-सतीत्यर्थः । समनुष्येषुकुरुतेदीर्घमायुः । सचमानुष्यमायुरतिक्रम्यजीवतीत्यर्थः ॥ ५१ ॥ यदा-

स्तंरन्तिदेवानामोजः प्रथमजꣳह्येतत्॥योविभर्त्तिंदाक्षायणꣳहि रंण्यꣳसदेवेषुक्रणुतेदीर्घमायुः समंनुष्येषुक्रणुतेदीर्घमायुः ॥५१॥

यदावंध्नन् ॥ यदावंध्नन्दाक्षायणाहिरंण्यꣳशतानीकायसुमनस्य

वध्नन् । यत्हिरण्यम् आवध्नन्आवद्धवन्तः । दाक्षायणः दक्षस्यापत्यानिबहूनि । नडादिपा । ठात्फक् । शतानीकायराज्ञे । शतंबहूनिअनीकानिसेनायस्य सतथोक्त स्तस्मैशतानीकाय । सुमनस्यमानाः शोभनेनमनसाध्यायन्तः । तत्हिरण्यम् । मेमयि । आत्मनीतिसम्यगुक्तिः । अहम् आवध्नामि । शतशारदाय । शतंशरदांजीवनाय । आयुष्मान्च जरदष्टिः जरामश्नुते

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

व्याप्नोतीतिजरदष्टिः। यथायेनप्रकारेण असंभूयासम् तथावधनामीतिशेषः ॥ ५२ ॥ उतनः। वहुदेवत्यात्रिष्टुप्। उतअपिच। नःअस्माकम्। वचांसि अहिर्वुध्न्यःशृणोतु। [अजएकपात् रुद्रःप्राणोवाशृणोतु। पृथिवीचसमुद्रश्चशृणोतु। श्रुत्वाचअवन्तु। विश्वेचदेवः कृतावृधः सत्य-वृधः यज्ञवृधोवा। हुवानाआह्वयमानाः। स्तुताश्च। मन्त्राः मंत्रैरितिविभक्तिव्यत्ययः। कविश-

मांनाः॥ तन्नऽआवंध्नामिशुतशारदायायुष्माञ्जरदंष्टिर्यथा संम्॥ ५२॥ उतनंः॥ उतनोहिंर्बुध्न्यः शृणोत्वजऽएकंपात्पृथिवीसंमुद्रः॥ विश्वेदेवाऽऋंतावृधोंहुवानास्तुतामन्त्राः कविशस्ताऽअवन्तु॥ ५३॥ इमागिरंः॥ इमागिरंऽआदित्येभ्योंघृतस्नूंसामेधाविशस्ताः अवन्तुपालयन्तु ॥ ५३ ॥ इमागिरः। आदित्यदेवत्यात्रिष्टुप्। याइमा गिरः वाचः आदित्येभ्यःघृतस्नूः। घृतप्रस्राविणीः घृतप्रसारिणीर्वा। घृतहोमसहचरिताः। सनात् चिरम्चिरकालम् राजभ्यःचिरराजभ्योवा। जुह्वास्रुचाजुहोमि।ताश्च। शृणोतुमित्रः अर्यमाच।

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भगश्च नःअस्माकम् । तुविजातश्चधाताच । सहिवहुशः प्रजायते । वरुणश्चदक्षश्च अंशश्च एतेसूर्यविशेषाः ॥ ५४ ॥ सप्तऋषयः । अध्यात्मवादिनोजगती । सप्तप्राणाः षडिन्द्रियानिमनः सप्तमानि । प्रतिहिताःप्रतिनिहिताः शरीरेव्यवस्थिताःयेतएव । सप्तरक्षन्ति । सदंसदा-कालम्शरीरम् । अप्रमादम् प्रमादमकुर्वाणः । तेएवसप्तआपः आपनाःव्यापनाः । स्वपतःपुरु-

सुनादूद्राजंभ्योजुह्वाजुहोमि ॥ शृणोतुंमित्रोऽअर्य्यमाभगोंनस्तु विजातोव्वरुंणोदक्षोऽअंशः ॥ ५४ ॥ सुप्तऽऋषंयः ॥ सुप्तऽऋषंयः प्रतिंहिताः शरीरेसुप्तरंक्षन्तिसदमप्रंमादम् ॥ सुप्तापुंस्व

षस्यलोकम्इयुः । लोकशब्देविज्ञानात्माहृदयाकाशप्रतिष्ठितउच्यते । तत्रचसवि तस्यानेः । तस्या-मेवावस्थायामजागृतःजागरणंकुर्वाते । अस्वप्नजौ । ययोर्नजायतेस्वप्नःतौतथोक्तौ । सत्रसदौ । सत्रे सतांत्राणेकृतावस्थानौ । देवौजीवितदातारौ प्राणापानौ ॥ ५५ ॥ उत्तिष्ट । तिस्रोव्राह्म-णस्पत्यः इंद्रहत्यौत्रतीयात्रिष्टुप् । इंद्रब्रह्मणस्पते उत्तिष्ठ उर्द्धोभवआरब्धकार्योभव । यस्मात्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देवयन्तः देवान्कामयमानाः यजमानाः त्वाभवन्तम् ईमहे । याचामहेआगच्छेति । भव- न्तमागच्छन्तम् उपप्रयन्तु उपसंगम्यआगच्छन्तु । मरुतःसुदानवः कल्याणदानाः । त्वञ्च हेइन्द्र प्राशूःप्रकर्षेणशीघ्रोभव । सचा । सहममनाय ॥ ५६ ॥ प्रनूनम् । नूनमितिपादपूरणः । प्रव- दतिप्रोच्चारयति ब्रह्मणस्पतिः मन्त्रम्उक्थ्यम् उक्थ्यमितिशस्त्रमुच्यते । तत्रमन्त्रमन्त्रंचःउक्थ्यः ।

पंतोलोकमीयुस्तत्त्रंजागृतोऽस्वप्नजौसत्रसदौचदेवौ ॥५५॥ उत्तिं षष्टुब्ब्रह्मणस्पतेदेवयन्तंस्त्वेमहे ॥ उपप्रयंन्तुमरुतंः सुदानंवइन्द्रंप्राशूर्भवासचां ॥ ५६ ॥ प्रनूनम् ॥ प्रनूनम्ब्रह्मंणस्पतिर्म्मन्त्रंव दत्त्युक्थ्यम् ॥ यस्मिन्निन्द्रोव्वरुंणोमित्रोऽअर्य्यमादेवाऽओकांऽसि चक्रिरे ॥ ५७ ॥ ब्रह्मंणस्पते ॥ ब्रह्मंणस्पतेत्त्वमस्ययन्तासूक्त

कथंभूतोसौमंत्रः । यस्मिन्मंत्रे इन्द्रश्च वरुणश्च अर्यमाच अन्येदेवाश्च ओ कांसि । ओ कइति- निवासनाम । निवासानि चक्रिरेकृतवन्तः ॥ ५७ ॥ ब्रह्मणस्पते हेब्रह्मणस्पते । त्वम्असत्रजगतः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यन्ता । एवञ्चेत् विज्ञापयामि । सूक्तस्यसाधुवचनस्य बोधिवुधाश्च अवगतार्थोभव । तनयञ्च । अपत्यानिचजिन्व । जिन्वतिःप्रीतिकर्मा । प्रीणीहि । विश्वंच तत्भद्रं भन्द्नीयम् अस्माकम् अस्तु । अत्अवन्तिपालयन्ति देवाःत्वत्प्रसादात् । बृहत्महत् जर्जितम् । वदेम । दीयताम्-

स्यबोधितनयञ्चजिन्व ॥ विश्वप्रवन्तङ्गृहंत्यदवन्तिदेवाबृहद्वदेमविदथेसुवीराः ॥ यऽइमाविश्वप्रवाविश्वप्रवकर्म्मायोनिः पितान्नपतेन्नस्यनोदेहि ॥५८॥[१८] इतिसंहितापाठेचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

* अपेतः ॥ अपेतोयन्तुपणयो सुम्नादेवपीयवः ॥ अस्य

ज्यतामिति । विदथेयज्ञे । सुवीराःकल्याणपुत्राःसन्तः । अथचतस्य प्रतीकोक्ताः । इमाविश्वाभुवनानिजुह्वत् । विश्वाकर्माविमना । योनःपिता । अन्नपतेन्नस्यनोदेहीति ॥ ५८ ॥

इति उव्वटकृतौ मन्त्रभाष्ये चतुस्त्रिंशत्तमोध्यायः ॥ ३४ ॥

ओम् । अपेतः । (१) पित्र्योध्यायः । आदित्यस्यार्षं देवानांवा । गायत्रीव । पलाशशाखयाव्यूहति ।

(१) त्रयस्त्रिंशेऽध्याये सवमेधसम्बन्धिनः कियतो मन्त्रानुक्त्वा प्रवायुमच्छेत्यारभ्य अनारभ्याधीतान्मन्त्रानुक्त्वा चतुस्त्रिंशेऽध्यायेता

* अपेतोदशपाद्यंद्वादशद्व्यौद्वाविंशतिः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नेव समाप्येदानीं पञ्चत्रिंशेऽध्याये पित्तमेधसम्बन्धिनो मन्त्रा उच्यन्ते । स च पित्तमेधो मृतस्य वर्षास्मरणे भवति वर्षमृतौतु विषमवर्षेषु भवति एकतारकनक्षत्रे चित्रादौ दर्शे वा ग्रीष्मे शरदि माघे भवति ॥ पित्तमेधं करिष्यता हि जेन कुम्भेऽस्थिसञ्चयः कार्यः । मृतस्य च यावन्तोऽमात्यपुत्रपौत्रास्तावन्तः कुम्भाः कर्मदिने आनेयाः कुम्भेभ्योऽधिकानि क्षत्राणि च । ततोऽरण्ये कुम्भे कृतमस्थिसञ्चयनं ग्रामसमीपे समानीय शय्यायां कुम्भं संस्थाप्याहतवस्त्रैकदेशेन संवेष्य लोहमयवादित्रेषुवाद्यमानेषु वीणायां च वाद्यमानायां मृतस्य पुत्रपौत्रा उत्तरीयैर्व्यजनैश्चास्थिकुम्भं विजयन्तस्त्रिस्त्रिः प्रदक्षिणं परियन्ति । स्त्रियोऽपीति केचित् । रात्रेः पूर्वमध्यापरभागेषु ताद्दने बह्वन्नदानं कुर्वन्ति नृत्यगीतवादित्राणि च कारयन्ति अस्थिकुम्भायान्नमुपहरन्ति च । तत उषःप्रातरस्थिकुम्भसंहिताः पूर्वोक्तान्कुम्भान् क्षत्राणि चादाय ग्रामाद्दक्षिणस्यां वहिर्गच्छन्त्यध्वर्युर्यजमानामात्याः । श्मशानान्तं कर्म कुर्वतो यथा रविरुदयेत्तथा रात्रावारब्धव्यम् तत्र वने गत्वा ग्रामान्मार्गादश्वत्थतिन्दुकहरिद्रुस्फूर्जकविभीतकश्लेष्मान्तककोविदारादिभ्यश्च दूरे अन्यद्वृक्षगुल्मादिहृते ऊषरे वोदकप्रवणे दक्षिणप्रवणे समे वा सुखकारिणि रम्येवनादुदक्काद्वा पूर्वभागे उत्तरभागे वा वर्तमाने गर्तवति वोरणद्वयवति प्रदेशे श्मशानार्थं दिक्कोणं पुरुषप्रमाणं चेत्थं मिमीते । पैतृक्यां हिपुरुषं समचतुरस्रं कृत्वा करणीमध्येषु शङ्वः स समाधिरिति शुल्वोक्तविधिना तच्चतुरस्रमुत्ततः पश्चाच्च पृथुभवति । तत्र साधनप्रकारः पूर्वदक्षिणपाश्वयोर्नवाङ्गुलानि स्वत्रयोदशांशेनाङ्गुलचतुर्थभागसहितानि पुरुषप्रमाणमध्ये न्यूनानिकार्याणि पार्श्वमोत्तरपार्श्वयोस्तावन्ति पुरुषप्रमाणादधिकानि तथाहि पुरुषमाचक्षेत्रस्यच्छायया प्राचीं कृत्वा तत्प्रान्तयोः शङ्कूनिखाय सार्धाष्टदशांगुलहीनांपुरुषद्वयप्रमाणामुभयतःपार्श्वां रज्जुं मध्यमदेशे सलक्षणां कृत्वा पूर्वापरयोः शङ्क्वोस्तस्याः पार्श्वीप्रतिमुच्य मध्यलक्षणेन दक्षिणत आयम्य दक्षिणः कोणः साधनीयः ततःसार्धाष्टदशाङ्गुलाधिका पुरुषद्वयप्रमाणां रज्जुमुभयतःपार्श्वां मध्यलक्षणयुतां कृत्वा शङ्क्वोः पार्श्वी प्रतिमुच्य मध्यलक्षणेनोत्तरत आयम्योत्तरकोणः साधा इति । ततः पूर्वादिकोणेषुपालाशशमीवारणाश्ममयाश्चत्वारः शङ्वो निखेयाः । एतत्कुर्वतां निकटे कस्मिंश्चिद्यजमानपुरुषस्तृणपूलकमुच्छ्रित्य धारयेत् । कर्मसमाप्तौ गृहमागता तं गृहेषूच्छ्रयेत् प्रजाहेतवे । इत्यादि बोध्यम् ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अपेतोयन्तुपणयः । अपयन्तु इतःस्थानात् पणयःअसुराः । असुम्नाश्च असुखकराः । देवपीयवश्च । पयतिर्हिंसाकर्मा । देवानांहिंसितारः देवद्विषः । किमिति । असायजमानस्य लोकः स्थानमत्र सुतावतः सोमाभिषवंकृतवतः । परंयजुः । द्युभिरहोभिरक्तुभिः । द्युशब्देन श्रुतौऋतवउक्ताः ऋतुभिः अहोभिः अक्तुभिःरात्रिभिः व्यक्तंस्पष्टीकृतम् । यमःददातु अवसानम् अवस्यत्यस्मिन्नि-

लोकꣳ सुतावंतꣳ ॥ द्युभिरह्नोभिरक्तुभिर्व्यक्तंय्युमोदंदात्त्ववसानं मस्म्मै ॥१॥ सुवितातें ॥ सुवितातेशरीरेभ्यꣳ पृथिव्याँल्लोकमिंच्छतु ॥ तस्म्मैयुज्यन्तामुस्रियाः ॥ २ ॥ व्वायुꣳ पुंनातु ॥ सवितापुंनात्त्व

त्यवसानम । अस्मैयजमानाय ॥ १ ।जपति । सवितातें गायत्री । सविता । तेतव शरीरेभ्यः शरीराणामितिविभक्तिव्यत्ययः । पृथिव्याम् लोकंस्थानम् इच्छतु । नहिसवित्राऽननुज्ञातेनावस्थातुंशक्यते । द्वितीयंवाक्यम् । तस्मैत्वेत्राय शरीरायसंस्कारार्थम् युज्यन्तांशरीरे उस्रियाःअनड्वाहः॥ २॥ वायुःपुनातु । चतस्रःसीताःकर्षति । चतुर्भिर्यजुर्भिः । वायुः पुनातु विदारयतु । सवितापुनातुवि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दारयतुअग्नेर्भ्राजसा दीत्याविदारयतु । सूर्यस्यवर्चसा भ्राजिष्णुतयाविदारयतु । विमुञ्चत्यनड्वहः । विमुचयन्तामुस्रियाः विमुच्यन्तांशरीरात् उस्रियाः । अनड्वाहः ॥३॥ अश्वत्थेव: इतिव्याख्यातम् ॥४॥ (१) शरीराणिनिवपति । सवितातेव । गायत्री । सवितातेतव शरीराणिअस्थीनि । मातुः पृथिव्याः

ग्नेर्भ्राजसासूर्य्यस्यवर्च्चसा ॥ विभुंच्यन्तामुस्रियाः ॥ ३ ॥ अश्वत्थेव तथेवः ॥ अश्वत्थेवोनिषदंनम्पर्णेवोव्वसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥ ४ ॥ सवितातेव ॥ शरीराणिमातुरुपस्थऽआवपतु ॥ तस्मैपृथिविशम्भव ॥ ५ ॥ प्रजापतेत्वा ॥ देवतायाम्

उपस्थेउत्सङ्गे आवपतुस्थापयतु । तस्मैअस्थिरूपायययजमानाय सवित्राउप्राय । हेपृथिवि शम्भवसुखरूपाभव ॥ ५ ॥ प्रजापतेत्वा । यजुः कण्डिकाः । प्रजापतेत्वाम् देवतायाम् उपोदके उपसमीपे उदकंयस्यसतथोक्तः । लोकेस्थाने निदधामि । असावितिनामग्रहणम अनुदात्तत्वा-

(१) का० सवितात इति शरीराणि निवपति मध्ये इति । २१, ४, ८ । तस्य पुरुषमात्रस्य चेचस्य मधेा शरीराणि स्तत स्थास्थीनि राशीकरोतिएतच्च सूर्योदयकालंकर्तव्यम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दामन्वितम् । तद्यथा हेदेवदत्त । अपनः शोशुचदघम् । अपेत्य नःअस्मान् अत्यर्थंदहतुपापम् द्वेष्टून् । यद्वा । प्रजापतिः अपशोशुचत् अत्यर्थंदहतु । नोस्माकमघंपापम् ॥ ६ ॥ प्रत्यागतेजपति । परंमृत्योः त्रिष्टुप्मृत्युदेवत्या । हेमृत्यो परंपन्थानमाश्रित्य । अनुपराइहि । पराङ्मुखोभूत्वा आगच्छ । तशब्देनदर्शयति । योसौतेतवस्वभूतः अन्यःइतरः देवयानात्पिप्पलोदकेलोकेनिदधाम्यसौ ॥ अपनुः शोशुचदघम् ॥६॥ परंम्मृत्यो॥ परं म्मृत्त्योऽअनुपरेहिपन्थाँय्यस्तेऽअन्न्यऽइतरोदेवयानात् ॥ चक्षुष्मते शृण्वतेतेब्ब्रवीमिमानः प्रजाꣳरीरिषोमोतब्वीरान् ॥७॥ शंव्वातः ॥ शꣳहितेघृणिꣳशन्तेभवन्त्विष्टकाः॥शन्तेभवन्त्वग्नयः पार्त्थिवासो यानाख्यः । अपिचचक्षुष्मते शृण्वतेतेब्रवीमि । षष्ठ्यर्थेचतुर्थी । चक्षुष्मतःशृण्वतः तवब्रवीमि । अतिशयार्थंवचनम् । नहितस्याद्दष्टमश्रुतं चास्ति । माच नःअस्माकंप्रजांरीरिषः । हिंसीथाः । मोतवीरान्पुत्रान् ॥ ७ ॥ यथार्थंकल्पयति अनुष्टुप्बृहतीभ्याम् । शंवातः । सुखरूपो वातः तेभवतु । शंहि तेघृणिः सुखरूपश्च तेघृणिर्भवतु । घृणिरित्यर्हनामहीतिखाध्यायार्थम् । सुख-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

रूपाश्च ते नवन्तुइष्टकाः । मुखरूपास्तेभवन्तु अग्नयःपार्थिवाः पृथिव्यांभवाःपार्थिवासः । माच-
त्वाम् अभिशूशुचन् अभितापयन्तु ॥ ८ ॥ किञ्च । कल्पन्तांतेदिशः । क्लृप्तास्ते दिशोभवन्तु ।
तुभ्यम् आपःशिवतमाः भवन्तु । तुभ्यंभवन्तु सिन्धवःसमुद्राःशिवतमाः । अन्तरिक्षंशिवंतुभ्यं
भवतु । कल्पन्तांतेदिशः सर्वाः । आदरार्थंपुनर्वचनं कात्स्न्यार्थंवा ॥ ९ ॥ अश्मन्वतीरीयते ।

मात्त्वाभिशूंशुचन् ॥ ८ ॥ कल्पंन्तान्ते ॥ दिशुस्तुभ्युमापंः शिवतं
मास्तुभ्यंम्भवन्तुसिन्धंवः ॥ अन्तरिक्षꣳशिवन्तुभ्युङ्कल्पंन्तान्ते
दिशुःसर्व्वीः ॥ ९ ॥ अश्मन्वंन्वतीरीयतेसꣳरंभद्ध्वमुत्तिंष्ठतुप्रतंर
तासखायः ॥ अत्राजहीमोशिवायेऽअसंञ्छिवान्वुयमुत्तरेमाभिवा

अश्मन स्त्रीँस्त्रीन्विकिरन्ति ताअभ्युत्तरन्ति । विष्टुव्वैश्वदेवी । अश्वन्वती पाषाणवती इयं-
नदीरीयतेगम्यते अस्माभिःविषमम् । अतोब्रवीमि । संरभध्वम् । संरभस्वोत्तरणाय प्रयत्नक-
रणम् । उत्तिष्ठत अभितुखाभवत । प्रतरत । हेसखायः । किमित्यादरः । अत्राजहीमः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

परित्यजामः । अशिवाःअशान्ताः । येअसन्स्युः । शिवान्वाजान् अन्नविशेषान् वयम्अभ्युत्तरेम ॥ १० ॥ अपामार्गेणापमृजति । अपाघम् । अनुष्टुप् । हेअपामार्गत्वम् अस्मत्अस्मतः । अपसुव अपगमयअघंपापंमानसम् । अपगमयच किल्विषंकीर्त्तिभेदकम्पापमेवकायिकम् । अपगमयच कृत्याम् अभिचारम् । अपगम यचरपः । रपोरिप्रमितिपापनामनीभवतः । वाचि-

जान् ॥१०॥ [१०] अपाघम् ॥ अपाघमपकिल्बिषमपकृत्यामपोरपः ॥ अपामार्गस्त्वमस्मदपदुः स्वप्न्यꣳसुव ॥ ११ ॥ सुमित्रियानः ॥ सुमित्रियानऽआपऽओषधयःसन्तुदुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ १२ ॥ अनड्वाहंमन्वारभामहेसौरभेयꣳस्वस्त

कम्पापम् । अपगमयच दुःस्वप्न्यम् दःस्वप्नेभवंफलम् दुःस्वप्न्यम् ॥ ११ ॥ सुमित्रियानड्वतिव्याख्यातम् ॥ १२ ॥ अनड्वत्पुच्छमन्वारभ्याआगच्छन्ति । अनड्वाहम् । आनडुहीअनुष्टुप् । उत्तरोर्द्धर्चः प्रत्यक्षकृतःअतोयच्छब्दाध्याहारेणासामर्थ्यम् । यःत्वाम्अनड्वाहम्अन्वारभामहेआलभा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

महे । सौरभयम्सुरभ्याअपत्यम् स्त्रीहीभ्योढक् । स्वस्तयेअविनाशाय । सत्वम् नःअस्माकम् इन्द्र-
इवादेवेभ्यः देवनामितिविभक्तिव्यत्ययः । वन्हिर्वोढासंतारणश्चभव ॥ १३ ॥ उद्वयमितिव्याख्या-
तम् ॥ १४ ॥ (१) मर्यादाया एवलोष्टमादृत्यान्तरेणतोरणेनिदधाति । इमञ्जीवेभ्यः । त्रिष्टुप् मृत्यु-

यें ॥ सनुऽइन्द्रंऽइवदेवेभ्योव्वह्निंः सुन्तारंणोभव ॥१३॥ उद्वयम् ॥
उद्वयन्तमंसस्परिस्वः पश्यंन्तऽउत्तंरम् ॥ देवन्देवत्रासूर्य्यमगंन्म
ज्योतिरुत्तमम् ॥ १४ ॥ इमञ्जीवेभ्यंः ॥ परिधिन्दंधामिमैषान्नुगा
दपरोऽअर्थमेतम् ॥ शतञ्जीवन्तुशरदंः पुरूचीरन्तर्म्मृत्युन्दधता

देवत्या । इमंलोष्टंजीवेभ्यः अर्थाय । परिधिम् परिधीयत इतिपरिधिः तम्परिधिम् दधामि-
स्थापयामि । किमर्थमितिचेत् । मागात्मागच्छतु एषांजीवानांमध्ये अपः नुत्क्षिप्रम् । वेदोक्ता-
दायुषोर्वाक् पितृलोकम् एतमर्थंपुरस्कृत्य सर्वथाशतंजीवन्तुशरदः । पुरुचीः बह्वञ्चनाः दाना-

(१) ग्रामश्मशानान्तरे मर्यादालोष्टं निदधातीमं जीवेभ्य इति । स्वनिवासग्रामस्यचमध्ये मर्यादालोष्टं महत्तरं मृत्खण्डं निदधाति ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धायनयागानुकूलाः। अन्तर्मृत्युन्दधताम् अन्तर्दधातुमत्युम् पर्वतेनद्रुवलोष्ठेन ॥ १५ ॥ जुहोतिद्वाभ्याम्। अग्नऽआयू ष्यि। व्याख्यातम् ॥ १६ ॥ आयुष्मानग्ने। वसुरन्ताविष्टुप्। इमान्ह्याहेतियजुः। हेअग्नेयःत्वम् आयुष्मान् तंत्वांब्रवीमि। हविषाद्यधानः वर्द्धमानः घृतप्रतीकः। प्रतीकंमुखम्। घृतयोनिः घृतसंसृष्टस्थानः एधिभव। उत्तरवेद्यांधारणाभिप्राय-

म्पर्व्वतेन ॥ १५ ॥ अग्नऽआयूंष्यि ॥ पवस्वऽआसुवोर्ज्जमिषंञ्चनः ॥ आरेवांधस्वदुच्छुनाम् ॥ १६ ॥ आयुष्मानग्ने॥ हविषांवृधानोघृतप्रतीकोघृतयोनिरेधि ॥ घृतम्पीत्वामधुचारुगव्यम्पितेवपुत्रमभिरक्षतादिमान्त्स्वाहा ॥ १७ ॥ परीमे ॥ गामनेषतपर्य्यग्निमहषत॥

मेतत् घृतंचपीत्वा मधुमधुरसम्। चारुसुगन्धि। गव्यङ्गोविकारसम्भूतम्। पितादुवपुत्रम् अभिरक्षतात्। तुह्योस्तातङ्ङाशिष्यन्यतरस्यामितितातङादेशः। अभिरक्ष इमान्जीवान् स्वाहासुहुतमस्तु ॥ १७ ॥ अथैषांपरिधीन्दधाति। अनुष्टुभा। परीमेगामनेषत। इमेजीवाः परि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सर्वतः गाम्अनेषत । नयतेर्लुङि सिचएतद्रूपम् परिणीतवन्तः गाम्अनडुत्पुच्छालम्बनाभि-
प्रायमेतत् । पर्य्यग्निमहृषत । पर्य्यहृष्यत हरतेरेतद्रूपम् । परिहृतवन्तः अग्निम् । यस्मि-
न्नग्नावेतत्कर्मक्रियते तमग्निंपरिहृतवन्तः । अद्वारेणोपासनं निरस्यतीत्येतदभिप्रायमेतत् ।
देवेषुऋत्विक्षु । अक्रत । अकृषतेतिप्राप्तेसिचोलोपश्छान्दसः ॥ अव.धनं दक्षिणालक्षणम् ।
अथेदानीम् कृतकृत्यान् इमान् कः कोनाम । आदधर्षति । आधर्षयितुम् आक्रमि-

देवेष्वक्रतुरयुं कऽइमाँ ॥ २ ॥ ऽआदधर्षति ॥ १८ ॥ क्रव्यादमग्निम् ॥ क्रव्यादमग्निम्प्रहिणोमिदूरंयमराज्ञ्यंगच्छतुरिप्रवाहः ॥

तुम् शक्नुयात् अशक्यप्रतिक्रियाह्येतेवर्त्तन्त इत्यभिप्रायः ॥ १८ ॥ अद्वारेणोपासनं निरस्यति ।
क्रव्यादमग्निम् । त्रिष्टुप् । अथ येनपुरुषंदहति सक्रव्यात् । क्रव्यादमग्निम् । परिहिणोमि
प्रेषयामि दूरमपुनरागमनाय । यमराज्यंगच्छतु रिप्रवाहः । रिप्रमितिपापनाम । रिप्रंस्तृतं
वहतिप्रापयति भक्षीभावमितिरिप्रवाहः । जपति । इहयइहएव अयम् इतरःक्रव्यादादन्यः

शिवम ७०

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जातवेदाः जातप्रज्ञानः देवेभ्यः हव्यं हविःवहतु । प्रजानन् स्वमधिकारम् ॥ १९ ॥ वपांजुहोति । वहवपाम् । त्रिष्टुप् । वहप्रापय वपाम् हेजातवेदः पितृभ्यः । यत्रयस्मिन्प्रदेशे एतान् पितॄन् वेत्थ-जानासि । निहितान्स्थापितान् पराकेपराक्रान्ते सुदूरेपि तस्याश्च वपायाः सकाशात् मेदसःकु-ल्यानद्यः निसृत्य । उपस्रवन्तु । तान्पितॄन प्रति । एषांचदातॄणाम सत्याअवितथाआशिषः सन्नम

इहैवायमितरोजातवेदादेवेभ्योहव्यंवहत्प्रजानन् ॥ १९ ॥ वहं
वपाम् । वहंवपाजातवेदः पितृभ्योयत्रैनान्वेत्थनिहितान्परागे ।
मेदसः कुल्याउपतान्त्स्रवन्तुसत्याएषामाशिषः सन्नमन्ता ॐ
स्वाहा ॥२०॥ स्योनापृथिवि॥नोभवानृक्षरानिवेशनी॥यच्छानः शर्म्मस
न्ताम्प्रहवीभवन्तु । स्वाहेतियजुः ॥ २० ॥ स्योनापृथिवि । पार्थिवीगायत्री । स्योनासुखरूपा हेपृ-थिविनःअस्माकम्भव । अनृक्षराच नृक्षरःकण्टकः अनृक्षराअकण्टका । निवेशनीच । साधुप्रति-ष्ठाना । किञ्च । यच्छानःप्रयच्छच नःअस्माकम् शर्मशरणम् सप्रथाःसर्वतःपृथुः । अपनःशो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

शुच दघमितिव्याख्यातम् ॥ २१ ॥ अस्मात्त्वम् । गायत्रीयजुरन्ता एवाव्याहृतिः । अनिरुक्ताग्नेयी । अस्माद्यजमानात् । हेअग्ने त्वम् अधिजातोसि यतःअतोब्रवीमि । अयंपुनर्जायमानः त्वत्त्वत्तः जायतामुत्पद्यताम् । असावितिनामग्रहणम् तद्यथा देवदत्तः । स्वर्गायलोकाय स्वर्गलोकप्राप्य-

प्प्रथाः॥ अपनुःशोशुचदघम्॥२१॥ अस्मात्वम्॥ अस्मात्त्वमधिजातो सित्त्वदयञ्जायतान्पुनः॥ असौस्वर्गायलोकायस्वाहा ॥ २२ ॥ [१२]

इतिसंहितापाठेपञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

* ऋचंव्वाचम् ॥ ऋचंव्वाचम्प्रपद्येमनोयजुः प्प्रपद्येसामःप्राण

र्थम् । त्वत्तोह्ययंजायमानः त्वद्भ्यएवस्यादित्यभि प्रायः । स्वाहेतिसंप्रदानमस्तु ॥ २२ ॥

इति उव्वटकृतौ मन्त्रभाष्ये पञ्चत्रिंशत्तमोध्यायः ॥ ३५ ॥

(१) इदानीं प्रवर्ग्याग्निकाण्डमेधोपनिषत्संवद्यामंत्रा स्तान्व्याख्यास्यामः । तत्राग्निका उग्रश्चेत्ये-

(१) का० शान्तिकरणमाद्यन्तयोः । ऋचं वाचमितिधायेन शान्तिकरणं कार्यम् स्वाध्याये मन्त्रपाठे प्रवर्ग्य मन्त्रादावस्वाध्यायस्य दर्शनात् ॥

* ऋचवाचंषोडशद्यौःशांतिरष्टौहौचतुर्विंठ०शतिः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वमादय: । तान्पुन:परमेष्ठ्यपश्यत् । प्राजापत्योविमुखदूति तस्यमंत्रगणस्यसंज्ञा । अग्निर्ठं हृद-येनेत्याश्वमेधिका: आअध्यायात् प्रजापतेरार्षम् । परिशिष्टं दध्यङ्गाथर्वणोपश्यत् । दध्यङ्-ह्वा आथर्वणइत्येवमादिकया श्रुत्यातद्भावं प्रतिपद्यते । ऋचंवाचम् । प्रवर्ग्यस्यादावन्तेच शान्तिकरणोध्याय: । विश्वेदेवा आग्निकानामाश्वमेधिकानांच मंत्राणाम् दृहसमाम्नातम् दिवाकीर्तिसामान्यात् । प्रथमकण्डिकायजु: । ऋचंवाचंप्रपद्ये प्रविशामियामिवा । एवं-

म्प्रपद्येचक्षु; श्रोत्र म्प्रपद्ये ॥ व्वागोजं: सुहौजोमयिप्प्राणापानौ ॥ १ ॥ यन्म्मे ॥ च्छिद्रञ्चक्षुषोहृदयस्यमनसोव्वातित्रुम्बृहस्प्पतिर्म्मे तद्द

मनोयजु: सामप्राणंचक्षु: श्रोत्रमितिव्याख्येयम् । नहित्रयीविद्या प्रपन्नस्य प्रवर्ग्यआयुषोविना-शंकुर्यात् । तथावाङ्मन: प्राण: चक्षु: श्रोत्राणि प्रपन्नस्य सप्तदशंज्ञेतत्प्रजापतेर्लिङ्गमुपलक्षि-तम् । अथैवंसति । वाक् ओजोवलं मानसं धृष्टतानाम । पुनरोजोग्रहणमादरार्थम् । एतदुक्तंभवतिवाक्च अतिशयिकमोज: प्राणापानौच सहएकीभूता: मयिवर्त्तन्त ऽत:प्रवर्ग्यो-स्मान्नहिनस्ति ॥ १ ॥ यन्मे वार्ह स्यात्यापंक्ति: । यन्मे मम । छिद्रम्अवखण्डितम् चक्षुष:हृदय-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सत्यवाहृदयग्रहणेनबुद्धिरुक्ता । मनसोवा अतिदृणम्अतिहिंसितम् प्रवर्ग्याचरणेन । बृहस्पतिः मम तत्दधातु । अथैवंबृहस्पत्यनुगृहीतानाम् । शंनःसुखरूपोस्मकम् भवतु । भुवनसा-भूतजातसत्यःपतिः योधिपतिःप्रवर्ग्यरूपोयज्ञः ॥ २ ॥भूर्भुवःस्वः यजूंषि । तत्सवितुरिति कया-

धातु ॥ शन्नोभवतुसुवंनस्ययस्पतिः ॥ २ ॥ भूर्भुवः ॥ भूर्भुवः स्वः ॥ तत्सवितुर्व्वरेण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनः प्रचोदयात् ॥ ३ ॥ कयानः ॥ कयानश्चित्रआभुवदूतीसदावृधःसखा ॥ कयाशचिष्ठयावृता ॥ ४ ॥ कस्त्वा ॥ सत्योमदानाम्मꣳहिष्ठोमत्सदन्धसः ॥ दृढाचिदारुजेव्रसु ॥ ५ ॥ अभीषुणः ॥ सखीनामविताजरितॄणाम् ॥ शतम्भवास्यूतिभिः ॥ ६ ॥ कयात्वम् ॥ कयात्वन्नऽऊ

नःसिस्त्र व्याख्याताः । ऋषिकृतोविशेषः ॥ ३ ॥ ॥ ४ ॥ ५ ॥ ६ ॥ कयात्वम् । गायत्री । ऐन्द्रीअनिरुक्ता । हेवृन्द्र कयाऊत्या केनवागमनेन त्वम् नःअस्मान् अभिप्रमन्दसे अभिमो-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दयसि हर्षयसि । हेवृषन्सिक्तः । कयाचजुत्या केनवागमनेन स्तोतृभ्यः दातुंधनानि आभर आहरसि । लडर्थेलोट् । तत्कथय । येनतथानुतिष्ठामः ॥ ७ ॥ इन्द्रोविश्वस्य द्विपदाविराट् । योयंमहावीर इन्द्रआदित्योवा कस्याधिष्ठात्रीदेवता । विश्वस्यजगतः राजतिदेदीप्यते ईष्टेवा । तस्यप्रसादात् । अस्माकम् अस्तुद्विपदेशंचतुष्पदे । द्विपदाञ्चतुष्पदांचेतिविभक्तिव्यत्ययः ॥ ८ ॥ शन्नो-

त्याभिप्प्रमंन्दसेवृषन् ॥ कयास्तोतृभ्युऽआभंर ॥ ७ ॥ इन्द्रोविश्वस्य ॥ राजति ॥ शन्नोऽअस्तुद्विपदेशञ्चतुंष्पदे ॥ ८ ॥ शन्नोमित्रःशंव्वरुंणः शन्नोभवत्वर्य्यमा ॥शन्न्ऽइन्द्रोबृहस्पतिः शन्नोविष्णुरुरुक्रमः ॥ ९ ॥ शन्नोव्वातंः ॥ पवताꣳशन्नस्तपतुसूर्य्यः ॥

मित्रः । द्वे अनुष्टुभौ । महावीरप्रसादात् आदौच । शंसुखरूपः नोस्माकंभवतु मित्रः । शंचनःवरुणःभवतु । शंचनःभवतुअर्यमाशंचनःइन्द्रःबृहस्पतिः । शंचनःविष्णुःउरुक्रमःउरुविस्तीर्णःक्रमोयस्यसउरुक्रमः । शेषंदर्शितयाव्याख्येयम् ॥९॥ शन्नः । शंसुखरूपः नोस्माकम् वातःअपरुषः अव्या-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धिजनकश्च । पवताम् वातु । शंसुखरूपः अदहनःभेषजरूपश्च नोस्माकंतपतुसूर्यः । शन्नःसुख-रूपश्चास्माकम् । पर्जन्योदेवः काशनिचाररहितंपवित्रमुदकम् भेषजकर्त्र अभिवर्षतु । कनि-क्रदत् । स्तनयित्नुशब्दंकुर्वन् ॥ १० ॥ अहानिशम् द्विपदागायत्री । अहानिदिवसाः शंसु-खरूपा भवन्तु नोस्माकम् । शंसुखरूपाःरात्रीः प्रतिधीयताम् प्रतिदधात्वस्मासुमहावीरः ।

शन्नऽ कनिक्रदद्देवः पर्ज्जन्योऽअभिवर्षतु ॥ १० ॥ अहानिशम् ॥ अहानिशम्भवन्तुनः शऽरात्रीः प्रतिधीयताम् ॥ शन्नऽइन्द्राग्नी भवतामवोभिः शन्नऽइन्द्रावरुणारातहव्या ॥ शन्नऽइन्द्रापूषणा वाजसातौशमिन्द्रासोमासुवितायशंय्योः ॥ ११ ॥ शन्नः ॥ शन्नो

शंसुखरूपौच इन्द्राग्नीभवताम् अवोभिःपालनैः सह । शन्नःसुखरूपौचास्माकम् इन्द्रावरुणा इन्द्रावरुणौ । रातहव्या दत्तहविष्कौभवताम् । शन्नःसुखरूपौचास्माकम् इन्द्रापूषणौभवताम् वाजसातौ अन्नसंभजनेनिमित्तभूते । शंसुखरूपौच इन्द्रासोमौभवताम् सुवितायसाधुगमनाय साधुप्रसवायवा । शंयोः शमनायरोगाणाम् यावनायपृथक्करणायच भयानाम् ॥ ११ ॥ शन्नोदे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वीः । अब्देवत्यागायत्री । सुखरूपाअस्माकम् देवीःदेव्याः अभिष्टयेअभिषेकाय अभीष्टायवा । आपःभवतु । पीतयेपानायच । शंयोः शमनाय रोगाणाम्यावनंपृथक्करणम् पृथक्करणायभया-

देवीरभिष्टयऽआपोभवन्तुपीतयें ॥ शंय्योरभिस्रवन्तुनः ॥ १२ ॥ स्योनापृथिवि ॥ नोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्मसप्रथाः ॥ १३ ॥ आपोहि ॥ ष्ठठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायच चक्षसे ॥ १४ ॥ योवः शिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिव मातरः ॥ १५ ॥ तस्म्माऽअरम् ॥ तस्म्माऽअरङ्गमामवोयस्यक्षयाय जिन्वथ ॥ आपोजनयथाचनः ॥ १६ ॥ [१६] द्यौः शान्तिः ॥

नांवा । अभिस्रवन्तुनःअस्माकम् ॥ १२ ॥ स्योनापृथिवीतिव्याख्यातम् ॥ १३ ॥ आपोहिष्ठे-तितिस्रश्चव्याख्याताः ॥ १४ ॥ ॥ १५ ॥ १६ ॥ द्यौःशान्तिः । यादृग्लोकरूपाशान्तिः याचान्तरि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चरूपाशान्तिः । याचपृथिवी । आपः ओषधयः । वनस्पतयः विश्वेदेवाः । ब्रह्मत्रयीलक्षण परंवा । सर्वशान्तिः । याचशान्तिरेवशान्तिः । याचस्वरूपतएवशान्तिः । सा । माममशान्ति एधि । अस्मितिपुरुषव्यत्ययः । त्वत्प्रसादादित्यपेक्षा ॥ १७ ॥ दृतेदृंह० हमा । दृतेयजुः ।

द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिꣳ सर्वꣳशान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥ १७ ॥ दृतेदृꣳहमामित्रस्यमाचक्षुषासर्वाणिभूतानिसमीक्षन्ताम् ॥ मित्रस्या

दृविदारणे विदोर्णेपिशरीरेजरया । दृंहदृढीकुरुमाम् । कथमितिचेत् । मित्रस्यमाचक्षुषासर्वाणिभूतानिसम् ईक्षन्ताम् पश्यन्तु । अहमपि । मित्रस्य चक्षुषासर्वाणिभूता निममीक्षेपश्यामि । शान्तंहिमित्रस्यचक्षुः । नवैमित्रङ्कञ्चनहिनस्ति । नमित्रं कश्चनहिनस्तीति ।

शिवम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवमहिंस्यमाना अहिंसन्तश्च परस्परमद्रोहेणसर्वथा मित्रस्यचक्षुषासमीक्षामहे॥ १८॥ इतेट्ए्ह। यजुः। इतेट्ठ०हमा। अतिशयार्थं पुनर्वचनम्। ज्योक्चिरम् तेतवसंदृशिसंदर्शने। जीव्यासञ्जीवेयम् आदरार्थम् पुनर्वचनम्॥ १९॥ नमस्तेहरसेइति व्याख्यातम्॥ २०॥ नमस्ते।

हञ्चक्षुषासर्व्वाणिभूतानिसमीक्षे॥ मित्रस्यचक्षुषासमीक्षामहे। १८।
इतेट्ठ्हमा॥ ज्योक्तेसन्दृशिंजीव्यासञ्ज्योक्तेसन्दृशिंजीव्या
सम्॥ १९॥ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे॥ अन्याँस्तेऽअ
स्मत्तपन्तुहेतयः पावकोऽअस्मभ्यंशिवोभव॥२०॥नमस्ते।ऽअस्तु
विद्युतेनमस्तेस्तनयित्नवे॥नमस्तेभगवन्नस्तुयतऽस्वः समीहसे॥२१॥

इ अनुष्टुभौ। नमःतेतुभ्यम्अस्तु। विद्युतेविद्युद्रूपाय। नमस्तेस्तनयित्नवे स्तनयित्नुरूपाय नमः तेहेभगवन् अस्तु। यतःयस्मात् स्वःस्वर्गलोकंगन्तुम्समीहसेचेष्टसे। अमर्त्यत्वमिच्छसिप्रायः॥ २१॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यतोयतः । यस्माद्यस्मात् दुश्चरितात् अपाकर्तुमभीहसेचेष्टसे ततस्ततः नःअस्माकम् अभय-
ङ्कृधि । किञ्च । शन्नः सुखमस्माकम् कुरुप्रजाभ्यः अभयन्नःपशुभ्यःकुरु ॥ २२ ॥ इतउत्तरं यजूंषि
व्याख्यायन्ते आअध्यायात् । तत्सुमित्रियानइति व्याख्यातम् ॥ २३ ॥ तच्चक्षुः । योयंनइहावीरो-

यतोयतऽसमीहसेततोनोऽअभयङ्कृधि ॥ शन्नः कुरुप्रजाभ्योभयन्नः
पशुभ्यः ॥ २२ ॥ सुमित्रियानः ॥ सुमित्रियानऽआपऽओषधयःसन्तु
दुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ २३ ॥
तच्चक्षुः ॥ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदःशत
ञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्प्रब्रवामशरदःशतमदीनाः

स्याभिस्तुतः । तत् आदित्यरूपं चक्षुः । देवहितम् देवैर्निहितं स्थापितम् देवानांवाहितम् । शिवम्
पुरस्तात्प्राच्यांदिशि । शुक्रं शुक्लम् असंसृष्टंपाप्मभिः । शोचिष्मद्वा । उच्चरत्उदितम् । तत्प्रसादाच्च । ७५
पश्येम शरदःशतम् । जीवेमशरदःशतम् । शृणुयामशरदःशतम् । प्रब्रवामशरदःशतम् अस्खलि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तयागिन्द्रियाभवामः । अदीनाःस्यामशरदःशतम् भूयश्चशरदःशतात् ॥ २४ ॥

इति उव्वटकृतौ मन्त्रभाष्ये षट्त्रिंशोध्यायः ॥ ३६ ॥

स्यामशरदंःशतम्भूयंश्चशरदंःशतात् ॥ २४ ॥ [८]

इतिसंहितायांदीर्घपाठेषट्त्रिंशोऽध्यायः ॥ ३६ ॥

* देवस्यंत्त्वा ॥ सवितुःप्रंसवे श्विश्वनोर्बाहुभ्यांम्पूष्णोहस्तां भ्याम् ॥ आदंदेनारिंरसि ॥ १ ॥ युञ्जतेमनंः ॥ युञ्जतेमनंऽउतयुंञ्जते

(१) मन्त्रावोरसंभरणम् अभ्यादानम् । देवस्यत्वेतिव्याख्यातम् नारिरसीतिविशेषः ॥१॥ आल-

(१) का देवस्य त्वेत्यभिमादायोदुम्बरीं वैकङ्कतीं वारत्रिमावीण्सव्ये कृत्वा दक्षिणे नालभ्य जपति युञ्जत इति । उदुम्बरतरूत्यां विकङ्कततरूत्यां वा हस्तप्रमाणाभिं देवस्यत्वा नारिरसीति मन्त्रेणादाय वामहस्ते तां कृत्वा दक्षिणहस्तेन सृष्ट्वायुञ्जतेमन इति मंत्रं जपतीति सूत्रार्थः ।

---

* देवसात्वादशयमायत्वैकादशद्वावेकाविंठ० शतिः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भ्यजपति । युञ्जतेमन इतिव्याख्यातम् ॥ २ ॥ स्तृणाऽन्यरिगृह्णाति । देवीद्यावापृथिवी हेदेव्यौ द्यावापृथिव्यौ । मखस्ययज्ञस्य वांयुवाम् उपादाय । स्तृदञ्चोदकं वादायेत्यर्थः । अद्यशिरः राध्यासम् राधसाधसंसिद्धौ । संसाधयेयम् देवयजने देवाअस्मिन्निज्यन्ते इति देवयजनम् । पृथिव्याः मखायज्ञायत्वा परिगृह्णामि । ततोपिविशेषापेक्षायामाह । मखस्यशीर्ष्णेत्वांपरिगृह्णामीति ॥ ३ ॥

धियोव्विप्राव्विप्रस्यबृहतोव्विपश्चितः ॥ व्विहोत्रांदधेव्वयुनावि देकऽइन्महीदेवस्यसवितुः परिष्टुतिः ॥ २ ॥ देवींद्यावापृथिवी ॥ मखस्यंवामद्यशिरोराध्यासन्देवयजनेपृथिव्याः ॥ मखायंत्त्वामखस्यं त्त्वाशीर्ष्णे ॥ ३ ॥ देव्योव्वम्न्र्योः ॥ देव्योव्वम्न्र्योभूतस्यंप्रथमु जामखस्यंवोद्यशिरोराध्यासन्देवयजनेपृथिव्याः ॥ मखायंत्त्वामख

अथवल्लोक वपांगृह्णाति । देव्योवम्न्र्यः । हेदेव्यः वम्न्र्यः । उपजिह्विकाः सोमकादृतिपर्यायाः । या यूयंभूतस्य प्रथमजाः । पृथिवीभूतानां प्रथमजातत्संबन्धाद्यूयंपि प्रथमजा उच्यन्ते । मख-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सग्शिरः राध्यासम् अदावः ताःयुष्मान्उपादायेतिशेषः। देवयजन इत्यादिव्याख्यातम् ॥ ४ ॥ वराहविहतमादत्ते। इयत्यग्रे युष्मद्संबन्धान्मध्यमोत्तमपुरुषः। यात्त्वम् इयतीप्रादेशमात्रा अभिनयेननिर्दिश्यते। अग्रेवराहसग्उद्गरतः आसीत् आसीःअभूः। इयतोऽवा इयमग्रेपृथिव्यास। प्रादेशमात्रीन्युपक्रम्य वराहउज्जघानेत्याह। तांत्वांब्रवीमि मखस्यते त्वासुपादाय अदग्शिरः

स्यंत्त्वाशीर्ष्णे ॥ ४ ॥ शतम् ॥ १९०० ॥ इयत्त्यग्रे ॥ इयत्त्यग्रंऽआसीन्मुखस्यंतेद्यशिरोंराड्यासन्देवयजनेपृथिव्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ ५ ॥ इन्द्रस्यौजंः ॥ इन्द्रस्यौजंस्थमुखस्यंवोद्यशिरोंराड्यासन्देवयजनेपृथिव्याः ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥ मुखायंत्त्वामुखस्यंत्त्वाशीर्ष्णे ॥६॥ प्रैतु ॥

राध्यासम्देवयजनेपृथिव्याः मखायत्वेतिव्याख्यातम् ॥ ५ ॥ आदारानादते। इन्द्रस्यौजस्थ येयूयम् इन्द्रस्यौजोभवथ तान्युष्मान् अदग्उपादायशिरः राध्यासमित्यादिव्याख्यातम्। अजाक्षीरमादत्त मखायत्वेत्युक्तम्। सम्भृतानभिहुतिमखायत्वेत्युक्तम् ॥ ६ ॥ परिस्थितमभिगच्छन्तोजपन्ति।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्रैत्विंतिवग्राख्यातम्। खरेसादयति। मखायत्वेत्युक्त्वार्थम् मृत्पिण्डमादाय महावीरङ्करोति। मखायत्वेत्युक्त्वम् ॥ ७॥ निष्ठितमभिष्टौति। मखस्यशिरोसीत्युक्त्वार्थम् एवंद्वितीयतृतीयौ। गवेधुकाभिः

ब्रह्मणस्पतिः प्रदेव्यै तुसूनृता ॥ अच्छांवीरन्नर्य्यम्पुरुक्षिरांधस न्देवायुज्ज्वन्नंयन्तुनः ॥ मखायंत्त्वामखस्यंत्त्वाशीष्णर्णे ॥ मखायंत्त्वाम खस्यंत्त्वाशीष्णर्णे ॥ मखायंत्त्वामखस्यंत्त्वाशीष्णर्णे ॥ ७ ॥ मखस्यु शिरंः ॥ मखस्युशिरोसि ॥ मखायंत्त्वामखस्यंत्त्वाशीष्णर्णे ॥ मखस्यु शिरोसि ॥ मखायंत्त्वामखस्यंत्त्वाशीष्णर्णे ॥ मखस्युशिरोसि ॥ मखा यंत्त्वामखस्यंत्त्वाशीष्णर्णे ॥ मखायंत्त्वामखस्यंत्त्वाशीष्णर्णे ॥ मखायंत्त्वा मखस्यंत्त्वाशीष्णर्णे ॥ मखायंत्त्वामखस्यंत्त्वाशीष्णर्णे ॥ ८ ॥ अश्वस्यं

म्लक्ष्णयति। मखायत्वेतिविभि र्मन्त्रैस्त्रीन्महावीरान् ॥ ८ ॥ अश्वशक्ततावधूपयति। अश्वत्वात्वाम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हेमन्हावीर हृष्णःसेक्तुः । शक्रा शक्नच्छुन्द्स्याशक्वन्नादेशः । धूपयामि देवयजनेपृथिव्याः । मखायत्वा मखस्यत्वाशीर्ष्णे । एवंद्वितीयतृतीयौ । अपयतिवीम्महावीरान् त्रिभिर्मन्त्रैः मखायत्वेतिप्र-

त्त्वा ॥ वृष्णे॑ शुक्राधूंपयामिदेवयजंनेपृथिव्याः ॥ मखायं॑त्त्वामखस्यं॑
त्त्वाशीर्ष्णे॥ अश्वस्यत्त्वाव्वृषण्णं॑शुक्राधूंपयामिदेवयजंनेपृथिव्याः ॥
मखायं॑त्त्वामखस्यं॑त्त्वाशीर्ष्णे ॥ अश्वस्यत्त्वाव्वृष्णे॑ शुक्राधूंपयामिदेव
यजंनेपृथिव्याः ॥ मखायं॑त्त्वामखस्यं॑त्त्वाशीर्ष्णे॥ मखायं॑त्त्वामखस्यं॑त्त्वा
शीर्ष्णे॥ मखायं॑त्त्वामखस्यं॑त्त्वाशीर्ष्णे॥ मखायं॑त्त्वामखस्यं॑त्वाशीर्ष्णे ॥९॥
ऋजवेत्वा ॥ साधवेत्वासुचित्यैत्वा ॥ मखायंत्वामखस्य॑त्वाशीर्ष्णे॥

तिमन्त्रम् ॥ ९ ॥ पक्षानुद्धरति । ऋजवेत्वेति प्रतिमन्त्रम् । ऋजवेत्वा असौवैलोकः ऋजुः । सत्यमेवतत्रकौटिल्यरहितम् । सत्यम्बाआदित्यः ऋजवेत्वा आदित्यायत्वाम् उद्धरामीतिशेषः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एषउप्रथमः प्रवर्ग्यः। साधवेत्वा अयंवैसाधुर्योयुः। एषहीमान् लोकान् सिङ्क्तेप्रतिक्षितःपवते। एषउद्वितीयः प्रवर्ग्यः। सुक्षित्यैत्वा अयंवैलोकः सुक्षितः। अस्मिंल्लोके सर्वाणिभूतानि क्षियन्ति। अग्निर्हिवासुक्षितः। अग्निर्हि अस्मिन्लोके सर्वाणिभूतानि परिगृह्यवसति। एषउत्तृतीयः प्रवर्ग्यः। अजापयसापरि सिञ्चतिमहावीरान् मखायत्वेतिप्रतिमन्त्रम्। महावीरासंभरणं समाप्तम्॥ १०॥ महावीरंप्रोक्षति। यमायत्वामखायत्वा सूर्यस्यत्वातपसे। प्रोक्षा

मखायंत्वामखस्यंत्वाशीर्ष्णे॥ मखायंत्वामखस्यंत्वाशीर्ष्णे॥१०॥

[१०] यमायंत्वा॥ मखायंत्वासूर्य्यस्यत्वातपसे। देवस्त्वासवितामध्वानक्तुपृथिव्याः सधस्पृशंस्पाहि॥ अर्च्चिरसिशोचिरसितपोसि॥ ११॥ अनाधृष्टापुरस्तात्॥ अनाधृष्टापुरस्तादग्नेराधिपत्य्

मौतिशेषः। महावीरमनक्ति। देवस्त्वासवितामध्वानक्तु इतिव्याख्यातम्। रजतशतमानंखरे उपगूहति। पृथिव्याःसधस्पृशः। संस्पृशतीतिसंस्पृक् क्विबन्तस्यैतद्रूपम्। हेरजतपृथिव्याः संस्पृशोराक्षसात् महावीरम्माहिंगोपाय। महावीरमाज्यवन्तं निदधाति। अर्चिरसिशोचिरसि तपोसि ऋज्वर्थम्॥ ११॥ अनाधृष्टेतिवाचयति प्रादेशमधराविधारयन्। हेपृथिवि यात्वम् अना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धृष्टाऽअधर्षितारश्चोभिःपुरस्तात् तांत्वांब्रवीमि। अग्नेःआधिपत्येसति आयुर्मेदाः देहि। यात्वं-पुरुषतोदक्षिणतोभवसि। तांत्वांब्रवीमि इन्द्रस्याधिपत्येसति प्रजाम्मेदाःमह्यंदेहि। यात्वंसुषदा स्वास्थेया साध्वस्मिन्सीदतीतिसुषदा। पश्चाद्भवसि तांत्वांब्रवीमि। देवस्यसवितुः आधिपत्येसतिच-क्षुर्मेदाः देहि। यात्वम् आशुतिः। आश्रयन्त्यस्मिन्यजमाना इत्याशुतिः। यज्ञियोच्चसौदेशः।

ऽआयुर्म्मेदाऽ पुरुषतोदक्षिणतऽइन्द्रस्याधिपत्येप्रजाम्मेदाऽ॥ सुषदा पुरश्चाद्देवस्यसवितुराधिपत्येचक्षुर्म्मेदाऽआशुतिरुत्तरतोधातुराधिप त्तेरायस्पोषम्मेदाऽ ॥ विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्यऽओ जोमेदाविश्वाभ्योमानाष्ट्राभ्यस्पाहिमनोरश्ववासि ॥ १२ ॥

उत्तरतोभवसि। तांत्वांब्रवीमि। धातुराधिपत्येसति रायस्पोषम् धनसमृद्धिम्मेदाः देहि। यात्वं-विधृतिः विधारिणीउपरिष्टाद्भवसि। तांत्वांब्रवीमि बृहस्पतेः आधिपत्येसति ओजःमेदाः। दक्षिणतऽउत्तानेन पाणिनानिन्द्रते। विश्वाभ्योमानाष्ट्राभ्यस्पाहि। सर्वाभयः माम्आर्त्तिभ्यः गोपायेति। इमामभिहश्यजपति। मनोरश्ववासि। अश्वाइवा इयंभूत्वा मनुष्यवाहेतिश्रुतिः॥ १२॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विकङ्कतशकलैः परिश्रयति । स्वाहामरुद्भिः परिश्रीयस्व । हेप्रवर्ग्य यस्त्वं स्वाहाकारः तंत्वांब्रवीमि । मरुद्भिःरश्मिभिः यद्वा विशोवैमरुतइतिश्रुतिः ताभिःपरिश्रीयस्व । कर्मणिश्यक् । आश्रीयस्व । मरुतस्त्वामाश्रयन्त्वित्यर्थः । सुवर्णशतमानेनापिदधाति । दिवः दुलो । कस्य संस्पर्शनोरक्षसो महावीरेपाहिगोपाय । अथवा । द्युलोकस्य संस्पर्शनकर्तृन् देवान्त्वं हेमहावीरपाहि । पवित्रैराधुनोति । मधुमधुमधु । मधुप्रणो मधुसामान्यादुच्यते । सद्यं-

स्वाहामरुद्भिः॥परिश्रीयस्वदिवःसुश्लोकस्पृशस्पाहि॥मधुमधुमधु॥१३॥ गर्भोदेवानाम् ॥ गर्भोदेवानांस्मितामंतीनाम्पतिः प्रजानाम् ॥ सन्देवोदेवेनसवित्रागंतुसꣳसूर्य्येणरोचते ॥ १४ ॥ समग्निः ॥ समग्नि

गानारसः तंमहावीरेस्थापयति ॥ १३ ॥ महावीरस्तुपतिष्ठते । गर्भोदेवानामित्यवकाशैः तेनत्वष्टमन्तइत्यतःप्राक् । योगर्भोदेवानाम् गृह्णातीतिगर्भः आदित्यात्मनामहावीरः । यश्च पितामतीनां गोपायितानुद्धीनाम् । यश्च पतिरधिपतिःप्रजानाम् । यश्च । संदेवोदेवेनसवित्रागत । संगत । संगच्छते देवःप्रवर्ग्यःदेवेनसवित्रासह । यश्च संरोचते धर्मसूर्येणसह एकीभूतः तंवयंस्तुमइति वाक्यशेषः ॥ १४ ॥ समग्निः । अनुष्टुप्वाच्यौ । यश्च । संगतसंगच्छतेअग्निःधर्मःअग्निनासूर्याख्ये-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नसह। यश्चसंगत संगच्छते दैवेनसवित्रासह । यश्चसमरोचिष्ट संरोचतेदीप्यते सूर्येणसह-स्पर्द्धयन् । तंवयंस्तुम इतिवाक्यशेषः। स्वाहाकारः आदित्यप्रीणनार्थः। यश्चस्वाहा अग्निःसंग-त। संगच्छते। तपसाआदित्य संवन्धिनासह । यश्चसंगत । संगच्छते दैव्येनसवित्रासह । यश्चसमरूरुचत। समरोचतसंरोचतेसूर्येणसह स्पर्द्धयन्। तंवयंस्तुमइतिवाक्यशेषः॥ १५ ॥ धर्ता-दिवः। जर्ब्बहती। घर्मस्तुतिः। योयंधर्ताधारयिता दिवःद्युलोकस्य। यश्चतपसः रश्मिजा-

रग्निनागतुसन्दैवेनसवित्रासꣳसूर्य्येणारोचिषृ ॥ स्वाहासमग्निस्तपं सागतुसन्दैव्येनसव्वित्रासꣳसूर्य्येणारूरुचत ॥ १५ ॥ धुर्ताद्विवः ॥ धुर्ताद्विवो व्विभातितपंसस्पृथिव्यान्धुर्ताद्विवोद्विवानाममर्त्यस्तपो जाः ॥ व्वाचंमस्म्मेनियच्छदेवायुवम् ॥ १६ ॥ अपंश्यङ्गोपाम् ॥ अपं

लस्य धर्त्ता । विभातिचपृथिव्याम् अवस्थितः । धर्त्ताधारयिताच देवानाम् । स्वयंचदेवः अमर्त्यःमनुष्यधर्मरहितः । तपोजाः। तपःआदित्यः तस्माज्जायते । सोयमवाचम अस्मेअस्मासु । नियच्छ । नियच्छत्वितिपुरुषव्यत्ययः। निगृह्णातुस्थापयतु । देवायुवम् । यादेवान् यौतिमि-श्रयति आगमयति सातथोक्तांदेवायुवम् ॥ १६ ॥ अपश्यन् । त्रिष्टुप् । आदित्यात्मनाघर्मस्तुतिः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यमहमपश्यम् । गोपांगोप्तारम् । अनिपद्यमानम् अनालम्बनेअन्तरिक्षेगच्छन्नासौपतति । आचपराच पथिभिश्चरन्तम् । आचरन्तंच आगच्छन्तंच पराचरन्तंच । परागच्छन्तंच । पथिभिः देवैःसह । ससप्रीचीः । सएवससप्रीचीः सहस्यसप्रिरादेशः । सहाञ्चनाः दिशोरश्मिन्वासहस्यम् । सविषूचीः । विषु इतिनिपातोनानावचनः । अञ्चतेःपरंक्विप् । नानाञ्चनाः दिशः नानाञ्चनान्वारश्मीन् । वसानः आच्छादयन् । आवरीवर्त्ति । पुनःपुनरावर्त्तते । भुवनेषु त्रिषुलोकेषु । अन्तर्मध्येवावस्थितः ॥ १७॥

प्रयङ्गोपामनिपद्यमानमाचपरांचपृथिभिश्चरन्तम् ॥ ससप्रीचीꣳ सविषूचीर्वसानऽआवरीवर्त्तिभुवनेष्वन्तꣳ ॥ १७ ॥ विश्वासाम्भुवाम्विश्वासाम्भुवाम्पतेविश्वंस्यमनसस्पतेविश्वंस्यव्वचसस्पत्नि

बिश्वासांभुवाम् । सर्वासांपृथिवीनांपते हेप्रवर्ग्य । विश्वस्यमनसः सर्वस्याप्राप्त्याश्रयस्यमनसः पते । विश्वस्यवचसः सर्वस्यचयीलक्षणस्यवचसःपते सर्वस्यवचसः सर्वस्यलौकिकस्यवचसःपते । त्वां स्तुमइतिशेषः । यतश्च त्वंदेवश्रुत् देवैःश्रुतः अतोत्वांयाचे । हेदेवघर्मत्वंदेवःसन् देवान्पाहिगोपाय । अत्रप्रावीरनुवांदेवप्रीतये । अत्रसवे अस्मिन्नवसरेवा । प्रावीरितिपुरुषव्यत्ययः । प्रावतुतर्प्पयतु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

घर्मः। वांयुवाम् हेमश्विनो। अनुदेववीतये। ततोनन्तरम् देवतर्पणायनमस्करोत्त्वितिवाक्यशेषः। मधुमाध्वीभ्याम्। मधुनामब्राह्मणंतद श्विभ्यांददौदधाङ्ङाथर्वणः। तदेतदुक्तम्। मधुमाधूचीभ्याम्। मधुब्राह्मणं प्रतिअश्वतोगच्छत: तोताभ्यामध्वश्वनाभ्याम्। शेषंपूर्ववद्व्याख्येयम् ॥१८॥ हृदेत्वा। परोष्णिक्। हृदेत्वाहृदयार्थंत्त्वांसुमइतिशेषः। एवंमनसे त्वांसुमः। दिवे अर्थाय-

तेसर्व्वंस्यव्वचसस्पते ॥ देवम्श्रुत्वन्देवघर्म्मदेवोदेवान्प्राहृत्यत्र प्रावीरनुवान्देववीतये॥ मधुमाद्ध्वीभ्याम्मधुमाधूचीभ्याम्॥१८॥ हृदेत्वा॥मनसेत्त्वादिवेत्वा सूर्य्यायत्वा॥ ऊर्द्ध्वोऽअध्वरन्दिविदेवेषु धेहि ॥ १९ ॥ पितानः॥ पितानोसिपितानोबोधिनमस्तेऽअस्तुमा

त्वांसुमइतिशेषः। सूर्यायत्वा सूर्यतर्प्पणायत्वांसुमः। यस्माच्च सर्वकार्येषुत्वामेवस्तमः। अतोब्रूमः। ऊर्द्धः अवहितचित:सन् अध्वरन्दिविदेवेषु धेहिनिधेहि स्थापय। १९ ॥ पितानोसि। गायत्री। यतश्चत्वम् पिता नःअस्माकमसिभवसि। अतोब्रवीमि। पितेवभूत्वा नःअस्मान् बोधिबोधयसर्वथा। नमः तेअस्तु मामाहिंसोः हिंसीथाः। पत्नींवाचयति महावीरमोक्षमाणाम्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वष्टृमन्तस्त्वा । यजुः । यतश्च त्वाष्ट्रसंयुक्ताः । त्वष्टाहि चेतसांविकर्त्ता । त्वामेवसपेम । सपतिः स्पृशतिकर्मा । मैथुनार्थमुपस्पृशामः । अतःपुत्रान् पशून्मयिधेहि स्थापय । प्रजांचभूयोभूयः अस्मासु धेहिस्थापय । किंच । अरिष्टाअनुपहिंसिताअहम् । सहपत्यासहभर्त्राभूयासम् । आशीः ॥ २० ॥ रौहिणोजुहोति । अहःकेतुनाप्रज्ञया कर्मणावा । सहितम् जुषताम् परिगृह्णातु । कथंभू-

मांहि᳖सीः ॥ त्वष्ट्रृमन्त्स्वासपेमपुत्रान्प्पशून्म्मयिधेहिप्प्रजामुस्स्मासुधेह्य्यरिष्टाह᳖सहपत्त्याभूयासम् ॥ २० ॥ अहः᳕ केतुना ॥ जुषताꣳसुज्ज्योतिर्ज्ज्योतिषास्वाहा ॥ रात्रिः᳕ केतुनाजुषताꣳसज्ज्योतिर्ज्ज्योतिषास्वाहा ॥ २१ ॥ [११]

इतिवाजसनेयसंहितायांदीर्घपाठेसप्तत्रि᳖शोऽध्यायः ॥ ३७ ॥

तम् । यदहः सुज्योतिः । ज्योतिषांशोभनज्योतिष्कम् केनज्योतिषास्वकीयेनैव । स्वाहासुहुतं चैतद्धविभवतु । रात्रिःकेतुना । अधस्तनेनव्याख्यातम् ॥ २१ ॥

इति उव्वटकृतौ मन्त्रभाष्ये सप्तत्रिंशोध्यायः ॥ ३७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

(१) अथधर्म धुग्होहनार्थं रज्जुमादत्ते ॥ देवस्यत्वेतिवग्राख्यातम् । आददेगच्छामि । यतस्त्वम् अदित्यैरास्नासि ॥ १ ॥ गामाह्वयति । इडएहि । अतस्मिंस्तच्छब्द स्तदतिदेशार्थः । हेइडे मानवि आइहि आगच्छ दोहाय । हेअदिते देवमातः एहि । हेसरस्वति वाक्एहि असाविति नामग्राहण-

* देवस्यंत्वा॥देवस्यंत्वासवितुःप्प्रसुवेश्विनोर्ब्बाहुभ्यांम्पूष्णणोहस्तांभ्याम् आददेदित्यैरास्नांसि ॥१॥ इडाएहिं॥ इडाएह्यदितऽएहिसरस्वत्येहिं॥ असावेह्यसावेह्यसावेहिं॥२॥ अदित्यैरास्नां न्त्रिरुच्चैः । असौधवलेएहि । त्रिः । आमन्त्रितस्येत्यादिरुदात्तः ॥ २ ॥ अत्यैरास्नासीति गांपशेनप्रतिमुञ्चति अदित्यैरास्नासि । इन्द्राण्याउष्णीषः इन्द्राणी इन्द्रस्यपत्नी तस्याः शिरोवेष्टनं त्वमसि ॥

(१) का० देवस्यत्वेति रज्जुसन्दानमादायेडएहीति गमाह्वयति नाम्ना च त्रिरुच्चैरपरेण गार्हपत्यं गच्छन् । अध्वर्युर्देवस्यत्वेति रज्जुसन्दानमादाय गार्हपत्यस्य पश्चाद्गच्छन् इडएहीति वाक्यत्रयेण घर्मदुघां गामाह्वयति असावेहीति गोर्नाम्ना चोच्चैस्त्रिवारमाह्वयतीति सूत्रार्थः ॥

* देवस्यत्वाष्टोपमायत्वाच्चत्रयत्वादशकौत्रयोष्टावि ठ० मतिः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वत्समुत्सृजति । पूषासि । यथापूषा वायुपुष्टिमाप्यायति । एवंत्वमपि प्रस्रावनेन जगदुत्पत्तिबीजंप-
यआप्यायसि । वत्समुन्नयति । घर्मायदीष्व । दयसि । रूपदयाकर्मापि यसउपदयांकुरु मासर्वमु-
पासीः ॥३॥ पित्वनेदोग्धि । अश्विभ्यांपिन्वस्व । अश्विभ्यामर्थाय पिन्वस्वप्रावयस्व । एवमेव सर-
स्वत्यैइन्द्रायच । विप्रुषाभिमन्वयते । स्वाहेन्द्रवदिति । यद्दुह्यमानं स्कन्नंतत्सुहुतमस्तु वृन्द्रवत्

सौन्द्राणाऽउषसीषं॑ः ॥ पूषासिंघर्म्मायंदीष्व ॥३॥ अश्विभ्यांम्पिन्व
स्वसरंस्वत्यैपिन्वस्वेन्द्रायपिन्वस्व ॥ स्वाहेन्द्रंवृत्स्वाहेन्द्रंवृत्स्वाहेन्द्रं
वत् ॥ ४ ॥ यस्ते ॥ स्तनं॑ः शशयोयोमंयोभूर्य्योरंत्नधावंसुविद्यः

इन्द्रसंयुक्तमिदितिः ॥ ४ ॥ स्तनमालभते । यस्तेस्तनः । विष्टुब्बाग्देवत्या । वाग्देवीसरस्वतीति-
श्रुतिः । यः तेतवस्तनः । कथंभूतः । शशयः । शीङ्स्वप्ने । सुप्तइवास्ते अनुपभुक्तोन्यैः । यश्च-
मयोभूः मयःसुखम्भावयति सर्वभूतानाम् । यश्चरत्नधाः । रमणीयानांधनानांधारयिता ।
यश्चवसु वित् वसुविन्दति । यश्चसुदत्रः कल्याणदानः । धनवानपिसन् कश्चिन्नोत्सहतेदातुम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अतएवंविषाते । येनविश्वा । येनच विश्वानि श्वानि पुषाऽसिपुष्णासि वार्याणिवरणीयानि । हेसरस्वति तंस्तनमङ्गह । धातवे । धेटपाने । पानाय । अकःकुरु । गच्छति । उर्वन्तरिक्षमिति व्याख्यातम् ॥ ५ ॥ परीशासावादत्ते । गायत्रंछन्दोसि त्रैष्टुभंछन्दोसि ॥ कट्चु-महावीरंगृह्णाति । द्यावापृथिवीभ्यां त्वांपरिगृह्णामि । परीशासयोः द्यौश्चपृथिवीच अध्यास्तः

सुदत्रंः ॥ येनविश्वाश्वापुष्ण्यंसिव्वार्य्याणिसरंस्वतितमिहधातवेकः ॥ उर्व्वन्तरिक्षमन्वेमि ॥५॥ गायत्रञ्छन्दः ॥ गायत्रञ्छन्दोसित्त्रैष्टुभञ्छन्दोसिद्यावांपृथिवीभ्यांत्वापरिगृह्णाम्युन्तरिक्षेणोपयच्छामि ॥ इन्द्राश्विनामधुनःसारघस्यघर्म्मम्पातम्बसंवोयजंतव्वाट् ॥ स्वाहासूर्य्यं

महावीरेचादित्यः । उपयमन्याउपगृह्णाति । अन्तरिक्षेणोपयच्छामि । अन्तरिक्षेण उपगृह्णामि । उपयमन्या अन्तरिक्षरूपेणसंस्तवः । पयसासिञ्चति ॥ इन्द्राश्विना । हेइन्द्र हेअश्विनौ । मधुनःसारघस्य । सरघा मधुकृतः भ्रमराइवऋत्विजः तैःकृतस्यसारघस्य मधुनःघर्मंपातरसंपिबत । हेवसवः वासयितारः । यजतच वाट्वषट्कारेण । स्वाहासुहुतमस्तु । सूर्यस्यरश्मये ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वृष्टिवनये। वृष्टेःसंभक्त्रे दात्रेवा। सूर्यस्यहवा एकोरश्मिर्वृष्टिवनिर्नामेतिश्रुतिः ॥ ६ ॥ इत-उत्तरं द्वादशवातनामानि यजत्यध्वर्युः। समुद्रायत्वेति। एतस्माद्वै समु द्राःसर्वाणिभूतानि समुद्रवन्तीतिसमुद्रोवातः। समुद्राय त्वां हेप्रवर्ग्यवातायस्वाहा जुहोमि। इयमेवोत्तरत्रापि योजना। सरिराय। एतस्मात्सरिरात्सर्वाणिभूतानि लब्धकार्याणिसन्ति। सहईरतेगच्छति।

स्यरश्मयेवृष्टिवनये ॥ ६ ॥ समुद्रायत्वा ॥ वातायस्वाहासरिरायत्वा वातायस्वाहा ॥ अनाधृष्यायत्वावातायस्वाहाप्रतिधृष्यायत्वा वातायस्वाहा ॥ अवस्यवेत्त्वाव्वातायस्वाहाशिमिदायत्वाव्वातायु स्वाहा ॥ ७ ॥ इन्द्रायत्वा ॥ वसुमतेरुद्रवतेस्वाहेन्द्रायत्वादित्यवते

अनाधृष्याय अशक्याय आधर्षितुम्। अप्रतिधृष्याय अशक्याय प्रतिधर्षितुम्। अवस्यवे अवन-शीलाय। अशिमिदाय। शिमीतिकर्मनाम। क्लेशात्मकञ्चैतत्। अक्लेशदाय ॥ ७ ॥ इन्द्रायत्वा। इन्द्रायत्वा वसुमतेरुद्रवतेस्वाहा। इन्द्रायत्वा आदित्यवतेस्वाहा। इन्द्रायत्वा अभिमातिघ्ने।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सपत्नोवा अभिमातिः। सवित्रेत्वा ऋभुमतेविभुमते वाजवतेस्वाहा। ऋभुर्विभुर्वाजइति सुधन्वनआङ्गिरससप्त त्वयःपुत्राबभूवुः। तेषामयंसंस्तवः। बृहस्पतयेत्वा विश्वदेव्यावतेस्वाहा ॥ ८ ॥ यमायत्वा। अंगिरस्वतेपितृमतेस्वाहा। उपयमन्याआसिंचति। स्वाहाघर्माय सुहुतोघर्मायचैतत्सप्तात्। स्वाहाघर्मः सुहुतोघर्मःपित्रे सप्तादितिशेषः ॥ ९ ॥ वषट्कृतेजुहोति। विश्वा-

स्वाहेन्द्रायत्त्वाभिमातिघ्नेस्वाहा ॥ सुवित्रेत्वाऽऋभुमतेविभुमते वाजवतेस्वाहाबृहस्पतयेत्वाविश्वदेव्यावतेस्वाहा ॥८॥ [८] यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा ॥ स्वाहाघर्म्मायस्वाहाघर्म्मःपित्रे ॥९॥ विश्वाऽआशाः ॥ विश्वाआशादक्षिणसद्विश्वान्देवानयाडिह ॥

आशाः। अनुष्टुवाशिनीः। विश्वाःसर्वाः आशाःकाष्टाः। दक्षिणसत्। दक्षिणसद इतिवचनव्यत्ययः। दक्षिणासीदन्ति। कस्मात्। यतःविश्वान् सर्वान्देवान् अयाट्। यजतेरेतद्रूपम्। अयाचीत् इष्टवान्। इडस्थितः। दक्षिणतोहि स्थितआहुतीर्जुहोति। आहुतिश्चयज्ञः। यत-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवमतो ब्रवीमि। दक्षिणतोग्नेरस्माभिः स्वाहाकृतस्य। वषट्कारानन्तरं स्वाहाकृतस्यघर्म-सामधोः पिवतम् मध्वास्वादस्यपिवतम् अश्विनौ ॥ १० ॥ त्रिरुत्कंपयति। द्विविधाः। द्युलोके स्थापय इमंयज्ञम् इमंयज्ञं द्विविधाः। अभ्यासेभूयांसमर्थंमन्यते। अनुवषट्कृतेजुहोति। स्वाहाग्नये। सुहुतमस्तु अग्नयेयज्ञियाय यज्ञहिताय। शंसुखंच यजुर्भ्यःसकाशात् अस्माकमस्त्वितिशेषः।

स्वाहाकृतस्यघर्म्मस्यमधोः पिवतमश्विना ॥ १० ॥ द्विविधाः ॥ द्विविधाऽइमंय्युज्ञमिमंय्युज्ञन्द्विविधाः ॥ स्वाहाग्नयेयुज्ञियायुशंय्यजुंब्भ्यः ॥ ११ ॥ अश्विनाघर्म्मम् ॥ अश्विनाघर्म्मम्पातु ह्रार्द्दीनुमह्रं

यद्वा शंयजुभ्योदेहि ॥ ११ ॥ ब्रह्मानुमंत्रयते। अश्विनाघर्मम। उष्णिगाश्विनी हेश्विनौ घर्मंपातंपिवतम् ह्रार्द्दीनम् हृदयस्याप्रियम् हृदयंवायोनुवर्त्तते। अहर्दिवाभिः। अहःशब्दः पूर्व्वान्हवचनः। दिवाशब्दस्तु सायाह्नवचनः। सहिप्रवर्ग्यायकालः। एतत्कालोपलक्षिताभिः ऋतिभिः अवनैर्निमित्तभूतैः। तंत्वायिणे नमोद्यावापृथिवीभ्याम्। तंत्वायिणे। लोकेये प्रसारिताः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तन्तवः तुरीशलाकाप्रोताःते तंत्रमित्युच्यन्ते। तन्तुनालिरिव सूत्रपूरणाय एतित्रीन्लोकान् सतंत्रायीआदित्यः तस्मैनमः। उत्तरत्राप्यनुषङ्गः। द्यावापृथिवीभ्याम् नमःअस्तु ॥ १२ ॥ यजमानोनुमंत्रयते। अपाताम्। आश्विनीकुप्। अपाताम् पीतवन्तो अश्विनौघर्मम्। अनुद्यावापृथिवी अमंसाताम्। तच्च घर्मपानमश्विनोः द्यावापृथिवीअपि अमंसाताम् अनुमतवत्यौ साध्वभूदिति। हिंवाभिंरुतिभिंः ॥ तन्त्रायिणेनमोद्यावांपृथिवीभ्यांम् ॥ १२ ॥ अपां तामुश्विनां ॥ घर्ममनुद्यावांपृथिवीऽअंमꣳसाताम् ॥ इहैवगातयंः सन्तु ॥ १३ ॥ इषेपिंन्वस्व ॥ इषेपिंन्वस्वोर्ज्जेपिंन्वस्वब्रह्मणेपिन्वस्वक्षत्रायंपिन्वस्वद्यावांपृथिवीभ्यांपिन्वस्व ॥ धर्म्मासिसुधर्म्मा यतएवमतोब्रवीमि। इहएव अवस्थितानामस्माकम रातयःधनानिसन्तु ॥ १३ ॥ पिन्वमानमनुमंत्रयते। इषेपिन्वस्व। वृष्टितर्पणायविप्रुषोमुञ्च। एवम् ऊर्ज्जेअन्नाय। ब्रह्मणेब्राह्मणेभ्यः। क्षत्रायक्षत्रियेभ्यः द्यावापृथिवीभ्यांपिन्वस्वेति। उत्क्रामत्युत्तरपूर्वार्द्धम्। धर्मासिसुधर्म। धर्मासिधारणंसमस्तस्य जगतोस्याहुतिपरिणामद्वारेण। हेसुधर्म साधुधारणशील। खरेसादयति। अमेनि।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मिडहिंसायाम्। अहिंसन् अक्रुध्यन्। अस्मे अस्मासु। नृ णानि। नृन्नमयन्तीति नृम्णानिधनानि। धारयस्थापय। ब्रह्मधारय क्षत्रं धारयविशन्धार। वैवर्णिकानस्मासुस्थापय ॥ १४ ॥ शकलैर्जुहोति। स्वाहापूष्णे। अयंवैपूषा योयंपवते। इतिवायुः। एषहीदंसर्वंपुष्यति। एषउप्राणः। प्राणमेवास्मिन्निदधाति। इत्येतदुक्तम्। शरसे। अस्तिशरशब्दः। कारुडवचनः। अस्तिचसान्तः दधउपरिस्नेहः शरइतियजमानाः प्राहुःतदभिप्रायेणैतदुच्यते। स्वाहागावभ्यः प्राणेभ्यः विषयग्-

मेन्न्युस्मेनृम्णानिधारयब्रह्मधारयक्षत्रन्धारयविशन्धारय ॥ १४ ॥ स्वाहापूष्णे॥ शरसेस्वाहागावभ्यःस्वाहाप्रतिरवेभ्यः॥ स्वाहापितृभ्यऽऊर्ध्वबर्हिभ्योघर्मपावभ्यः स्वाहाद्यावापृथिवीभ्याःस्वाहाविश्वेभ्योदेवेभ्यः ॥ १५ ॥ स्वाहारुद्रायरुद्रहूतयेस्वाहासभ्यो

हणशीलेभ्यः। स्वाहाप्रतिरवेभ्यः। प्राणाःप्रतिरवाः तान्प्राप्यसर्वंजगद्रमते। स्वाहापितृभ्यःऊर्ध्वबर्हिभ्यः। ऊर्ध्वमग्रागग्रं बर्हिर्येषांतएवमुच्यन्ते। सोमपाह्येतदुक्त्यर्थः। घर्मपावभ्यःघर्मपातृभ्यः। स्वाहाद्यावापृथिवीभ्याम्। प्राणोदानौवैद्यावापृथिवी। स्वाहाविश्वेभ्योदेवेभ्यः। प्राणोवैविश्वेदेवाः॥१५॥ स्वाहारुद्रायरुद्रहूतये। रुद्रहूतिस्तोत्रनाममु पठितम्। रुद्रैःस्तोत्रभि राह्वयतेसरुद्रहूतिः। महा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वीरादुपयमन्यां प्रत्यानयति। स्वाहासंज्योतिषाज्योतिः। स्वाहासंगच्छतां ज्योतिषाज्योतिः। ज्योतिर्वा इतरस्मिन् वायौभवति। ज्योतिरितरस्यामितिश्रुतिः। अहःकेतुना रात्रिःकेतुना इतिचव्याख्यातम्। भक्षयति। मधुहुतम् यस्मान्मधु उत्कटरसम् हुतम्। क्व। इन्द्रतमेइन्द्रियवत्तमेवीर्यवत्तमे। अग्नौतवास्माभिः अतअवशिष्टम् अश्यामव्याप्नुयामः भक्षयामः। तेतवाशम्।

तिंषाः ॥ अहः केतुनाजुषताꣳसुज्ज्योतिर्ज्ज्योतिंषास्वाहा॥रात्रिः केतुनाजुषताꣳसुज्ज्योतिर्ज्ज्योतिंषास्वाहा ॥ मधुंहुतमिन्द्रतमेऽअग्नावग्नश्यामंतेदेवघर्म्मनमस्तेऽअस्तुमामांहिꣳसीः ॥ १६ ॥ अभीमम् ॥ अभीमम्मंहिमादिवंविप्रोबभूवसप्रथाः ॥ उतश्रवंसापृथिवीꣳस

हेदेव घर्मसर्वथानमस्तेअस्तु। मामाहिंसीरित्यात्मनः परित्राणमाह ॥ १६ ॥ महावीरमासं द्यां करोति। अभीमम् गायत्रीबृहत्यौ। नचगायत्र्या अवसानमस्ति। अतिशक्करीवा आग्नेयी अभिवभूव अभिभवति। इमन्दिवं महिमायस्यतव। कथंभूतः विप्रःमेधावी। सप्रथाःसर्वतःपृथुः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

महिम्नोविशेषणद्वयम् । तंत्वांब्रवीमि उतश्रवसा । अपिच धनेनश्रवणीयेन वायशसा । पृथिवीम् अभिवभूवेत्यनुषङ्गः । संसीदस्वेतिव्याख्यातम् । रोचस्वदीप्यस्वेत्यनर्थान्तरम् ॥ १७ ॥ द्रुतउत्तरे उत्सादनमन्त्राः । शालाकेषुजुहोति । याते तवहेधर्म । दिव्यादिविभवाद्युलोकं प्रविष्टा । शुक्-

सीदस्वमुहाँ २ ॥ ऽअंसिरोचंस्वदेवुवीतंमꣳ ॥ व्विधूममंग्नेऽअरुषम्मिं येड्यसृजप्प्रंशस्तदर्शतम् ॥ १७ ॥ यातेंधर्म्मद्दिव्याशुग्ग्यागांय्च्याꣳ हंविर्द्धानें ॥ सातुऽआप्प्यांयतान्निष्ट्यांयतान्तस्यैंतेस्वाहां ॥ यातेंध र्म्मान्तरिंक्षेशुग्ग्याक्तिष्टुब्भ्याग्नीध्रे ॥ सातुऽआप्प्यांयतान्निष्ट्यांयतां न्तस्यैंतेस्वाहां ॥ यातेंधर्म्मपृथिव्याꣳशुग्ग्याजगंत्याꣳसदस्यां ॥

दीप्तिः । याचगायत्र्यां प्रविष्टा । याचहविर्द्धानेप्रविष्टा । सातेतव आप्यायतान् वर्द्धताम् । निष्ट्यायताम् स्त्यैष्ट्यैशब्दसंघातनयोः । निष्ट्यानासंहताभवतु । तस्यैशुचे तुभ्यञ्च हेधर्मस्वाहा ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

याते अन्तरिक्षे विष्टुभिआग्नीध्रे। समानमन्यत् यातेपृथिव्याम् जगत्याम् । सदस्या सदसि-भवासदस्या। सदसिप्रविष्टा। समानमन्यत् ॥ १८ ॥ निःक्रामति। क्षत्रस्यत्वा महावीरोभिधी-यते दृहत्या। क्षत्रस्यसंवन्धिनः परस्पाय परस्यपालनाय । हेमहावीर अनुक्रामामेतिचतुर्थपादे भविष्यतितस्येह संवन्धः। अनुक्रामाम। किञ्च ब्रह्मणः तन्वंशरीरंपाहि गोपाय। किञ्च विशः।

सातऽआप्प्यांयतान्निष्ठ्यांयतान्तस्यैतेस्वाहा॥१८॥[१०] क्षत्त्रस्यत्वा ॥ परस्पायुब्रह्मणस्तन्वम्पाहि ॥ विशस्त्वाधर्म्मणाव्ययमनुक्रामा मसुवितायुनव्यसे ॥ १९ ॥ चतुःस्रक्तिर्नाभिः ॥ चतुःस्रक्ति

यज्ञोवैविशः यज्ञस्यधर्मणा धारणेननिमित्तभूतेन त्वात्वाम् हेमहावीरवयम् अनुक्रामाम अनु-गच्छेम। सुवितायसुगतायसुप्रसूतायवा। नव्यसे नवतरायच कर्मणेअनुक्रामाम ॥ १९ ॥ महावीरंनिदधाति। चतुःस्रक्तिः। दिशोमहावीरस्य स्रक्तयःकोणाः। यःचतुःस्रक्तिः। यश्च-नाभिः नहनम् ऋतस्यसत्यस्यवा यज्ञस्यवा। एवंसप्रथाः सर्वतःप्रथुः। सः नःअस्माकम् विश्वायुः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सवस्यायुष:दाता । सप्रथा:सर्वतश्चप्रथयिता अस्तु । मन:सर्वायु: सप्रथा: । अभ्रासेभूयांसमर्थ-
मन्यन्ते । त्वत्प्रसादाच्च । अपद्वेष: । अपगच्छतुद्वेष: अस्मत्त: । वीतरागा:स्यामेत्यभिप्राय: । अप-
ह्वर: । ह्वरश्चलचलने । अपगच्छतु ह्वर:चलनम अस्मत्त: । जनित्वाम्रियते मृत्वाजयते दुत्थे-
तच्चलनमभिप्रेतम् । अन्यव्रतस्यसश्चिम । अन्यत् व्रतंकर्मयस्य मनुष्यकर्मण: सकाशात् जगद-

र्नाभिर्मृतस्यंसुप्रथाꣳ सनोव्विश्श्वायुꣳ सुप्रथाꣳसनꣳ सुर्व्वायुꣳसुप्र थाꣳ ॥ अपद्वेषोऽअपह्व्वरोन्यव्व्रतस्यसश्चिम ॥२०॥ घर्म्मैतत् ॥ घ र्म्मैतत्तेपुरीषुन्तेनुव्वर्ड्ढस्वचाचप्यायस्व॥ व्वर्द्धिषीमहिचव्व्रयमाचप्या सिषीमहि ॥ २१ ॥ अचिक्रदद्वृषाहरिर्म्महान्मित्रोनदर्शत: ॥ स६

नुग्रहात्मकंयस्यसतथोक्त: । तस्यकर्मवयं सेवामहे सायुज्यंप्राप्ता:सन्त: ॥ २० ॥ पयसापूरयति ।
घर्मैतत् । अनुष्टुप् । घर्मउच्यत । हेघर्म एतत् पय: तेतवपुरीषम् पूरयित्व । तेनवर्द्ध स्वेत्यादि-
व्याख्यातम् ॥ २१ ॥ परिषिंचति । अचिक्रदत्परोक्षिक् । घर्मात्मना दित्य:स्तूयते । योयंमहावीर:

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रहृज्यमानः अचिक्रदत् क्रन्दतिःशब्दार्थः । पुनःपुनःशब्दमकरोत् । हृषावर्षिता आकृतिपरिणामद्वारेण । हरिःहरितवर्णः हर्त्तीवारसानाम् महान्प्रभावतः । मित्रोनदर्शतः मित्रदृवदर्शनीयः । मित्रोहि सर्वसौम्यमित्रम् । संसूर्येणदिद्युतत् । संगत्यसूर्येण सहद्योततेसमा-

सूर्य्येणदिद्युतदुदधिर्न्निधिः ॥ २२ ॥ सुमिच्चियानंः ॥ सुमिच्चियानु ऽआपुऽओषंधयः सन्तुदुर्म्मिच्चियास्तस्म्मैसन्तुयोस्मान्द्वेष्टियञ्चंव्वय न्द्विष्म्मः ॥ २३॥ उद्वयम् ॥ उद्वयन्तमंसस्प्परिस्वः पश्यंन्तुऽउत्तरम् ॥ देवन्देवंत्चासूर्य्यमगंन्म्मज्ज्योतिरुत्तमम् ॥ २४ ॥ एधोंसि ॥

नदूव । उदधिःउदकधारणः । निधिश्चसुखानाम् ॥ २२ ॥ सुमिचियान उद्वय मेघोसौतिव्याख्यातास्वयोमंवाः ॥ २३ ॥ २४ ॥ २५ ॥ दधिघर्मग्रहणम् । यावतीद्यावापृथिवी । महाद्दृहतीऐन्द्रीयावतीयावत्परिमाणे द्यावापृथिव्यौ । यावच्चैतम् सप्तसिन्धवः सप्तसमुद्राः वितस्थिरे आप्नुवन्ति ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तावन्तम् हेइन्द्र तेतवग्रहम् उर्ज्जाअन्नेन सहगृह्णामि । अच्चितमनुपच्चीणम् । मयिगृह्णामि । मयीत्यधिकरणनिर्देशः । विज्ञानायेतिशेषः । गृह्णामीत्यादिव्याख्या तम् ॥ २६ ॥ भच्चयति । मयित्यत् । पंक्तिः । यजमानाशीः । मयित्यत् तत्इन्द्रियंवीर्यम् । बृहत्महत् । अस्तु । मयिचदत्तः संकल्पसंपत्तिःअस्तु । मयिच क्रतुःसंकल्पः विशिष्टोस्तुः । मयिचधर्मः त्रिशुक् । तिस्रः शुचोसोतिवि-

एधोस्येधिषीमहिंसमिदंसितेजोंसितेजोमयिधेहि ॥ २५॥ यावंतीद्या वांपृथिवी ॥ यावंच्चसप्तसिन्धंवोव्वितस्थिरे ॥ तावंन्तमिन्द्रतेग्रहं मूर्ज्जागृंह्णाम्यच्चितम्मयिंगृह्णाम्यच्चितम् ॥ २६॥ मयित्यत् ॥ मयि त्यदिंन्द्रियम्बृहन्मयिदच्चोमयिक्रक्रतुं÷ ॥ घर्म्मस्त्रिशुग्विराजतिव्वरा जाज्योतिंषासहव्ब्रह्मंणातेजंसासह ॥ २७ ॥ पयंसोरेतं÷ ॥ पयंसो

शुक् । तास्वव्याख्याता शाकलमन्त्रेषु । विराजति विराजत्विति लकारव्यत्ययः । विराजाआदित्याख्येन ज्योतिषासह । ब्रह्मणात्रव्याख्येन तेजसासह ॥ २७ ॥ किञ्च । पयसोरेतः । पयसःयत्रेतः जगदुत्पत्तिवीजम् । आभृतमाहृतम् । दस्यदोहंप्रपूरणम् । अशीमहिव्याप्नुवाम ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उत्तरानुत्तरांसमाम्। उत्तरामुत्तरामिति वीप्सावचनम्। समाशब्दः संवत्सरवचनः। प्रतिसंवत्सरंच। अशीमहि। सदाकालंयायजूकाः स्यामेत्यर्थः। त्विषः संट्क्। महाव्रतीये भक्षणंदधिघर्मस्य। यस्त्वम्। त्विषः। दीप्तेः। संट्क्। संपूर्वोट्टजिः स्वीकरणेवर्त्तते। दीप्तेः स्वीकरणः। तस्यतव। क्त्वेक्त्वोरिति विभक्तिव्यत्ययः। साधुक्रतुभूतस्य। दक्षस्य। संकल्पसिद्धिभू-

रेतऽआभृंतन्तस्यदोहंमशीमहुत्युत्तरामुत्तराऽसमाम्॥ त्विषंःसंवृक्त्वेदक्षंस्पतेसुषुम्णस्पंतेसुषुम्णाग्निहुतः॥ इन्द्रंपीतस्यप्रजापंतिभक्षितस्यमधुंमतऽउपंहूतऽउपंहूतस्यभक्षयामि॥२८॥ [१०]

इतिअष्टाक्षिंशोऽध्यायः॥ ३८॥

तस्यच। सुषुम्णस्य साधुसुखभूतस्य। हेसुषुम्ण। सुसुखस्वभाव। तेसुषुम्णाग्निहुतः। षष्ठ्यन्तमेतत्। अग्नौहूयतदित्यग्निहुत् तस्याग्निहुतः। अपिचइन्द्रपीतस्य प्रजापतिभक्षितस्य। मधुमतः रसवतः उपहूतः उपहूतस्य गृहस्यभक्षयामि॥ २८॥

इति उवटकृतौमन्त्रभाष्ये एकोनचत्वारिंशत्तमोध्यायः॥ ३८॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

(१) इतउत्तरं प्रवर्ग्य भेदं प्रायश्चित्तम् स्वाहाप्राणेभ्यः साधिपतिकेभ्यइति पूर्णाहुतिंयावत् ।

* स्वाहाप्प्राणेब्भ्यः ॥ स्वाहाप्प्राणेब्भ्यः साधिपतिकेब्भ्यः ॥ पृथिव्यैस्वाहाग्नयेस्वाहान्तरिक्षायस्वाहावायवेस्वाहा ॥ दिवेस्वाहा सूर्य्यायस्वाहा ॥ १ ॥ दिग्भ्यःस्वाहा ॥ चन्द्रायस्वाहानक्षत्रेभ्यःस्वाहाद्भ्यः स्वाहाव्वरुणायस्वाहा ॥ नाभ्यैस्वाहाप्लुतायस्वाहा ॥ २ ॥ व्वाचेस्वाहा ॥ प्प्राणायस्वाहा प्प्राणायस्वाहा ॥ चक्षुषेस्वाहाचक्षुषे

जुहोति । स्वाहाप्राणेभ्यः । मनोवैप्राणानामधिपतिः । सुश्रुतमस्तु । प्राणेभ्यः मनसासहितेभ्यः ।

(१) का० स्वाहाप्राणेभ्यःसाधिपतिकेभ्यः इति पूर्णाहुतिमाद्यामुत्तमां च मनसः काममाकूतिमिति । तदर्थोऽयम् अध्वर्युः भूमिर्भूमिम् यक्षतेचिदिति मन्त्राभ्यां भग्नं घर्ममभिमृश्य परेष्टादिचतुस्त्रिंशदाहुतीर्हुत्वा स्वाहाप्राणेभ्य इत्याद्यां पूर्णाहुतिं हुत्वा पृथिव्यै स्वाहेत्याहुतिविंशतिं सकृदगृहीतेन हुत्वा मनस इत्यन्त्यां पूर्णाहुतिं करोतीति ॥

* स्वाहाप्राणेभ्यः षडुग्रश्चसप्तद्वीत्रयोदश ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पृथिव्यै स्वाहेत्यादिस्पष्टम् ॥ १ ॥ २ ॥ ३ ॥ मनसःकामम् । पूर्णाहुतिर्होमः । अनुष्टुप् श्रीर्देवत्या यजमानाशीः । मनसःकामं कामप्राप्तिः । आकूतिम् आकवनम् । आत्मनोधर्मो मनसः संयोगेसति जायते । वाचःसत्यम् । यष्टव्यंमयेत्यादि । अशीय । प्राप्नुयाम् । अनयापूर्णाहुत्या । किंच । पशूनां-

स्वाहा श्रोत्रायुस्वाहाश्रोत्रायुस्वाहा ॥ ३ ॥ मनसः कामम् ॥ मनसःकामुमाकूतिंव्वाचः सत्यमशीय ॥ पशूनाꣳ रूपमन्नंस्यरसोयशः श्रीः श्रयतुाम्मयिस्वाहा ॥ ४ ॥ प्रजापतिः सम्भ्रियमाणः सुम्स्वाट्सम्भृतोव्वैश्रवणेवः सꣳसन्नोघर्म्मः प्रवृक्तस्तेजऽउद्यंतऽआश्विनेव नः पयस्यानीयमानेपौष्णणोव्विष्यन्दमानेमारुतः क्लृप्तन् ॥ मैत्रः

रूपम् पशूपकारः । अन्नमारसः । यशश्च । श्रीश्च श्रयताम् आश्रयन्तु । मयि । मामितिविभक्तिव्यत्ययोवा । यन्महावीरभेदनेनापचितंतत्सर्वमुप चीयतामित्यर्थः ॥ ४ ॥ प्रजापतिः संभ्रियमाण

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति महावीरावस्थान प्रतिपादिकाश्रुतिः ॥ ५ ॥ सविताप्रथमेहन्निसप्राह । देवतासंबन्धवि- धानाश्रुतिः । महावीरप्रायश्चितानि समाप्तानि ॥ ६ ॥ उग्रश्च । अग्निकण्डिका । अरण्यध्ययनसा-

शरंसिसन्ताय्यमाने व्वायव्व्योक्ष्यियमाणऽ आग्नेयोहूयमानोव्वाग्घु तः ॥ ५ ॥ सुविताप्प्रथमे ॥ हंन्नुग्निर्द्वितीयेंव्वायुस्तृतीयंऽआदित्य श्चंतुर्थेचुन्द्रमाः पञ्चमऽऋतुः षष्ठेमुरुतंः सप्तमेबृहस्पतिरष्टमे ॥ मित्रोनंवमेव्वरुंणोदशमऽइन्द्रंऽएकादशेव्विश्व्वेदेवाद्वादशे ॥ ६ ॥ उग्रश्च ॥ भीमश्चध्वान्तश्चधुनिश्च ॥ सासह्वाँश्चाभियुग्वा चंव्विक्षिपः स्वाहा ॥ ७ ॥ अग्निर्हृदयेन ॥ अग्निर्हृदयेनाशनिर्ह

मान्यदिहपाठः । मारुतीगौयची विमुखाख्या । भीमश्चध्वान्तश्च धुनिश्च । सासह्वांश्च । अभि- युग्वाच । विक्षिपश्च । अत्रापिच कारःसमुच्चयार्थीयः । एवंसप्तमरुतः ॥ ७ ॥ अग्निर्हृदयेन । आयु-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मेधिकम् आग्रध्यायसमाप्तेः । अरण्येऽध्येयत्वादिहपाठः । (१) हे कण्डिके स्तुति देवताश्वाव

हृदयाग्रेणपशुपतिङ्कृत्स्नहृदयेनभवंयक्ला ॥ शुर्व्वम्मतस्नाभ्या
मीशानम्मुन्युनामहादेवमन्तः पर्शुव्येनोग्रन्देवंव्वनिष्ठुनाव्वसि
ष्ठहनुः शिङ्गीनिकोश्याभ्याम् ॥ ८ ॥ उग्रँल्लोहितेन ॥ मित्रँसौ

यवसंबन्धविधानात् ॥ ८ ॥ (२) स्पष्टार्थः ॥ ९ ॥

(१) तत्राग्निं हृदयेन उग्रं लोहितेन हे कण्डिके ब्राह्मणरूपे देवताश्वावयवसम्बन्धविधानात् अरण्येऽध्येयत्वादिह पाठः । लोमादीन्यङ्गान्येव पठितानि आयासादयो देवता एव ॥ अथ मन्त्रार्थः हृदयेनाङ्गेनाग्निं देवं प्रीणामि । हृदयस्याग्रभागेनाशनिं देवं प्रीणामि । समग्रहृदयेन पशुपतिं देवं प्रीणामि । यक्ष्मायकृता कालखण्डेन भवं देवं प्रीणामि पद्भ्यां इत्यादिना यक्ष्मच्छब्दस्य यकृदादेशः । मतस्ने हृदयास्थिविशेषौ ताभ्यां शर्वं देवं प्रीणामि । मनुना अस्थिसम्बन्धिक्रोधेन ईशानं देवं प्रीणामि । अल्पवर्तमानेन पर्शव्येन पार्श्वास्थिसम्बन्धिना मांसेन महादेवं देवं प्रीणामि पर्शवः पार्श्वास्थीनि । बनिष्ठुःस्थूलान्त्रं तेनोग्रं देवं प्रीणामि । वसिष्ठहनुः वसिष्ठस्य देवस्य हनुः कपोलैकदेशो ज्ञातव्यः यद्वा वसिष्ठा या हनुः कपोलाधो देशः तत्परा हनुरित्यमरः तत्परा कपोलाधोभागस्था हन्याहारसिति हनुः लिङ्गव्यत्ययः वसिष्ठहन्वा कोश्याभ्यां कोशो हृदयकोशः तत्स्थाभ्यां मांसपिण्डाभ्यां च शिङ्गीनि शिङ्गिसञ्ज्ञानि देवतानि प्रीणामि ॥ ८ ॥

(२) लोहितेनासृजा उग्रं देवं प्रीणामि । शोभनं व्रतं कर्म यस्य स सुव्रतस्तस्य भावः सौव्रतं शोभनगमनादिकर्मकर्तृत्वम् ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

(१) तथाचानुक्रमणीकाग्निष्ठꣳ हृदयेनाश्वमेधिकात्त्रत्यएवर्षि लोमभ्यः स्वाहेतिप्रायश्चित्ताहुत व्व्रत्र्त्यैनरुद्रन्दौव्व्रत्र्त्यैनेन्द्रम्प्रक्रीडनंमरुतोबलेनसाह्यान्प्रमुदा ॥ भ वस्यकण्ठ्यꣳरुद्रस्यान्तꣳपार्श्व्यम्मꣳहादिवस्युयक्रंच्छर्व्वस्यंव्वनिष्ठठुꣳपꣳशु पतेꣳ पुरोतत् ॥ ६ ॥ लोमंब्भ्युꣳ स्वाहा ॥ लोमंब्भ्युꣳ स्वाहांत्वचे स्वाहांत्वचेस्वाहालोहिंतायुस्वाहालोहिंतायुस्वाहामेदोंब्भ्युꣳस्वाहा मेदोंब्भ्युꣳ स्वाहां ॥ माꣳसेब्भ्युꣳ स्वाहांमाꣳसेब्भ्युꣳ स्वाहास्नावंब्भ्युꣳ स्वाहास्नावंब्भ्युꣳ स्वाहास्त्थब्भ्युꣳ स्वाहास्त्थब्भ्युꣳ स्वाहांमज्जब्भ्युꣳ

योद्विचत्वारिंशत् ॥ १० ॥

तेनमित्रं देवं प्रीणामि । दुष्टं स्खलनोच्छलनादि व्रतं यस्य स दुर्व्रतः तस्य भावो दौर्व्रत्यम् तेन रुद्रं देवं प्रीणामि । प्रकृष्टं क्रोडनं प्रक्रोडः तेनेन्द्रं देवं प्रीणामि । बलेन सामर्थ्येन मरुतो देवान्प्रीणामि । प्रमुदा प्रकृष्टा मुत् हर्षः प्रमुत् तया साध्यान् देवान् प्रीणामि । भवसा कण्ठ्याम् अत्र षष्ठ्यन्तो देवः अङ्गं प्रथमान्तम् कण्ठ्यं कण्ठे भवं मांसं भवसास्तु विभक्तिव्यत्ययो वाकण्ठ्येन देवं प्रीणामि । एवमग्रेऽपि । पार्श्वसान्तर्मध्ये भवं मांसमन्तःपार्श्व्यं तद्रुद्रसास्तु । यकृत् कालखण्ड महादेवस्यास्तु । वनिष्ठुः स्थूलान्त्रं शर्वस्यास्तु । पुरोतत् हृदयाच्छादकमन्त्रं पशुपतेर्देवसास्तु ॥ ६ ॥

(१) लोमभ्यः स्वाहेति प्रायश्चित्ताहुतयो द्विचत्वारिंशत् । लोमादीन्यङ्गानि । लोमभ्यः स्वाहा लोमानि जुहोमीत्यर्थः त्वचे

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्पष्टार्थः (१) ॥ ११ ॥ (२) ॥ १२ ॥ (३) ॥ १३ ॥

स्वाहाम॒ज्जभ्य॒; स्वाहा॑ ॥ रेत॑से॒स्वाहा॑प्राय॒वे॒स्वाहा॑ ॥ १० ॥ आया॒
साय॒स्वाहा॑ ॥ प्राया॒साय॒स्वाहा॑सँय्या॒साय॒स्वाहा॑व्विया॒साय॒स्वा
हो॑द्या॒साय॒स्वाहा॑ ॥ शु॒चे॒स्वाहा॒शोच॑ते॒स्वाहा॒शोच॑मानाय॒स्वाहा॒शो
काय॒स्वाहा॑ ॥ ११ ॥ तप॑से॒स्वाहा॒ ॥ तप्य॑ते॒स्वाहा॒तप्य॑मानाय॒स्वा
हा॑तप्ताय॒स्वाहा॑घ॒र्म्माय॒स्वाहा॑ ॥ निष्क्रा॑त्यै॒स्वाहा॒प्राय॑श्चि॒त्यै
स्वाहा॑भेष॒जाय॒स्वाहा॑ ॥ १२ ॥ य॒माय॒स्वाहा॑ ॥ य॒माय॒स्वाहा॑न्त॑काय॒

लोहिताय मेदोभ्यः मेदो धातुविशेषः मांसेभ्यः स्नावभ्यः स्नावानः स्नायवो नसाः अस्थभ्यः छन्दसापि दृश्यते इत्यस्थिशब्दस्य हलादिविभक्तावितानङ्ङादेशः मज्जभ्यः मज्जा षष्ठो धातुः रेतसे रेतो वीर्यम् ॥ १० ॥ (१) आयासाय आयस्तदयो देवविशेषाः प्रायासाय संयासाय वियासाय उद्यासाय शुचे शोचते शोचमानाय शोकाय ॥११॥ (२) तपसे तप्यते तप्यमानाय तप्ताय घर्माय निष्क्रतौ प्रायश्चित्तौ भेषजाय ॥१२॥ ३) यमाय अन्तकाय मृत्यवे ब्रह्मणे ब्रह्महतायै विश्वेभ्यो देवेभ्यः एते-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति उव्वटकृतौमंत्रभाष्ये एकोनचत्वारिंशत्तमोध्यायः ॥ ३९ ॥

समाप्तंकर्मकाण्डमिदानींज्ञानकाण्डं प्रस्तूयते । ईशावास्यम् । तिस्रोऽनुष्टुभः । दध्यङ्ङाथर्वणऋषिः स्वशिष्यंपुत्रंवा गर्भाधानादिभिः संस्कारैः संस्कृतशरीरमधीत वेदमुत्पादितपुत्रं यथाशक्त्यनुष्ठितयज्ञमपापं निस्पृहं यमनियमवन्तम तिथिपूजापनीत किल्बिषं मुमुक्षुमुपसन्नं शिक्षयन्नाह ।

स्वाहामृत्यवेस्वाहा ॥ ब्रह्मणेस्वाहाब्रह्महत्यायैस्वाहाविश्वेभ्योदेवेभ्यः स्वाहाद्यावापृथिवीभ्यांस्वाहा ॥ १३ ॥

इतिश्रीसंहितायान्दीर्घपाठेएकोनचत्वारिंशोध्यायः ॥ ३९ ॥

* ॐईशावास्यम् ॥ ईशावास्यमिदंसर्वंयत्किञ्चजगत्यांजग

ईशावास्यम् । इदंसर्वम ईशा । ईशऐश्वर्ये तृतीयान्तमेतद्रूपम् । यदीशनेन । वासंवसनीयम् ममेदमित्यनयाभावनया आच्छादनीयम् । इदंसर्वमितिप्रकृत्यन्तरेण निर्दिश्यतइति यत्किञ्च यत्किञ्चशब्दोभयो देवेभ्यः सुहुतमस्तु । एताहुतीर्हुत्वा द्यावापृथिवीभ्यां स्वाहेत्यन्तयामाहुतिं जुहुयात् एतावता कर्मकाण्डं समाप्तम् ॥ १३ ॥

* ईशावास्यमष्टावंधंतमोनवद्वीसप्तदश ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भिन्नक्रमः । किञ्च । यत्जगत्त्यां पृथिव्यां जगत्जङ्गमादिस्वस्वामि संवन्धाभिलक्षितंसग्रात् । तेनानेनसर्वेण । त्यक्तेन त्यक्तस्वस्वामिसंवन्धेन । भोगान्भुञ्जीथाः अनुभावयस्व । मागृधः । गृधुअभिकाङ्क्षायाम् । माभिकांक्षीः ममेदमितिधियन्त्यज । कस्यस्विद्धनम् । स्विन्निपातो-वितर्कवचनः । कस्यपुनरेतद्धनम् नकस्यचिदपीत्त्यभिप्रायः । सर्वण्ययथार्थानि हिद्रव्याण्युत्पद्यन्ते। तद्यथा । स्त्रियमिति अन्यथाभवंते अन्यथापुत्रः अन्यथाप्राघूर्णकः । तथाकटककेयूरादीन्यलङ्करणा निअन्यंचान्यञ्च पुरुषमुपतिष्ठमानानिदृश्यन्ते । अतःसर्वार्थसाधनस्वस्वामिसंवन्धःसात्वविद्या। नि

गंत् ॥ तेनंत्यक्तेनंभुञ्जीथामागृंधः कस्यंस्विद्धनंम् ॥ १ ॥ कुर्व्व न्नेव ॥ कुर्व्वन्नेवेहकर्म्माणिजिजीविषेच्छुतꣳसमाः ॥ एवन्त्वयिना

स्पृहसग्रयोगेधिकार इतिवाक्यार्थः ॥ १ ॥ निःस्पृहसग्रापि योगिनोज्ञाननिमिते कर्मण्यधिका-रदृत्त्येतमर्थमाह । कुर्वन्नेव । कुर्वन्नेवकर्माणि मुक्तिहेतुकानि । इहलोके । जिजीविषेत् जिजीविषेरिति पुरुषव्यत्ययः । प्रत्यक्षकृतत्वान्मंत्रस्य । जीवितमिच्छेः पश्यहितमितभक्ष-णेन । शतंसमाः इत्युपलक्षणार्थम् । यावदायुः पर्यवसानमित्त्यर्थः । एवम् । त्वयितवेति-विभक्ति व्यत्ययः । 'मुक्तिरस्तीतिशेषः नान्यथेतोस्ति । इतःप्रकारात् अन्यथामुक्तिर्नास्ति । एतदुक्तंभवति । यथास्वर्गप्राप्तौनानाभूताः प्रकाराः सन्तिनतथा मुक्तावित्यर्थः । ननुकर्मणः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

फलेनभवितव्य मथकथंमुक्तिप्राप्नि रित्येतदाशंक्याह । नकर्मलिप्यतेनरे । नहिमुक्त्यर्थंक्रियमाणं कर्मनरेमनुष्येसंबध्यते मुक्तिप्रदानेनो पक्षीणशक्तित्वात् । तथाच बृहदारण्यकम् । तमेतंवेदानुवचनेन विविदिषन्ति । ब्रह्मचर्येणतपसाश्रद्धया यज्ञेनानाशकेनचेति । विविदिषन्ति वेदितुमिच्छन्ति । अनेनैतद्दर्शयति । यावदिच्छा प्रवृत्तिः तावत्कर्मस्वधिकारइति ॥ २ ॥ इदानीं स्वर्गादि प्राप्तिहेतुभूतानि कर्माणियेकुर्वन्तितेनिन्द्यन्ते । आसुर्यानामेति । असुर्याः । परमात्म-

न्यथेतोस्तिनकर्म्मलिप्यतेनरे ॥ २ ॥ असुर्य्यानाम ॥ तेलोकाऽअन्धेनतमसावृताः ॥ ताँस्तेप्रेत्यापिगच्छन्तियेकेचात्महनोजनाः ॥३॥ अनेजदेकम् ॥ अनेजदेकम्मनसोजवीयोनैनद्देवाऽआप्नुवन्पूर्व्वमर्शत् ॥

भाव मद्दयमपेक्ष्य देवाअप्यसुराः । असुराणां स्वभूताअसुर्याः एवंसंज्ञकास्तेलोकाः अन्धेनतमसाअज्ञानलक्षणेनतमसाआवृताः सर्वतोवृताः । तान्लोकान्तेजनाः प्रेत्यमृत्वाअपिमच्छन्ति । येकेचात्महनोजनाः । आत्मानंघ्नन्तियेजनाः तेआत्महनः आत्मानञ्चतेघ्नन्तियेस्वर्गप्राप्निहेतूनिकर्माणिकुर्वन्ति । तेहिजनित्वामृयन्ते मृत्वाचजायन्ते । एवमहर्निशंनाशंप्राप्नुवन्ति ॥ ३ ॥ इदानीमधस्तनयमनियमवतांमुमुक्षूणां यथाभूतं परब्रह्मआत्मत्वेनोपास्यन्तदाह । उक्तञ्च । अहंब्रह्मा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्मिंसंरुध्यइदंसर्वंचन्मन्मयम् वयंविद्यासमुद्दिष्टाविमुक्तिर्यन्निबन्धनीति ॥ अनेजदेकम् । विष्टुप् यत् अनेजत् अचलत्तत्वमस्ति एकमद्वितीयम् विज्ञानघनरूपेण । मनसोजवीयः । मनस्ता वच्छीघ्रम्भवतिततोपिशीघ्रतरं प्रसवदानेनकारणभूतत्वात् नैनद्देवाआप्नुवन् । नचैतत्तत्वं देवा-अपिप्राप्नुंशक्ताः सूक्ष्मत्वात् । पूर्वम् अर्शत् । रिशतिर्हिंसाकर्मा । अविनश्यदास्ते । अना-दिनिधनमित्यर्थः । तद्धावतः तदःस्थानेयदोवृत्तिरुद्देश्यत्वात् । यच्चधावतः अन्यान् पुरुषादीन् अत्येतिअतिक्रम्यगच्छति । तथाचतिष्ठत् सर्वत्रस्थितम् । सर्वशक्तित्वं सर्गगतत्वंचानेनव्याख्या-

तद्धावंतोन्यानत्त्येतितिष्ठत्तस्मिंन्नपोमातरिश्वादधाति ॥४॥ तदेजति ॥ तन्नैजतितद्दूरेतद्वन्तिके ॥ तदुन्तरस्यसर्व्वस्यतदुसर्व्वस्यास्य

यते । तस्मिन्नपः । अत्रापियदो वृत्तिमस्मिंश्चापः कर्माणिमातरिश्वावायुः दधातिस्थापयति । सर्वाणिकर्माणियज्ञदानहोमादीनि समिष्टयजूंषिवायौस्थाप्यन्ते स्वाहावातेधाद्धृतिवायोः प्रति-ष्ठत्वाभिधात् । समष्टिव्यष्टिरूपोह्यसावितिवायुरपियस्मिन्कर्माणिस्थापयति । यागहोमादीनां परमन्निधानमित्यर्थः ॥ ४ ॥ एवंकारणरूपमात्मानमुद्दिश्य । अथेदानींकार्यरूपेणोद्दिशति ॥ तदे-जति । अनुष्टुभस्सिम्रः । तदेवसर्वप्राणिरूपेणावस्थितं सत्एजतिकम्पवद्भवति । क्रियावद्भवति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तन्नैजति । तदेवचनचलतिस्थावररूपावस्थितं सत् तद्दूरे तदेवचदूरेआदित्यनक्षत्रादिरूपेणावस्थितम् । तत् उअन्तिके । उःसमुच्चये । तदेवचअन्तिके पृथिव्यादिरूपेणावस्थितम् । सर्वंखल्विदं ब्रह्मेत्येतद्दर्शनार्थोंग्रन्थः । तदन्तरस्यसर्वस्य । तदेवचअस्यसर्वस्य प्राणिजातस्य । विज्ञानघनरूपेणावस्थितं सत्अन्तर्मध्यतआस्ते । तदुसर्वस्यास्यबाह्यतः । तदेच सर्वस्यास्यप्राणिजातस्य बाह्यतः जनरूपेणावस्थितमास्ते । चेतनाचेतनरूपमनन्तं सर्वगंब्रह्मेत्यर्थः । अस्याउपासनाया अर्चिरादयनुचिन्तनं नास्तीत्येवङ्केचिदाहुः इहैवब्रह्मप्राप्तेः ॥५॥ यस्तु । तुशब्दोविशेषणार्थः यःपुनःसर्वाणिभूता-

वाह्यतः ॥ ५ ॥ यस्तु ॥ यस्तुसर्व्वाणिभूतान्यात्मन्नेवानुपश्यति ॥ सर्व्वभूतेषुचात्मानन्ततोनविचिकित्सति ॥ ६ ॥ यस्मिन्त्सर्व्वाणि

निचेतनाचेतनानि आत्मन्नेवअनुपश्यति । मय्येवसर्वाणि भूतान्यवस्थितानि नमद्व्यतिरिक्ता नि । अहमेवपरंब्रह्म । सर्वभूतेषु चात्मानम् अवस्थितं तद्व्यतिरिक्तंपश्यति । ततोनविचिकित्सति । नसंशते । एवंपश्यतो योगिनः परब्रह्मरूपाण्यात्मसंस्थानि भवन्ति विज्ञानघनान न्दैकत्वादिति । अतोविचारा न्नविनिवर्तते ॥ ६ ॥ किञ्च । यस्मिन् अवस्थाविशेषे । सर्वाणिभूतानि चेतना-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

चेतनानि । आत्मैव अभूत् संभवन्ति । विजानतः आत्मैवेदम् सर्वं । सर्वंखल्विदंब्रह्मेत्येवमादि वाक्यविचारेण विधूतविज्ञानस्य । तत्रअवस्थाविशेषेकृत चेतसोयोगिनः कः मोहः कःशोकः नकश्चिदपीत्यभिप्रायः । शोकमोहौ ह्यपरिज्ञात तत्वस्यभवतः । हेतुगर्भंविशेषणमाह । एकत्वमनुपश्यतः सर्वाणिभूतानि ध्यायतः ॥ ७ ॥ स पर्यगात् । जमती । य एवमात्मानमुपास्ते स पर्यगात्परिगच्छति शुक्रं शुक्लं विज्ञानानन्दस्वभावमचिन्त्यशक्तिम् । अकायं न विद्यते कायः शरीरं यस्य

भूतान्यात्मैवाभूद्विजानतः ॥ तत्रको मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥ सपरि ॥ सपर्य्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ॥ कविर्म्मनीषीपरिभूः स्वयम्भूर्य्याथातथ्यतोर्थान्

स तथोक्तः अव्रणं कायरहितत्वादेवास्नाविरं स्नायुरहितमकायत्वादेव शुद्धमनुपहतं सत्वरजस्तमोभिरपापविद्धं क्लेशकर्मविपाकाशयैरसंस्पृष्टमकायमव्रणमस्नाविरमिति पुनरुक्तान्यभ्यासे भूयांसमर्थम् मन्यन्त इत्यदोषः इत्थंभूतं ब्रह्म प्रतिपद्यते । अथात्मोपासनायुक्तस्य फलमाह । यश्च कविः क्रान्तदर्शनः मनीषी मेधावी परिभूः सर्वतो भवताविज्ञानबलात्स्वयम्भूः स्वयं ज्ञान-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बलाद्ब्रह्मरूपेण भविता सः याथातथ्यतोऽर्थान्व्यदधाद्यथास्वरूपमर्थान्विहितवान् । त्यक्तस्वस्वामिसंबन्धैरर्थैश्चेतनाचेतनैरुपभोगं कृतवान् । शाश्वतीभ्योऽनन्ताभ्यः समाभ्योऽर्थाय अनन्तवर्षप्राप्तये च कर्म कृतवान् । ननु क र्मजाद्यालोकः कर्मवान्भवति । सत्यम् । आत्मसंस्कारकन्तु कर्मब्रह्मभावजनकंस्यात् । तस्मात्सोपिगच्छति शुक्रमकायंब्रह्मइति ॥ ८ ॥ इतउत्तरम् उपासनामंत्राःप्रोच्यन्ते । अन्धन्तमः । षडनुष्टुभः । लोकायतिकाः प्रस्तूयनिन्द्यन्ते । येषामेतद्दर्शनम् । जलबुद्बुदवज्जीवाः । मदशक्तिर्वद्विज्ञानमिति । अन्धन्तमः प्रविशन्तियेसंभूतिमुपासते । मृतस्यसतः

न्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥८॥ अन्धन्तमः ॥ प्रविशन्ति येसंभूतिमुपासते ॥ ततोभूयऽइवतेतमोयऽउसम्भूत्याꣳरताः ॥९॥

पुनः संभवोनास्ति अतःशरीरग्रहणा दस्माकंमुक्तिरेव । नहिविज्ञानात्माकश्चिदनुच्छित्ति धर्मास्ति योयमनियमैः । संवध्यते । एवंयेउपासते तेअन्धम् अज्ञानलक्षणंतमः प्रविशन्ति । ततोभूय इवतेतमः । ततोपिबहुतरम् । इवोनर्थकः । तेतमः प्रविशन्ति । येउ उकारः कर्मोपसंग्रहार्थीयः । येसंभूत्यामेवरताः । आत्मैवास्मिनान्यत्किञ्चिदस्ती त्ययमभिप्रायः । कर्मराशुखाय तत्कर्मकाण्डज्ञानकाण्डयोरसंभव इत्ययमभिप्रेत्य स्वबुद्धिमद्भुतांविभावयन्तः आत्मज्ञानएवरताः ॥ ९ ॥ अन्यदेव ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अन्यदेवफलम् आहुः संभवात् संभवपरिज्ञानात् अन्यच्च आहुःफलम् । असंभवपरिज्ञानात् । इति एवं । शुश्रुमः श्रुतवन्तोवयम् । धीराणांवचांसि । येधीराः नःअस्माकम् तत्ब्रह्म । विचचक्षिरे । आख्यातवन्तः ॥ १० ॥ सम्भूतिंच । समस्तसत्रजगतः संभवैकहेतुं चपरंब्रह्म । विनाशंच विनाशिशरीरंच । यःयोगी । तदुभयंवेदजानाति । सहएकीभूतम् । शरीरग्रहणेन ज्ञानोत्पत्तिहेतूनिकर्माणि-

अन्यदेव ॥ अन्यदेवाहुः संभवादन्यदाहुरसंभवात् ॥ इति शुश्रुमधीराणाँ ये नस्तद्विचचक्षिरे ॥१०॥ सम्भूतिञ्च ॥ विनाशञ्चयस्तद्वेदोभयंसह ॥ विनाशेनमृत्युन्तीर्त्वासम्भूत्यामृतमश्नुते ॥ ११ ॥ अन्धन्तमः ॥ प्रविशंतियेविद्यामुपासते ॥ ततोभूयऽइवतेतमोयऽउ

करोति । सःविनाशेन । विनाशिनाशरीरेण । मृत्युतीर्त्वाउत्तीर्य । संभूत्या आत्मविज्ञानेन । अमृतमश्नुते । अमतत्वमश्नातीत्यर्थः ॥ ११ ॥ अन्धन्तमः । अज्ञानलक्षणं तमःप्रविशन्ति । येअविद्याम् स्वर्गाद्यर्थानिकर्माणि उपासतेअनुतिष्ठन्ति । ततोभूयइवतेतमः । ततोपिबहुतरम् इवोनर्थकः ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तेतमः । प्रविशन्ति । येउयेपुनः । विद्यायामेवरताः । आत्मज्ञान एवाकृतकर्माणोरतानराः ॥१२॥ अन्यदेव । अनादेव फलमाहुः विद्यायाः आत्मज्ञानादनाच्च आहुः अविद्यायाः कर्मण इति शुश्रुमेत्यादिव्याख्यातम् ॥ १३ ॥ विद्यां च । आत्मज्ञानं च अविद्यां कर्म च यस्तदुभयं वेद जानाति सह एकीभूतं कर्म काण्डं ज्ञानकाण्डस्य गुणभूतमथ कर्मकाण्डं ज्ञानकाण्डं च

विद्यायांꣳ रताः ॥ १२ ॥ अन्यदेव ॥ अन्यदेवाहुर्व्विद्यायाऽअन्यदाहुरविद्यायाः ॥ इतिशुश्रुमधीराणांयेनस्तद्विचचक्षिरे ॥ १३ ॥ विद्याञ्चं ॥ व्विद्याञ्चाविद्याञ्चयस्तद्वेदोभयꣳसह ॥ अविद्ययामृत्युन्तीर्त्वाव्विद्ययामृतमश्नुते ॥ १४ ॥ व्वायुरनिलम् ॥ व्वायुरनिलम्

एकीकृत्य अविद्यया कर्मकाण्डेन मृत्युं तीर्त्वोत्तीर्य कृतकृत्यो भूत्वा विद्यया ब्रह्मपरिज्ञानेनामृतत्वं मोक्षमश्नुते प्राप्नोति ॥ १४ ॥ इदानीमित्थं कृतब्रह्मोपासनस्य योगिनः शरीरपातोत्तरकाले यद्भवति तदाह । वायुरनिलं । वायुग्रहणमिन्द्रियाण्येकादश महाभूतानि पञ्च

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जीवात्मैकः एवं सप्तदशकलिङ्गोपलक्षणार्थं वायुः प्राणोऽनिलं स्वकीयां प्रकृतिमापद्यते अमृतं परं ब्रह्म तद्वि तद्विज्ञाय संपद्यते । अथेदं स्थूलशरीरं कीदृशं तदा भवति भस्मान्तम् भस्मैव भवति कृतप्रयोजनकत्वात् । इदानीं योगिनः आलम्बनभूतमक्षरं कथ्यते ॐ इति नाम वा प्रतिमा वा ब्रह्मणः । इदानीमन्तकाले योगी स्मरणं करोति । क्रतो स्मर । योऽग्निर्ब्रह्मचर्यादारभ्य परिचरितः सः मन.श्वासरूपेणावस्थितः संबोध्यते । हे क्रतो मां स्मरेदानीमुपस्थितः प्रत्यु-

मृतमथेदम्भस्म्मान्तꣳशरीरम् ॥ ॐ३ ॥ क्रतोस्मर ॥ क्लिबेस्मर ॥ कृतꣳस्मर ॥१५॥ अग्नेनय ॥ सुपथाराये३अस्म्मान्विश्वान्निदेव

पकारसत्र काल इत्यभिप्रायः । क्रतुर्वा यज्ञः संबोध्यते । क्रतो स्मर क्लिबे स्मर क्लृप्ताय लोकाय स्मर कृतं स्मर मया यत्कृतं तत्स्मर ॥ १५ ॥ अग्ने नय । हेअग्ने नय सुपथा देवयानेन मार्गेण राये मुक्तिलक्षणाय धनायास्मान्विश्वानि सर्वाणि देव दानादिगुणयुक्त वयुनानि प्रज्ञानानि विद्वाञ्जानानः युयोधि पृथक्कुरु च अस्मत् अस्मत्तः जुहुराणम् प्रतिबन्धकमेनः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पात्रम् । यतो भूयिष्ठान्तेनमउक्तिं विधेम बहुतरां तव नमस्कारोक्तिं कुर्मःव्याख्यातायाः पुनर्वचनं विशेषार्थम् ॥ १६ ॥ हिरण्मयेन । इदानीमादित्योपासनमाह । यद्यपि हिरण्मयरूपेण पात्रेण येनरौप्यमयेन पात्रेण । पिबन्त्यस्मिन्निवस्थितांरसांरश्मय इतिपात्रंमण्डलम् । तेनपात्रेण मण्डलेन सत्यस्याविनाशिनः पुरुषस्य अपिहितमन्तर्हितम् । मुखंशरीरम् । तथापि यः असौ-

व्रयुनांनिव्विद्वान् ॥ युयोध्यस्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिं व्विधेम ॥ १६ ॥ हिरण्मयेनपात्रेण ॥ सत्यस्यापिहितम्मुखम् ॥ योसावादित्येपुरुषःसोसावहम् ॥ १७ ॥ ओं३

आदि त्य पुरुषः योगिभिरुपलच्यते । सःअसौअहमस्मि । एतांचोपासनांकुर्यात् ॥ १७ ॥ ओंखंब्रह्म । ओमितिनाम निर्देशः । आकाशस्वरूप ब्रह्मध्यायेत् आत्मत्वेन । नन्वचेतन आकाशः चेतनआत्मा । तद्यथा । विज्ञानमानन्दब्रह्मइति तवानन्दप्रतिपादकंवाक्यम् । सयो-मनुष्याणांराद्धः समृद्धोभवतीत्युपक्रम्य । अथशतं येप्रजापतिर्लोकआनन्दाः सएकोब्रह्मलोक-आनन्दे इतितथासर्वनिय न्तृत्वं दर्शयति । एतस्यवा अक्षरस्यप्रशासने गार्गी त्युपक्रम्य । द्यावा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पृथिवीविधृते तिष्ठतइत्यादि । तथासर्वज्ञत्वंदर्शयति । यद्वा एतमक्षरंगार्गि अदृष्टंदृष्टृत्यादि । तथामत्यसंकल्पादयोस्यगुणः श्रूयन्ते । सत्यसङ्कल्पः सत्यधृष्टिरित्यादि । यदेवंतर्हि । एतद्वैतदक्षरंगार्गि अस्मिन्वा आकाश ओत श्चप्रोतश्चेति ओतप्रोतसामान्यात् आकाशेनैवैतद्भूपंब्रह्माभिहितंस्यादिति । अयमेवच ब्रह्माभिहितंस्यादिति । अयमेवच ब्रह्मविन्मिश्रान्तः ॥

खम्ब्रह्म्म ॥

* इतिश्रीवाजसनेयसँहितायान्दीर्घपाठेचत्वारिंशत्तमोध्यायः ॥४०॥

इति उव्वटकृतौमन्त्रभाष्ये चत्वारिंशत्तमोध्यायः समाप्तः ॥ ४० ॥

आनन्दपुरवास्तव्य वज्रटाख्यस्यसूनुना । उव्वटेनकृतंभाष्यं पदवाक्यैः सुनिश्चितैः ॥ १ ॥ ऋष्यादीश्चनमस्कृत्य मवन्त्रामुव्वटोवसन् मन्त्राणांकृतवान्भाष्यं महीम् भोजेप्रशासति ॥ २ ॥


शिवःशिवङ्करोतुनः ॥ विश्वेप्रवरोविजयतेतराम् ॥

सं० १९५० मार्गशीर्ष कृष्णपक्षे प्रतिपत्तिथौ शुक्रे भाष्यमगमच्छुभम् ।

* दशाध्यायेसमाख्यातानुवाकाः सर्वसंख्यया । शतंदशानुवाकाश्चनवान्येचमनीषिभिः । १ । सप्तषष्टिश्चितीज्ञेयासोत्र द्वाविंशतिस्तथा । अश्वएकोनपञ्चाशत्पञ्चत्रिंशत्खलेस्मृताः । २ । शुक्रियेषुतुविज्ञेया एकादशमनीषिभिः । एकीकृत्यसमाख्यातंत्रिशतं चाधिकंमतम् । ३ ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



जयन्तिकाधीश्वरदेशवासिभिः वेदार्थविद्भिः प्रभुदत्तशर्म्मभिः ।
भाष्येकिलास्मिन्कृतशुद्धिटिप्पणे परार्द्धभागोयमजीगमच्छुभम् ॥

For Private And Personal